



**Tracking:**

| Sr | Date | Remarks | By |
|---|---|---|---|
| 1 | 10/11/2014 | Typing Started on | H K Srinivasa Rao |
| 2 | 30/12/2014 | Typing Ended on | H K Srinivasa Rao |
| 3 | 18/02/2015 | Ist Proof Reading & Correction | M S Venugopal & H K Srinivasa Rao |

## ॥ ಶ್ರೀ ಹಯವದನ ರಂಗವಿಠ್ಠಲ ಗೋಪೀನಾಥೋ ವಿಜಯತೇ॥

*Blessed by Lord and with His divine grace, we are pleased to publish this Magnanimous Work of Sri Narayana Panditacharya. It is a humble effort to make available this Great work to Sadhakas who are interested in the noble path of propagating Acharya Madhwa's Philosophy. With great humility, we solicit the readers to bring to our notice any inadvertant typographical mistakes that could have crept in, despite great care. We would be pleased to incorporate such corrections in the next versions. Users can contact us, for editable version, to facilitate any value additions.*

*Contact: H K SRINIVASA RAO, N0 26, 2ND FLOOR, 15TH CROSS, NEAR VIDHYAPEETA CIRCLE, ASHOKANAGAR, BANGALORE 560050. PH NO. 26615951, 8095551774,9901971176, Skypeid:SRKARC6070,*
*Email :* **srkarc@gmail.com,**

### ಕೃತಜ್ಞತೆಗಳು



ಜನ್ಮಾಂತರದ ಸುಕೃತದ ಫಲವಾಗಿ ಮಧ್ವಮತದಲ್ಲಿ ಜನಿಸಲು, ಪ್ರೇಮಮೂರ್ತಿಗಳಾಗಿ ನನ್ನ ಅಸ್ತಿತ್ವಕ್ಕೆ ಕಾರಣರಾದ, ಈ ಸಾಧನೆಗೆ ಅವಕಾಶಮಾಡಿದ, ನನ್ನ ಪೂಜ್ಯ ಮಾತಾ ಪಿತೃಗಳಾದ, ದಿವಂಗತರಾದ ಲಲಿತಮ್ಮ ಮತ್ತು ಕೃಷ್ಣರಾವ್ ಹೆಚ್ ಆರ್ ಅವರ ಸವಿ ನೆನಪಿನಲ್ಲಿ ಈ "ಜ್ಞಾನಯಜ್ಞ"

''ಮಾತೃದೇವೋ ಭವ-ಪಿತೃದೇವೋಭವ-ಆಚಾರ್ಯದೇವೋಭವ''

ಸಂಸ್ಕೃತದಲ್ಲಿರುವ ಅನುನಾಸಿಕದ ಸ್ಪಷ್ಟವಾದ ವೈವಿಧ್ಯತೆಯು, ಕನ್ನಡ ಭಾಷೆಯಲ್ಲಿಯೂ ಇರುವಾಗ, ಅದರ ಜ್ಞಾನದ ಗಂಧವೇ ಇಲ್ಲದವರಂತೆ, ಕನ್ನಡಿಗರು ಇದನ್ನು ಕಡೆಗಣಿಸಿರುವುದು ಏಕೋ ತಿಳಿಯದಾಗಿದೆ. ಸರಿಯಾದ ಉಚ್ಚಾರಣೆಗಾಗಿ, ಸರಿಯಾದ ಅನುಸ್ವಾರಗಳು ಅವಶ್ಯಕ. ಆದ್ದರಿಂದ, ಶ್ರಮವಹಿಸಿ, ಸರಿಯಾದ ಅನುನಾಸಿಕ, ಅನುಸ್ವಾರಗಳನ್ನು ಬಳಸಲಾಗಿದೆ. ಓದುಗರು ಇದನ್ನು ಗಮನಿಸಿ ಮನ್ನಿಸಬೇಕಾಗಿ ಪ್ರಾರ್ಥಿಸಲಾಗಿದೆ.

ಗ್ರಂಥ ಋಣ- ಶ್ರೀಮದಧೋಕ್ಷಜತೀರ್ಥಸಂಸ್ಥಾನಮ್, ಶ್ರೀಪೇಜಾವರಮಠ – ಡಾ. ಬನ್ನಂಜೇ ಗೋವಿಂದಚಾರ್ಯರರಿಂದ ಪ್ರಕಾಶಿತವಾದ ಸಂಗ್ರಹರಾಮಾಯಣ.

TABLEOFCONTENTS


सङ्ग्रहरामयणम् ........ 7

**बाल-काण्डम्** ॥1-8-422॥ ........ 7

प्रथमः सर्गः॥1-1-32॥ ........ 7

द्वितीय सर्ग्ग॥1-2-52॥ ........ 11

तृतीयः सर्ग्गः॥1-3-52॥ ........ 16

चतुर्थः सर्गः ॥1–4–54॥ ........ 22

पञ्चमः सर्गः ॥1–5–54॥ ........ 27

षष्ठः सर्ग्गः ॥1–6–54॥ ........ 33

सप्तमसर्ग्गः॥1-7-35॥ ........ 39

अष्टमः सर्ग्गः ॥1-8- 81॥ ........ 43

**अयोध्या खाण्डम्:** 2-12 ........ 51

प्रथमः सर्गः : ॥2-1-32॥ ........ 51

द्वितीयः सर्ग्गः ॥2-2-45॥ ........ 55

तृतीयः सर्ग्गः ॥2-3-69॥ ........ 59

चतुर्थः सर्ग्गः ॥2-4-53॥ ........ 66

पञ्चमः सर्ग्गः ॥2-5-50॥ ........ 72

षष्ठः सर्ग्गः ॥2-6-43॥ ........ 77

सप्तमः सर्ग्गः ॥2-7-53॥ ........ 82

अष्टमः सर्ग्गः ॥8-63॥ ........ 87

नवमः सर्गः॥2-9-50॥ ........ 94

दशमः सर्गः ॥2-10-61॥ ........ 99

एकादशः सर्ग्गः ॥2-11-63॥ ........ 105

द्वादशः सर्ग्गः ॥2-12-121॥ ....112

अरण्यकाण्डम्॥3-6॥ .... 124

प्रथमः सर्ग्गः ॥3-1-45॥ ....124

द्वितीयः सर्ग्गः ॥3-2-58॥ ....129

तृतीयः सर्ग्गः ॥3-3-54॥ ....135

चतुर्त्थः सर्ग्गः ॥3-4-44॥ ....141

पञ्चमः सर्ग्गः॥3-5-48॥ ....145

अथ षष्ठः सर्ग्गः॥3-6-43॥ ....150

किष्किन्धा काण्डम्॥4-8-॥ .... 155

प्रथमः सर्गः ॥4-1-36॥ ....155

द्वितीयः सर्ग्गः ॥4-2-51॥ ....159

तृतीयः सर्ग्गः ॥4-3-51॥ ....164

चतुर्थः सर्ग्गः ॥4-4-76॥ ....169

पञ्चमः सर्ग्गः॥4-5-46॥ ....177

षष्ठः सर्ग्गः ॥4-6-55॥ ....182

सप्तमः सर्ग्गः ॥4-7-105॥ ....188

अष्टमः सर्ग्गः ॥4-8-74॥ ....198

सुन्दरकाण्डम्॥5॥ .... 206

प्रथमः सर्ग्ग॥5-1-29॥ ....206

द्वितीयः सर्ग्गः॥ 5-2-59॥ ....209

तृतीयः सर्ग्गः ॥5-3-56॥ ....215

चतुर्त्थः सर्ग्गः ॥5-4-64॥ ....221

पञ्चमः सर्ग्गः ॥5-5-53॥ ....228

षष्ठः सर्गः ॥5-6-69॥ ........ 233

युद्ध खाण्डम् ॥6-16॥ ........ 241

प्रथमः सर्गः ॥6-1-53॥ ........ 241

द्वितीयः सर्गः ॥6-2-61॥ ........ 246

तृतीयः सर्गः ॥6-3-54॥ ........ 252

चतुर्थः सर्गः ॥6-4-30॥ ........ 258

पञ्चमः सर्गः ॥6-5-50॥ ........ 261

षष्ठः सर्गः ॥6-6-63॥ ........ 266

सप्तमः सर्गः ॥6-7-32॥ ........ 273

अष्टमः सर्गः॥6-8-43॥ ........ 276

नवमः सर्गः ॥6-9-79॥ ........ 281

दशमः सर्गः॥6-10-53॥ ........ 289

एकादशः सर्गः ॥6-11-73॥ ........ 295

द्वादशः सर्गः ॥6-12-34॥ ........ 302

त्रयोदशः सर्गः ॥6-13-80॥ ........ 306

चतुर्दशः सर्गः ॥6-14-50॥ ........ 314

पञ्चदशः सर्गः॥6-15-84॥ ........ 319

षोडशः सर्गः ॥6-16-26॥ ........ 328

उत्तर काण्डम्॥ 7-8 ॥ ........ 331

प्रथमः सर्गः ॥7-1-48॥ ........ 331

द्वितीयः सर्गः॥7-2-32॥ ........ 336

तृतीयः सर्गः ॥7-3-46॥ ........ 339

चतुर्थः सर्गः॥7-4-79॥ ........ 344

पञ्चमः सर्गः ॥7-5-27॥ ....352

षष्ठः सर्गः ॥7-6-38॥ ....355

सप्तमः सर्गः॥ 7-7-52॥ ....359

अष्टमः सर्गः॥7-8-30॥ ....364

[आदितः श्लोकाः 3426+30=3456] ....367

**अत स्तोत्रम्**.... 368

**फलश्रुतिः**.... 370

# सङ्ग्रहरामयणम्

## बाल-काण्डम् ॥1-8-422॥

### प्रथमः सर्गः ॥1-1-32॥

वन्दे वन्द्यं विधिशिवमहेन्द्रादिवृन्दारकेन्द्रै
र्व्यक्तं व्याप्तं स्वगुणगणतो देशतः कालतश्च।
धूतावद्यं सुखचितिमयैर्म्मङ्गळैर्य्युक्तमङ्गैः
सानाथ्यं नो विदधदधिकं ब्रह्म नारायणाख्यम्॥1॥

भूषारत्नं भुवनवलयस्याखिलाश्चर्य्यरत्नं
लीलारत्नं जलधिदुहितुर्द्देवतामौळिरत्नम्।
चिन्तारत्नं जगति भजतां सत्सरोजद्युरत्नं
कौसल्याया लसतु मम हृन्मण्डले पुत्ररत्नम्॥2॥

महाव्याकरणाम्बोधिमन्थमानसमन्दरम्।
कवयन्तं रामकीर्त्त्या हनूमन्तमुपास्महे॥3॥

मुख्यप्राणाय भीमाय नमो यस्य भुजान्तरम्।
नानावीरसुवर्ण्णानां निकषाश्मायितं बभौ॥4॥

स्वान्तस्थानन्तशय्याय पूर्ण्णज्ञानरसार्ण्णसे।
उत्तुङ्गवाक्तरङ्गाय मध्वदुग्धाब्धये नमः॥5॥

सूक्तिरत्नाकरे रम्ये मूलरामायणार्ण्णवे।
विहरन्तो महीयांसः प्रीयन्तां गुरवो मम॥6॥

| |
|---|
| वाल्मीकेर्गौः पुनीयात् वो महीधरपदाश्रया।<br>यद्दुग्धमुपजीवन्ति कवयस्तर्णका इव॥7॥ |
| एको नारायणोऽग्रेऽभूत् पूर्णागण्यगुणार्णवः।<br>आत्मारामोऽपि रमया रममाणोऽभिरामया॥8॥ |
| निद्रामुद्राविलसितं भुक्त्वा विश्वमधीश्वरम्।<br>तमवन्दन्त वेदान्ता नरेन्द्रमिव वन्दिनः॥9॥ |
| कृतकृत्योऽपि भक्तानां भूतये भगवानयम्।<br>सिसृक्षति स्म सकलं सरासुरनरादिकम्॥10॥ |
| वासुदेवोऽभवद् देवो मायया प्रियया युतः।<br>सर्वमुर्वारुकमिव मोचयेद् यो निबन्धनात्॥11॥ |
| सङ्कर्षणाख्यः संहारी जयाजानिरजन्यसौ।<br>यत्रोरुज्वलनज्वाले जगदाज्यकणायितम्॥12॥ |
| कृतिप्रकृतिरप्यासीत् प्रद्युम्नः सर्वसृष्टये।<br>अवैकृतोऽप्राकृतोऽपि चित्रं चरितमीशितुः॥13॥ |
| शान्तिकान्तोऽनिरुद्धोऽथ जगतः स्थितयेऽभवत्।<br>एवं पञ्चात्मनोऽप्यस्य पञ्चत्वं नातिशङ्क्यताम्॥14॥ |
| दशात्मा द्वादशात्माऽऽसीत् शतं दशशती च सः।<br>एकोऽप्यनन्तश्चित्रं तद् योगैश्वर्य्यविजृम्भितम्॥15॥ |
| ज्ञानानन्दस्वतन्त्रत्वविश्वैश्वर्य्यादयो गुणाः।<br>अत्रैगुण्यस्य चागण्याः सर्वे गात्रीभवन्ति हि॥16॥ |

| |
|---|
| क्लेशो नाशश्च वैवश्यं जन्मादिरपरोऽपि वा।<br>नाऽदीनवोऽस्त्यदीनस्य तस्य क्वापि कथञ्चन॥17॥ |
| वेदवेदान्तसहिताः सपुराणेतिहासकाः।<br>पञ्चरात्रसुतर्काद्या एतेष्वर्त्थेषु साक्षिणः॥18॥ |
| अव्यक्तोऽव्यक्तमसृजद् गुणान् विषमतां नयन्।<br>महान्तमप्यहङ्कारं त्र्याख्यं भूतेन्द्रियामरान्॥19॥ |
| सदैवतानि तत्वानि तानि सर्वाणि यत्नतः।<br>अण्डसृष्टावपाण्डित्याच्छार्ङ्गिणं शरणं ययुः॥20॥ |
| आत्माविश्टैर्व्यधात् तत्वैः स आयतनमीदृशम्।<br>परिपूर्णस्य नाथस्य करुणैवात्र कारणम्॥21॥ |
| पुरुषः स सहस्राक्षश्चतुरं चतुराननम्।<br>स्रष्टारं सृष्टवान् सोऽपि सुरासुरनरादिकान्॥22॥ |
| सनकादीन् मुनीन् सृष्ट्वा योगिनोऽतिविरागिणः।<br>सृष्टावनुद्यमान् दृष्ट्वा चुक्रोधोरुक्रमप्रियः॥23॥ |
| क्रुध्यतो ध्यायतस्तस्य ललाटादुदभूत् सुतः।<br>योऽभिमानमयो रुद्रः सर्ग्गमार्ग्गमबृंहयत्॥24॥ |
| मरीचिमुख्या मुनयः प्राणेभ्यः प्राणिनां गुरोः।<br>अजायन्त प्रजावृद्ध्यै बीजानीव वनस्पतेः॥25॥ |
| मरीचेः काश्यपो जज्ञे बीजं सर्वजगत्तरोः।<br>विवस्वांश्च ततोऽदित्यामरण्यामिव पावकः॥26॥ |

| |
|---|
| श्राद्धदेवाह्वयो देवो मनुः सूनुर्विवस्वतः।<br>ईक्ष्वाकुमुख्या यत्तन्तौ नरेन्द्रमणयो बभुः॥27॥ |
| हाराणामिव शुभ्राणां भूपानां भूरितेजसाम्।<br>सन्तत्यां नायकच्छायो राजा दशरथोऽभवत्॥28॥ |
| अयोध्यां नाम नगरीमध्युवास स पार्थिवः।<br>अत्रायतैकच्छत्रो यः सप्तद्वीपवतीं महीम्॥29॥ |
| तस्मिन् पालयति क्षोणीमर्थकामविषाणवान्।<br>धर्म्मश्चतुष्पाद् ववृधेसाक्षान्मोक्षधुरन्धरः॥30॥ |
| वदान्येन प्रवीरेण तेन कश्चिन्न लक्षितः।<br>प्रतिग्रहार्त्थी विमुखो विग्रहार्त्थी तथोन्मुखः॥31॥ |
| अपुत्रत्वं विना राज्ञः किञ्चिन्नावैक्षि दूषणम्।<br>लोकाभिनन्दिनो यद्वच्छशाङ्कस्य शशं विना॥32॥ |
| सोऽप्राप्य तन्तु भार्य्यासु तिसृष्वप्यन्वचिन्तयत्।<br>तत्वनिर्ण्णयमप्राप्य त्रय्यां मीमांसको यथा॥33॥ |
| मन्त्रिणः स सुमन्त्रादीनाहूयेत्थममन्त्रयत्।<br>अपुत्रत्वज्वरोत्तप्तः सर्वत्रारुचिमान् नृपः॥34॥ |
| अश्वमेधेन यक्ष्यामि विश्वनाथं सुताप्तये।<br>ईश्वरे नः प्रसन्ने किं दुर्ल्लभं भक्तवत्सले॥35॥ |
| सुमन्त्रतन्त्रेषु मखेषु कोविदान् सुमन्त्र हन्ताऽनय शीघ्रमृत्विजः।<br>गुरुं वसिष्ठं च समेधयेद् ध्रुवं क्षत्रं खलु ब्रह्म यथानिलोऽनलम्॥36॥ |

इति निजकनियोगान्मन्त्रिणाऽऽनीतमात्रान्
नरपतिरवलोक्य ब्राह्मणान् ब्रह्मनिष्ठान्।
अनमदनभिमानो भक्तिभारेण भूयो
हृदि जगदभिरामं वासुदेवं दधानः॥32॥

इति श्रीनारायणपण्डिताचार्य्यविरचिते रामाङ्के सङ्ग्रहरामायणे बालकाण्डे प्रथमः सर्गः॥1-1-32॥

## द्वितीय सर्ग॥1-2-52॥

सुयज्ञो वामदेवश्च जाबालिरुत काश्यपः।
वसिष्ठश्चाग्नय इव पञ्चैते तत्र रेजिरे॥1॥

तेषां सपरिवाराणां प्राज्ञानामभ्यनुज्ञया।
सम्बभाराथ सम्भारान् वाजिमेधस्य भूपतिः॥2॥

एकान्तेऽकान्तवदनं राजानं पुत्त्रलालसम्।
सुमन्त्रो मन्त्रतत्वज्ञः प्रणिपत्येदमब्रवीत्॥3॥

अवधारय राजेन्द्र कत्थ्यमानां कथां मया।
सनत्कुमारो भगवानाह स्म मुनिसंसदि॥4॥

विभाण्डकश्चण्डतपाः काश्यपस्यास्ति नन्दनः।
भविष्यत्यृश्यशृङ्गोऽस्माच्छ्रीमानग्निरिवारणेः॥5॥

ब्रह्मवर्चससम्पन्नं ब्रह्मचर्य्यरतं मुनिम्।
लोमपादोऽङ्गराजस्तं स्वराज्यं प्रति नेष्यति॥6॥

सारङ्गशृङ्गमानेष्यन्त्यङ्गना मुनिवेषतः।
संवञ्चयन्त्योऽत्र यदा तदा वृष्टिर्भविष्यति॥7॥

| |
|---|
| अनावृष्टिभयोद्विग्नो वृष्टिं लब्ध्वा ततो नृपः।<br>दास्यत्ययं मूल्यमिव शान्तां नाम निजात्मजाम्॥8॥ |
| मुनिमेनमुपानीय राजा दशरथाभिदः।<br>यक्षत्यधोक्षजस्तस्य पुत्रो रामो भविष्यति॥9॥ |
| रमणीयतरस्तस्य राघवस्य यशोविधुः।<br>निरसिष्यत्युरु तमो लोकानानन्दयिष्यति॥10॥ |
| इदं सनत्कुमारोक्तं देवगुह्यं श्रुतं मया।<br>तस्मात् त्वं लोमपादस्य गोहादानय तं मुनिम्॥11॥ |
| आकर्ण्य वर्णितं तेन वसिष्ठस्याभ्यनुज्ञया।<br>कोसलेन्द्रः स्वयं गत्वा तं मनीन्द्रं समानयत्॥12॥ |
| क्षोणीं प्रदक्षिणीकृत्य समानीते तुरङ्गमे।<br>सरय्वा उत्तरे तीरे स राजा समदीक्षत॥13॥ |
| आहूता राजराजेन राजराजविभूतिना।<br>उपायानान्युपानीय भूपा वैश्यवदाययुः॥14॥ |
| आजग्मुर्य्यज्ञवाटं तं प्रजाः सर्वाः प्रजापतेः।<br>महोत्सवोत्सुकदृशः प्रशंसन्त्योऽस्य विक्रमान्॥15॥ |
| आस्यतां भुज्यतां भूयः पीयतां परिधीयताम्।<br>इत्यत्र सन्तताः शब्दा जातु नो दीयतामिति॥16॥ |
| पण्डितौ कर्म्मकाण्डेषु वैभाण्डकविधातृजौ।<br>ऋत्विग्भिर्ग्गुणसम्पन्नैः क्रतुराजं प्रचक्रतुः॥17॥ |

| |
|---|
| मन्त्रतन्त्रोपकरणकर्त्तृवह्निषु केशवम्।<br>देशेकाले च मन्वानाश्चक्रुस्ते कर्म्म निर्म्मलम्॥18॥ |
| इष्टिभेदैः प्रवर्ग्यैश्च सोमानां सवनैस्त्रिभिः।<br>देवा अमाद्यन् वाय्वाद्याः पशुभिर्विविधैरपि॥19॥ |
| यजमानो दशरथो याजको ब्रह्मनन्दनः।<br>रामोदयः फलं यस्य को नु तं वर्ण्णयेत् क्रतुम्॥20॥ |
| दिशः प्रत्यर्प्पिता दृष्ट्वा दत्ता अप्यात्मनाऽखिलाः।<br>रुग्मार्बुदं स ऋत्विग्भ्यो गवां लक्षाणि चादिशत्॥21॥ |
| वर्ण्णनाथः सुवर्ण्णेभ्यो दुर्वर्ण्णौघं चतुर्ग्गुणम्।<br>प्रदाय प्रणनामोर्व्यां विष्णुर्न्नः प्रीयतामिति॥22॥ |
| तदा राघवमेघेन कोटिहाटकवर्षिणा।<br>तर्प्पितः सकलो लोकः पुनर्न्नव इवाऽबभौ॥23॥ |
| याचमानाय विप्राय दरिद्रायाङ्गदं ददौ।<br>हसन्नुन्मुच्य राजा तं ब्रह्मण्यं जनताऽऽर्च्चयत्॥24॥ |
| अश्वमेधाग्निनिर्द्दग्धपाप्मनः पार्त्थिवस्य ते।<br>उदारस्य सदारस्य प्रणतस्याऽशिषोऽवदन्॥25॥ |
| अथर्वशिरसैर्म्मन्त्रैरिष्टिं कर्म्मविमुक्तये।<br>पुत्रीयां च क्षितीन्द्रस्य व्यधाद् वैभाण्डको मुनिः॥26॥ |
| ऋश्यशृङ्गस्तदा योगी हविर्भागार्त्थमागतान्।<br>सुरान् सावासवान् दृष्ट्वा प्राञ्जलिः प्रत्यभाषत॥27॥ |

अयं राजा विधायेष्टिं मेधावी हयमेधकृत्।
शरणं पुत्रकामो वः प्राप्तः प्रीयध्वमञ्जसा॥28॥

इच्छत्यसावनुपमान् पुत्त्रांस्त्रैलोक्यविश्रुतान्।
देवकार्य्यस्य भावित्वाद् यूयं तत्रानुमोदत॥29॥

प्रार्त्थिताः पार्त्थिवार्त्थं ते तापसेनेति निर्ज्जराः।
वरं प्रदाय तं तस्मै ब्रह्मलोकमुपाययुः॥30॥

जगदुस्ते जगद्योनिं नत्वा प्राञ्जलयः सुराः।
नाथानाथाः प्रजाः पाहि रक्षोभ्यां समुपद्रुताः॥31॥

सुतौ विश्रवसोऽश्रान्तं तपस्तप्त्वा प्रतापिनौ।
वरं हि प्रापतुस्त्वत्तः सर्वलोकैरवध्यताम्॥32॥

कुम्भकर्णाग्रजोऽत्युग्रो रावणो लोकरावणः।
दिशो दश दशास्योऽसावजयत् खलु लीलया॥33॥

विंशद्भिर्बाहुमुसलैरवहत्य जघास सः।
भयाग्निर्भर्ज्जितान् देहिव्रीहीन् पृथुकवत् खलः॥34॥

देवोपदेवभूदेवनरदेवानुतेतरान्।
मारयन् दारयन् भ्राम्यत्यहो सिंहो मृगानिव॥35॥

यद्यच्चारुतरं घोरः पश्येद् भुवनमण्डले।
धनं जीवधनं वाऽपि तत्तल्लङ्कामयापयत्॥36॥

स्त्रीरत्नानां सरत्नानां नृशंसः पश्यतोहरः।
दूषणं च कुलस्त्रीणां भूषणं स्वस्य मन्यते॥37॥

| |
|---|
| तपः स्वाध्याययज्ञानामन्तरायं निरन्तरम्।<br>देवर्षिविप्रियापेक्षी दुराचारश्चरत्ययम्॥38॥ |
| लोकपालान् महेन्द्रादीनस्मान् विस्मयविक्रमः।<br>अजान् गजाधिपइव प्राद्रावयदति द्रुतम्॥39॥ |
| वधोपायोऽनपायस्य यदि नास्य निरूप्यते।<br>प्राप्यते प्रळयः स्वामिन् रुद्रकालान्तकान् विना॥40॥ |
| इति देववचः श्रुत्वा देवः स्मितमुखोब्रवीत्।<br>यो योगक्षेमदाता नस्तेन हीदं विधित्सितम्॥41॥ |
| यस्मै बलिं हरामोऽङ्ग विश्वेऽपि विवशा वयम्।<br>विद्धनासा यथागावः स शार्ङ्गी शं विधास्यति॥42॥ |
| एतावदुक्त्वा भगवान् सभवः कञ्जसम्भवः।<br>सवृन्दारकवृन्दोऽथ तीरं क्षीराम्बुधेर्य्ययौ॥43॥ |
| प्रतिबिम्बमिवापश्यन् भगवत्कीर्त्तिवारिधेः।<br>पीयूषवारिधिं हारगौरं पीयूषभोजनाः॥44॥ |
| पुरायितं मुररिपोर्म्मणिराजिविराजितम्।<br>सालायमानैरुत्तङ्गैस्तरङ्गैरुपशोभितम्॥45॥ |
| गम्भीरस्तोत्रनिनदं लोलमन्तः कुतूहलात्।<br>अत्यन्तमिव नृत्यन्तं भक्तं भक्तानुरागिणः॥46॥ |
| तस्य तीरमधिष्ठाय कञ्जोद्भवभवादयः।<br>तुष्टुवुस्तुष्टमनसो विष्टरश्रवसं सुराः॥47॥ |

नमो नागेन्द्रशय्याय नमो नानाविलासिने।
नमोऽनाद्यन्तमद्याय नमो नारायणाय ते॥48॥

विपत्त्युत्पत्तिनियतिस्थितिज्ञप्तिसमावृतीः।
सृतिं मुक्तिं च जगतः स्वामिन्नेकः करोत्यहो॥49॥

नैकैकशोऽपि गणशस्तवानन्तान् गुणान् वयम्।
समापयामः सततं गायन्तोऽप्यपरे कुतः॥50॥

यावन्न निर्द्दहति रावणनामवह्निर्विश्वं च दाशरथिभूयमुपेत्य तावत्।
त्वं नाथ तं शमय वीर्य्यसमुद्रपूरैर्भक्ताननन्यशरणान् कुरु वीततापान्॥51॥

गीर्वाणैरिति नुतिमद्भिरर्त्थ्यमानःप्रत्यक्षीभवति पुरा पुराणमूर्त्तिः।
बालार्क्कप्रकररुचिः पिशङ्गवासाः स्वाकल्पस्फुरितमणिर्म्मनोभिरामः॥52॥

इति श्रीनारायणपण्डिताचार्य्यविरचिते रामाङ्के सङ्ग्रहरामायणे बालकाण्डे द्वितीयः सर्ग्गः॥ [आदितः श्लोकाः 37+53=89]

## तृतीयः सर्ग्गः॥1-3-52॥

मन्दहासेन्दुमहसा नन्दयन् देवता हरिः।
साध्वसं साध्वशमयन्मेघगम्भीरया गिरा॥1॥

निर्ज्जरा विज्वराः स्वस्थाः स्वस्था भवत माचिरम्।
अपित्रैलोक्यजयिनं वत्सा वत्स्यामि वो रिपुम्॥2॥

आकर्ण्य कर्ण्णपीयूषमुत्तमश्लोकजल्पितम्।
कतकृत्यास्ततो जग्मुस्त्रिदिवं त्रिदिवौकसः॥3॥

| |
|---|
| राज्ञ इष्टिसमिद्धाग्नेर्न्नारायणनियोगतः।<br>उदतिष्ठन्महद् भूतं प्राजापत्यं रुचा ज्वलत्॥4॥ |
| सुवर्ण्णपात्रे सम्पूर्ण्णं पायसं पार्त्थिवाय तत्।<br>दत्वेदं पुत्त्रियमिति तत्रैवान्तर्द्दधे द्रुतम्॥5॥ |
| कौसल्यामथ कल्याणीमाहूय महिषीं प्रियाम्।<br>परमान्नाद् ददावर्द्धं परं तस्यै नराधिपः॥6॥ |
| अर्द्धादर्द्धं ततो भक्तं विभक्तं भक्तिमान् हरौ।<br>पवित्रं स सुमित्रायै सुस्मितायै ददावथ॥7॥ |
| तस्मादर्द्धादसावर्द्धं कैकेय्यै प्रतिदत्तवान्।<br>परमर्द्धं सुमित्रायै पुनरेव प्रदत्तवान्॥8॥ |
| तान् पायसांशान् भुक्त्वा ता देव्यः शुशुभिरेऽधिकम्।<br>मधुकालगुणान् भुक्त्वा माधव्य इव सल्लताः॥9॥ |
| राघवान्निरघाद् गर्भं लेभिरे ता वरस्त्रियः।<br>पूर्वपक्षादिव दिशश्चन्द्रमानन्दकारणम्॥10॥ |
| अवगम्य गदापाणेरवतारं नृपालये।<br>स्वयम्भूः स्वयमाहूय विबुधानिदमब्रवीत्॥11॥ |
| अपि पूर्ण्णोऽवतीर्ण्णो नः प्रसादाय दयाकरः।<br>सेवध्वं सेवनीयं तमवतीर्य्य भुवस्तळे॥12॥ |
| उत्पादयध्वमृक्षीषु वानरीष्वपरासु च।<br>उत्पद्यध्वं स्वतनयाः स्वयमेव च सद्गुणाः॥13॥ |

| |
|---|
| जृम्भमाणस्य मे वक्त्राज्जाम्बवानुदपद्यत।<br>ऋक्षो रक्षोविनाशार्थं धर्म्मो धर्म्मधरः पुरा॥14॥ |
| उदपद्यन्त सद्यस्तेतं विधातुं विधेर्विधिम्।<br>गोलाङ्गूलाः केचिदृक्षा वानरा अपरे नराः॥15॥ |
| बभूव हनुमान् नाम मुख्यप्राणः प्रभञ्जनः।<br>उत्तमश्लोकभक्तानामुत्तमो योऽखिलोत्तमः॥16॥ |
| वासवो वालिनामाऽऽसीदिन्दुस्तत्तनयोऽङ्गदः।<br>रविः सुग्रीवनामाऽभूदनलो नीलनामकः॥17॥ |
| वरुणश्च सुषेणोऽभूद् विश्वकर्म्मा नळोऽजनि।<br>अभूतां मैन्दविविदावश्विनौ सेवितुं विभुम्॥18॥ |
| प्राणाद्याः पञ्च मरुतो धनदादत्र जज्ञिरे।<br>गजो गवाक्षो  गवयो वृषाख्यो गन्धमादनः॥19॥ |
| पनसाख्यः शतवलिर्ज्जातौ वस्वंशसम्भवौ।<br>मरुच्छ्रेष्ठावजायेतां श्वेतसम्पातिनामकौ॥20॥ |
| बृहस्पतिर्बृहद्बुद्धिस्तारो नाम व्यजायत।<br>शची महेन्द्रमहिषी तारा तारस्वसाऽभवत्॥21॥ |
| वित्तपः कत्थनाख्योऽभून्निर्ऋतिर्द्दुर्म्मुखाभिधः।<br>मरुच्छ्रेष्ठः पूर्वमेव केसर्य्याख्यो व्यजायत॥22॥ |
| पर्ज्जन्यः शरभो जज्ञे प्रायस्ते स्वसुताः स्वयम्।<br>ऋषिगन्धर्वसिद्धाद्या अपि  जाताः सहस्रशः॥23॥ |

| |
|---|
| क्रुद्धा धरां ते विभिन्द्युरुद्धरेयुर्द्धराधरान्।<br>नखदन्तायुधा युद्धे नागायुतबलोद्धताः ॥24॥ |
| नानायोनिषु सञ्जाता नानायुद्धविशारदाः।<br>नानाविधमसेवन्त नानावीर्य्यं रमापतिम्॥25॥ |
| अच्छिन्नपक्षैरपरैः पर्वतैरिव सर्वतः।<br>घनाघनैरिव घनैस्तैः समस्कारि भूरियम्॥26॥ |
| वैवस्वतेऽन्तरे प्राप्ते त्रेतायामुत्तरायणे।<br>चैत्रे नवम्यां प्राक्पक्षे दिवा पुण्ये पुनर्वसौ॥27॥ |
| उदये गुरुगौरांश्वोर्ल्लग्ने कर्क्कटकाह्वये।<br>मेषं पूषणि सम्प्राप्ते स्वोच्चस्थे ग्रहपञ्चके॥28॥ |
| आविरासीत् स्वकलया कौसल्यायाः परः पुमान्।<br>दिव्यव्रतैर्विशुद्धायाः साक्षात् तत्वमतेरिव॥29॥ |
| सन्तोऽगच्छन् प्रसन्नत्वमसन्तोऽपि विषण्णताम्।<br>जायमाने त्वजे तस्मिन् जगदासीदनाकुलम्॥30॥ |
| ब्रह्मादीनां सुरेन्द्राणां रम्याः कुसुमवृष्टयः।<br>जयशब्दास्तूर्य्यशब्दा अप्ययोद्ध्यामपूरयन्॥31॥ |
| अनन्तोऽनन्तपर्य्यङ्कः परिचर्य्यार्त्थमीशितुः।<br>सर्प्पभेऽजनि सौमित्रिः कुळीरेऽभ्युदिते रवौ॥32॥ |
| चक्रायुधस्य यच्चक्रं दैत्यचक्रविदारणम्।<br>तत् कामरूपं कैकेय्याः पुष्ये पुत्रत्वमाययौ॥33॥ |

| |
|---|
| देवद्विड्ढनजन्यघ्नः पाञ्चजन्योऽप्यजन्यथ।<br>सुमित्रायाः सुतत्वेन स्वामिनः सेवनेच्छया॥34॥ |
| चतुर्म्मूर्तेर्म्मुकुन्दस्य मूर्तिराद्याऽग्रतोऽभवत्।<br>अन्येषु त्रिषु तिस्रोऽन्या आविशन्निति सन्मतम्॥35॥ |
| अपुत्रः प्राप्य सत्पुत्रान् मग्न आनन्दवारिधौ।<br>कृत्यान्तरं नृपो नावैन्निधिं लब्ध्वेव निर्द्धनः॥36॥ |
| पाल्यमानाः प्रजाः सर्वाः प्रजानाथेन पुत्रवत्।<br>अवेत्य तन्तुमन्तं तं तुष्यन्ति स्म गृहेगृहे॥37॥ |
| नराणामुत नारीणामयोध्यायां महोत्सवः।<br>अभूदभूतपूर्वोऽत्र सेवका ननृतुर्जगुः॥38॥ |
| सुताननेन्दुरानन्दं निन्ये राज्ञीकुमुद्वतीः।<br>मनोरथार्ण्णवं राज्ञः पूर्ण्णतां तूर्ण्णमानयत्॥39॥ |
| जातान् कुमारानभ्येत्य पुराऽन्यालम्भतो नृपः।<br>परोधसं पुरोधाय जातकर्म्माकरोच्छुचिः॥40॥ |
| यथैवासङ्ख्यतां याता विप्रैरुक्ताः सुताशिषः।<br>तथैव राज्ञा दत्तानि वित्तानि ब्रह्ममण्डले॥41॥ |
| सहितः स्वहितै राजा ब्राह्मणैर्ब्रह्मवादिभिः।<br>अनन्तनाम्नश्चक्रेऽथ नाम नारायणस्य सः॥42॥ |
| रामः सर्वाभिरामत्वादात्मारामत्वतोऽपि वा।<br>देवो मरतकश्याम इति वा रामनामकः॥43॥ |

| |
|---|
| नित्यं रमाभिसम्बन्धाद् दानं श्रीस्तस्य हीति वा।<br>रामाणां ह्यग्रभवाद्वा रामं तं सज्जना विदुः॥44॥ |
| साधुलक्ष्मगुणोपेतो लक्ष्मणो नामतोऽभवत्।<br>सौमित्रिरग्रजो लोके  शत्रुघ्नोऽवरजो मतः॥45॥ |
| कैकेयीतनयं प्राहुर्भरतं भरितं गुणैः।<br>कुमारास्ते कुमाराभा एवं नामानि भेजिरे॥46॥ |
| संस्कारान् कारयामास ब्राह्मणैर्ब्रह्मपारगैः।<br>अप्यन्नप्राशनादीन् स नन्दनानां नराधिपः॥47॥ |
| उपनीता विनीतास्ते जगृहुः साङ्गमागमम्।<br>अस्त्राणि च समस्तानि धनुर्वेदपराः कलाः॥48॥ |
| शान्ता दान्ताः पराक्रान्ताः कान्तिमन्तो गुणाधिकाः।<br>ह्रीमन्तः कीर्तिमन्तश्च देवास्ते धरणीं गताः॥49॥ |
| आत्मानइव तातस्य गुरूणां किङ्कराइव।<br>जगतामिव दैवानि मातृणामिव बालकाः॥50॥ |
| शयानमासीनमथ स्थितं गतं प्रक्रीडितं प्रस्तुतमग्रजं हरिम्।<br>क्षणं च नामुञ्चत लक्ष्मणो गुरुं शत्रुघ्न एवं भरतं निजाग्रजम्॥51॥ |
| लीलाभिः स्मितलसितैरपाङ्गभृङ्गै र्वाणीभिः प्रमुषितवाणिनीमनोभिः।<br>आनन्दं निजजनवृन्दमिन्दिरेशो रामात्मा समगमयत् सुमङ्गलाङ्गः॥52॥ |
| इति श्रीनारायणपण्डिताचार्यविरचिते रामाङ्के सङ्ग्रहरामायणे बालकाण्डे तृतीयः सर्गः॥1-3-52॥<br>[आदितः श्लोकाः 89+52=141] |

## चतुर्थः सर्गः ॥1–4–54॥

| |
|---|
| अथो दशरथो राजा पुत्राणां पुत्रवत्सलः।<br>चिन्तयामास दारार्थं सामात्यः स महीपतिः॥1॥ |
| चिरं चिन्तयता तेन समाजे समदृश्यत।<br>विश्वामित्रः सतां मित्रं कार्य्यस्यैव विनिर्णयः॥2॥ |
| प्रत्युत्थाय नृपः प्रीतः प्रदाय परमासनम्।<br>सवसिष्ठो मुनिश्रेष्ठमभिपूज्येदमब्रवीत्॥3॥ |
| भगवन् भगवद्भक्ताः परिपूर्णाः स्वभावतः।<br>तथाऽपि वयमात्मार्थं कुर्म्मो वः कर्म्म वाञ्छितम्॥4॥ |
| ननु नारायणपरास्तद्भक्तानुग्रहार्थिनः।<br>जगत्यटन्ति नाऽत्मार्थं भास्कराइव भास्वराः॥5॥ |
| महीपालवचः श्रुत्वा महीदेवोऽभ्यभाषत।<br>महावंशयस्य महतो युक्तमेतत् तवोदितम्॥6॥ |
| रक्षोभ्यामतिरूक्षाभ्यां विहता मे महुर्म्मुहुः।<br>यज्ञास्तद्रक्षणोद्देशी त्वामहं शरणं गतः॥7॥ |
| अवध्ययोः शम्बुवरादवध्यानकृतोः सताम्।<br>मच्छापोऽपि तयोर्म्मोघः स्यादग्निर्हृदयोरिव॥8॥ |
| ज्येष्ठं श्रेष्ठं तव सुतं रामं राजीवलोचनम्।<br>नियुङ्क्ष्व तद्वाधायाऽशु श्रेयस्ते भविता ध्रुवम्॥9॥ |

वेदाहं वेदसंवेद्यं तेजो राजन् सुतस्य ते।
सुरासुरैरप्रधृष्यं वसिष्ठाद्या इमे द्विजाः॥10॥

इति तस्य वचः श्रुत्वा मुमोह स महीपतिः।
वित्रस्तो निजपुत्रस्य विरहानलसङ्क्या॥11॥

लब्धसञ्ज्ञो मुहूर्त्तेन मुहुरार्त्तो नरेश्वरः।
विनिश्वस्य मुनिश्रेष्ठं दीनोऽदीनमभाषत॥12॥

सुकुमारं कुमारं मे सुतं सुकविवर्द्धितम्।
अनस्त्रज्ञमयुद्धज्ञं न रामं नेतुमर्हसि॥13॥

नववर्षसहस्त्राणि परितप्तः सुताशया।
रामाननेन्दुनेदानीमहमानन्दितो मुने॥14॥

सोऽहं मुहूर्त्तमप्येनं हित्वा न स्थातुमुत्सहे।
मम प्राणानिव ब्रह्मन् तस्माद् रामो न नीयताम्॥15॥

मायिभी राक्षसैर्योद्धुं मां मुहुर्जितकाशिनम्।
चतुरं चतुरङ्गेण चक्रेण सहितं नय॥16॥

यदि रावणमाश्रित्य युष्मान् निघ्नन्ति राक्षसाः।
प्राप्तः सर्वविनाशो नो जगत्स्यादधरोत्तरम्॥17॥

सवासवाः सुरगणा यन्नाम्नैव प्रदुद्रुवुः।
वैरं स्वैरं कथं यामस्तेन तच्चानुचिन्त्यताम्॥18॥

गोब्रह्मणार्त्थं देहोऽयं धार्य्यते क्षत्त्रबन्धुना।
तस्माद् यावन्मम प्राणास्तावद् योत्स्यामि वो रिपून्॥19॥

| |
|---|
| इति तद्वचनाज्येन प्राज्वलत् तापसानलः।<br>निशाचरापराधाख्यैः शुष्कवृक्षैः पुरा ज्वलन्॥20॥ |
| कोपाटोपं मुनेर्वीक्ष्य वसिष्ठो नृपमब्रवीत्।<br>प्रतिश्रुतं त्वया राजन् कुर्य्यामिष्टमिति ध्रुवम्॥21॥ |
| अभ्यागताय विप्राय श्रोत्रियाय यियक्षवे।<br>वैष्णवाय प्रतिश्रुत्य नाकर्त्तुं राघवार्हसि॥22॥ |
| महिमा हि महानस्य त्वत्पुत्त्रस्यास्ति संवृतः।<br>येनायं कुपितो लोकान्निर्द्दहेच्च चतुर्द्दश॥23॥ |
| विश्वामित्रोऽपि तेजस्वी नारायणपरायणः।<br>समर्त्थस्यापि ते सूनोः सहायत्वं गमिष्यति॥24॥ |
| जयासुप्रभयोः पूर्वं जातं यद् दक्षकन्ययोः।<br>तदस्त्रशतकं वेद सोऽन्यच्चाग्रे महारथः॥25॥ |
| तस्माद्रामेण राजेन्द्र गन्तव्यं मुनिना सह।<br>हन्तव्यं राक्षसकुलं त्रातव्यं यज्ञकर्म्म तत्॥26॥ |
| वासिष्ठं वाक्यमाकर्ण्य राघवो रामलक्ष्मणौ।<br>प्रेषयामास सुप्रीतः कौशिकाय समर्प्पयन्॥27॥ |
| दोर्द्दण्डार्प्पितकोदण्डौ शुभालापौ कलापिनौ।<br>किशोरावपि शूरौ तौ सुस्मितौ मुनिमीयतुः॥28॥ |
| मुमुदुस्तौ प्रजाः प्रेक्ष्य विश्वामित्रानुयायिनौ।<br>वागीशमनुगच्छन्ताविन्द्राविष्णूइवामरौ॥29॥ |

| |
|---|
| अद्ध्यर्द्धयोजनाध्वानं गत्वा गतिविदां वरः।<br>सरय्वा उत्तरे तीरे केशवं कौशिकोऽब्रवीत्॥30॥ |
| तात मन्त्रौ प्रवक्ष्यामि बलामतिबलामपि।<br>क्षुत्पिपासादिशमनौ ब्रह्मोक्तौ सर्वकामदौ॥31॥ |
| इति ब्रुवाणाद् विप्रेन्द्रान्मन्त्रौ शुश्राव राघवः।<br>सर्वज्ञः पूर्णकामोऽपि शिष्टाचारानुशिक्षकः॥32॥ |
| मुनिना लाळितौ कामं नरदेवकुमारकौ।<br>निशां तां सरयूतीरे रेमाते रामलक्ष्मणौ॥33॥ |
| सान्ध्यं कृत्यन्ततःकृत्वा प्रभाते सुप्रभा ययुः।<br>आश्रमं सरयूगङ्गासङ्गमेऽनङ्गवल्लभम्॥34॥ |
| यत्रहैमवतीकान्तलोचनानलजिह्वया।<br>अनङ्गोऽनङ्गतां प्राप्तस्तां रात्रिं तत्र तेऽवसन्॥35॥ |
| कौतूहलेन महता महामुनिगणा हरिम्।<br>अर्च्चयाञ्चक्रिरे तत्र रामनामानमागतम्॥36॥ |
| मुनयो विनयोपेताः पश्यन्तो राघवाननम्।<br>सुप्रातं न इति प्रीताः सन्ध्योपास्तिं प्रचक्रिरे॥37॥ |
| उपस्थितामुपारुह्य नावं नरवरात्मजौ।<br>सविप्रौ तेरतुर्गङ्गां सस्वनां सरयूजलैः॥38॥ |
| वनं दृष्ट्वा ततो घोरं गच्छन् पप्रच्छ राघवः।<br>मुनिशार्द्दूलकस्येदं वनं घोरमहो इति॥39॥ |

इत्युक्तः प्रोक्तवान् विप्रो रामैते विषयाः पुरा।
मलदाश्च करूशाश्च स्फीता इन्द्रप्रसादतः॥40॥

सुकेतुनाम्नो यक्षस्य ताटका तनया पुरा।
अवध्या ब्रह्मवरतो नागायुतबलाऽभवत्॥41॥

भार्य्या सुन्दस्य मारीचमाता साऽगस्त्यशापतः।
रक्षस्त्वं ससुता प्राप्य नरानत्राप्ति निर्दया॥42॥

पश्य गोब्राह्मणगणकपालास्थिकलापकम्।
त्वादृशानां सुदुर्दर्शं मान्य किं मन्यते भवान्॥43॥

उक्त्वेति मुनितां याते मुनौ मुनिजनप्रियः।
प्राविशत् सहितस्ताभ्यां ताटकाभवनं वनम्॥44॥

चापं चापधरश्रेष्ठे जृम्भयत्यदहत् क्षणात्।
स्फुलिङ्गवत् स विष्फारस्ताटकाकर्ण्णकोटरम्॥45॥

यावद् विष्फारसन्त्रस्ता वने मृगखगादयः।
नोत्थिताः प्रोत्थिता तावदापापात क्षपाचरी॥46॥

महाकायां महावीर्य्यां व्यात्ताननमहागुहाम्।
अवेक्ष्योद्यतहस्तां तां रामस्तस्थावनाकुलः॥47॥

वात्येवात्यन्तसंवेगा भूयः कोलाहलस्वना।
राक्षसीतु रजोवर्षं राजपुत्रे ववर्ष सा॥48॥

पुनर्म्मायाविनीं दृष्ट्वा शिलाजालाभिवर्षिणीम्।
चकर्त्तास्याः करौ घोरौ पत्रिभिः पत्रिकेतनः॥49॥

सौमित्रिणा विवृक्णोष्ठनासिका कामरूपिणी।
अन्तर्हिता साध्वहिता शस्त्रवृष्टिमवाकिरत्॥50॥

मुनिरूचे तदा रामं वनितावधलज्जितम्।
वत्स सज्जनकृत्येयं हन्यतांहन्यतामिति॥51॥

चक्रवत् परिवृत्तां तां चक्रभृत् प्रहसन्निव।
अप्रयासः क्षणेनैव चकार शरपञ्जरे॥52॥

तामापतन्तीमवलोक्य पुंसां स्वधर्म्ममार्ग्गं भगवान् विधित्सुः।
उरःकवाटं खलु ताटकायाः स्वपाटवात् पाटितवाञ्छरेण॥53॥

जयजयजगताम्पते नमस्ते भवतु जयाङ्कुर एष कल्पवृक्षः।
इति वदद्भिनन्दि नाकिवृन्दं कुसुमकुलं प्रववर्ष राममौलौ॥54॥

इति श्रीनारायणपण्डिताचार्य्यविरचिते रामाङ्के सङ्ग्रहरामायणे बालकाण्डे चतुर्थ्तः सर्ग्गः ॥1–4–54॥

[अदितः श्लोकाः 147+54=195]

## पञ्चमः सर्गः ॥1–5–54॥

सानुजः स जगन्नाथो मानितो मुनिना भृषम्।
उषीतस्तत्र तां रात्रिं प्रभाते नियमं व्यधात्॥1॥

ऋषी रहसि रामाय ददावस्त्राणि सर्वशः।
वैष्णवं ब्राह्ममस्त्रं च शैवाग्नेयादिकानि च॥2॥

अपि संहाररूपाणि जृम्भकास्त्राण्युपादिशत्।
स्वकीयकर्त्तव्यतया सर्वज्ञाय जगद्गुरुते॥3॥

| |
|---|
| ब्रह्मादयो ह्यस्त्ररूपाः परिवार्य्याऽर्घ्यसम्मतम्।<br>प्रोचुः प्राञ्जलयः स्वामिन् किङ्करास्ते वयं त्विति॥4॥ |
| सौमित्रिरप्यमित्रच्छिद् विश्वामित्रादवाप्तवान्।<br>समस्तानि महास्त्राणि ब्राह्मादीनि महामनाः॥5॥ |
|ताननुज्ञाप्य काकुत्स्थो गच्छन् पप्रच्छ सर्ववित्।<br>पश्यन्नाश्रममारात् स कोऽयं देश इति द्विजम्॥6॥ |
| तमब्रवीत् गाधिसुतस्तातायं परमाश्रमः।<br>अधिष्ठितः पुरा साक्षात् विष्णुना प्रभविष्णुना॥7॥ |
| बहवोऽत्र तपस्यन्तः सन्तः सिद्धत्वमाययुः।<br>तस्मात् सिद्धाश्रमो नाम सिद्धेर्दाता ह्यधोक्षजः॥8॥ |
| बलेर्बलेन सन्त्रस्तैर्दैवैरत्रार्त्थितो हरिः।<br>काश्यपेनापि तपसा ततोऽऽदित्याः सुतोऽभवत्॥9॥ |
| वामनो वामनेत्रोऽसौ वाम एवामरद्विषाम्।<br>अयाचत बलेस्त्रीणि पदानि किल लीलया॥10॥ |
| दत्तमात्रे बलीन्द्रेण भूतळे त्रिपदाह्वये।<br>अणोरणीयान्महतो महीयान् भगवानभूत्॥11॥ |
| तस्य त्रिविक्रमस्यायमाश्रमश्चित्रविक्रमः।<br>वयं चान्ये च मुनयो वसामोऽत्र महामते॥12॥ |
| इत्यालपन्तः स्वालापांस्ते तमाश्रममाविशन्।<br>उत्सवो मुनिनेत्राणि भास्करोप्यब्धिमाविशत्॥13॥ |

| |
|---|
| सप्तर्षिभिः समेतोऽथ षडहैः परिकल्पितम्।<br>कौशिकः कोसलेन्द्रस्य यज्ञमारभताऽज्ञया॥14॥ |
| ततः षष्ठेऽह्नि भूयिष्ठे सम्प्रवृत्ते क्रतूत्तमे।<br>जज्वाल वेदिः सकला हाहाकारो महानभूत्॥15॥ |
| आकर्ण्यर्खे कलकलं दृष्ट्वा धृष्टौ च राक्षसौ।<br>उद्यच्छ लक्ष्मणेत्युक्त्वा चापमादत्त राघवः॥16॥ |
| न प्रादूषयतां यावत् तौ शोणितवपाद्रवैः।<br>यज्ञं यज्ञेश्वरस्तावत् घोरं शरममुञ्चत॥17॥ |
| राममुक्तेषुवीर्य्येण विद्रुत्य शतयोजनम्।<br>मारितोऽस्मीति मारीचो ममज्ज लवणार्ण्णवे॥18॥ |
| ज्वलनज्वालमादाय स पुनः सायकान्तरम्।<br>सुबाहुं च महाबाहुर्न्निन्ये यमनिकेतनम्॥19॥ |
| पुनश्चापातयद् बाणैः शिरांसि पिशिताशिनाम्।<br>तालानामिव पक्वानि रामः केचित् पराद्रवन्॥20॥ |
| द्विज उद्वास्य यजनं द्विजमण्डलमण्डितः।<br>प्रशशंस भृशं राममाशीर्भिरभिपूरयन्॥21॥ |
| तस्यां रात्र्यां व्यतीतायां मुनीन्द्रो मुनिसंसदि।<br>सानुजं प्रत्युवाचेदं मधुरं मधुसूदनम्॥22॥ |
| स्वयंवरो वरो राम जानक्या भुवि घोष्यते।<br>महोत्सवोत्सुकाः सर्वे विदेहान् यान्त्यहो जनाः॥23॥ |

| |
|---|
| तामिच्छन्तो हि गच्छन्ति राजानो राजनन्दन।<br>यास्यामो वयमप्यत्र द्रक्ष्यामस्तं महोत्सवम्॥24॥ |
| एवमुक्त्वा मुनिवरो मुनिभिः परिवारितः।<br>सरामलक्ष्मणः प्रायादुत्तरां दिशमुत्तमाम्॥25॥ |
| नद्राजस्य शोणस्य प्राप्य प्रान्तं महामुनिः।<br>उवास तत्र तां रात्रिं सह शिष्यैः सराघवः॥26॥ |
| पुरा कुशिकपुत्त्राणां देशांस्तानवलोकयन्।<br>कथां स कथनीयानां कथयामास तापसः॥27॥ |
| कुशानाभसुताद् भूपात् कुशपौत्त्रान्महाबलात्।<br>गाधिनाम्नो निजं जन्म रामायाऽऽह स्म कौशिकः॥28॥ |
| प्रातिष्ठन्त ततः प्रातर्ब्राह्मणाराधवान्विताः।<br>अह्नाय जाह्नवीं प्राप्ता मध्याह्ने विश्रमं ययुः॥29॥ |
| सानुजस्तत्र काकुत्स्थो हविर्भुक्त्वाऽमृतोपमम्।<br>जानंश्च पप्रच्छ मुनिं विज्ञानाय सतां विभुः॥30॥ |
| इयं गङ्गा कुतो जाता गां जगाम कथं पुनः।<br>राघवेणेत्यभिहितो हितायोचे सतामृषिः॥31॥ |
| अभूतामद्भुतगुणे उभे हिमवतः सुते।<br>गङ्गाऽगमद् द्युसिन्धुत्वमुमा गिरिशदारताम्॥32॥ |
| शिवस्यशिवया सार्द्धं रतियोगोऽन्ववर्त्तत।<br>दिव्यवर्षसहस्रं च नैकत्रापि पराजयः॥33॥ |

| |
|---|
| तद्वीर्य्यभीरुभिर्द्देवैः सुरते विहते हरः।<br>विससर्ज्ज निजं वीर्य्यं जाह्नवीवह्निभूमिषु॥34॥ |
| सर्वैरधार्य्यं तद्वीर्य्यं सम्भूतं भूतिदं सताम्।<br>श्रीमान् कुमारः स्कन्दोऽभूच्छिवयोर्न्नन्दनः प्रियः॥35॥ |
| तं कार्त्तिकेयमाग्नेयं गाङ्गेयं च प्रचक्षते।<br>सेनापतिं सुरपतिर्य्यं कृत्वा न्यहनद् रिपून्॥36॥ |
| वासुदेवप्रसादाय शिवाभ्यां तपसि स्थितम्।<br>एवंविधा महादेवी गङ्गावतरणं शृणु॥37॥ |
| पुरा पादोदकं गङ्गा चक्रिणो विक्रमत्रये।<br>कुतश्चित् कारणाज्जाता गिरेर्भूयो दिवं गता॥38॥ |
| भूपोऽभूत् सगरो नाम नारायणपरायणः।<br>पूर्वजो भवतां पूर्वं तपस्तेपे सुतेच्छया॥39॥ |
| एकस्यां तस्य पुत्रोऽभूदेको वंश्योऽसमञ्जसः।<br>अपरस्यां पराक्रान्तं पुत्त्रषष्टिसहस्त्रकम्॥40॥ |
| स योगी सङ्गसंविग्नो नृशंसत्वं प्रकाशयन्।<br>एकः पुत्त्रो जादपुत्त्रः पित्रा त्यक्तोऽगमद् वनम्॥41॥ |
| अदीक्षताश्वमेधेन सगरः स कदाचन।<br>शतक्रतुरदृश्योऽस्य मेध्यं हयमपाहरत्॥42॥ |
| मेध्यमश्वमभीप्सन्तः सागरा अखनन् भुवम्।<br>आ समुद्रादहो तस्मात् सागरः सागरोऽभवत्॥43॥ |

| |
|---|
| कपिलाख्यं परञ्ज्योतिरश्वचोरोऽयमित्यमी।<br>अभिपेतुर्जिघांसन्तः पतङ्गाइव पावकम्॥44॥ |
| वासुदेवस्य देवस्य लोचनोन्मीलनानलः।<br>अदहत् तान्न तच्चित्रं सर्वसंहारिणो हरेः॥45॥ |
| अश्वन्वेषी गतः पार्श्वमंशुमानासमञ्जसिः।<br>ननाम तस्मै नाथाय क्षम्यतां भगवन्निति॥46॥ |
| अनुग्रहादनुग्रां गां करुणामृतवर्षिणीम्।<br>ऊचे देवो हयस्तात यज्ञियो नीयतामिति॥47॥ |
| आश्वानीय कुमारोऽश्वं पितामहमखं महान्।<br>साधयामास शान्तात्मा शमी हि स्यात् पराक्रमी॥48॥ |
| स्वर्ग्गमार्ग्गं गमयितुं ब्रह्मदण्डहतान् पितृन्।<br>स द्विजेन्द्राज्ञया तेपे तपो गङ्गावतारणम्॥49॥ |
| कालधर्म्मं गते तस्मिन्नकृतार्थे नरेश्वरे।<br>तत्सुते च दिलीपाख्ये तस्थौ तपसि तत्सुतः॥50॥ |
| प्रसादाद् ब्रह्मणो गङ्गां प्राप्य राजा भगीरथः।<br>तस्याः पतन्त्या भर्त्तारं त्रिलोक्यां नाभ्यपद्यत॥51॥ |
| विष्णुपद्या धृतौ योग्यं वैष्णवाग्रेसरं हरम्।<br>तोषयित्वैव तपसा तामवातारयन्नदीम्॥52॥ |
| तां हरागौरीमतिचित्रयात्रां जह्नोश्च कन्यात्वमुपागतां सः।<br>नीत्वा तदम्भःपरषिक्तदेहं निनाय नाकं निजतातजातम्॥53॥ |

हरिचरणसरोजसङ्गिनीयं हरति महच्च मलं न चित्रमेतत्।
श्रवणमननकीर्त्तनानि विष्णोः परमपदाय मनोभिराम राम॥ 54॥

इति श्रीनारायणपण्डिताचार्य्यविरचिते रामाङ्के सङ्ग्रहरामायणे बालकाण्डे पञ्चमः सर्गः ॥1–5–54॥ [आदितः श्लोकाः 195+54=249]

## षष्ठः सर्गः ॥1–6–54॥

इत्थं कथासङ्कथनैः पुण्यश्लोकानुवर्त्तिनाम्।
क्षणदाऽभूत् क्षणसमा सरामाणां द्विजन्मनाम्॥ 1॥

नानामुनियुतौ नावाकोसलेन्द्रौ सकौशिकौ।
उत्तरं तीरमुद्दिश्यतेरतुः सुरनिम्नगाम्॥ 2॥

वैशालीं नाम नगरीं विशालेन पुरा कृताम्।
चारुशालां विशालां च विविशुस्ते महोदयाम्॥ 3॥

विशालस्य नृपस्याऽऽदिं राघवायाभ्यधान्मुनिः।
तस्य वंशं च यद्वंश्यैर्वैशाली शुशुभे पुरी॥ 4॥

ममन्थुरम्बुधिं दौग्धं पूर्वं सर्वे सुरासुराः।
तत्राऽसीन्मन्दरो मन्था नेत्रं नेत्रश्रुतीश्वरः॥ 5॥

सहस्रहस्तो भगवान् स्थिरीचक्रेऽद्रिमुद्धतम्।
अधस्तादपि कच्छन्तं कच्छपः करुणाकरः॥ 6॥

सुरासुरेषु श्रान्तेषु सङ्गृह्याहिमिहाजितः।
मन्दरं स ममन्थाथ चलत्कङ्कणकुण्डलः॥ 7॥

| |
|---|
| चन्द्रेन्दिरादयो जाताः सरसोऽप्सरसां गणः।<br>हरिर्धन्वन्तरिस्तत्र सुधाकलशवानुदैत्॥8॥ |
| अमृतं हरतो मोहादसुरानसुरान्तकः।<br>मोहयन् महिळारूपी हृत्वा स्वेभ्यो ददौ सुधाम्॥9॥ |
| पुनः सुरासुररणे हतपुत्रा दितिः पतिम्।<br>विलोभ्य गर्भं लेभे यं तं चकर्त च वज्रभृत्॥10॥ |
| मा रोदीरिति सोऽवादीद् यद्गर्भदळनाद्धरिः।<br>तस्मात् ते मरुतो नाम महेन्द्रस्याभवन् प्रियाः॥11॥ |
| उत्तमश्लोकभक्तानामुत्तमाः स्युर्हि सम्पदः।<br>अन्येषामन्यथा दृष्टा दृष्टान्तास्तत्रहीदृशाः॥12॥ |
| तासामाप्सरसां मद्ध्ये रम्यामाहुरलम्बुसाम्।<br>तस्यामयं विशालोऽभूदिक्ष्वाकोस्तव पूर्वजात्॥13॥ |
| इत्थमालपतो दृष्ट्वा प्रविष्टान् पुरुषर्षभान्।<br>सुमतिर्म्मतिमान् पुर्य्यां वैशालिस्तानपूजयत्॥14॥ |
| विजानन् विप्रवचनाद् राजा तौ रामलक्ष्मणौ।<br>अलाळयज्जगल्लाल्यौ भूयो भुवनसुन्दरौ॥15॥ |
| निर्वर्त्य शर्वरीं तत्र प्रभाते निर्ग्गतः पुरात्।<br>मिथिलोपवनं मन्दपवनं प्राप राघवः॥16॥ |
| मिथिलोपवनप्रान्तेदर्शयन्नाश्रमान्तरम्।<br>गाधिसूनुरुवाचेदं मधुरं मधुसूदनम्॥17॥ |

| |
|---|
| अतिरिक्तं तपो हर्त्तुं गौतमस्याऽऽश्रमे त्विह।<br>सुरकार्य्यं सुरपतिः कुर्वन् भार्य्यां समस्पृशत्॥18॥ |
| ऋषिराश्रममाविश्य तज्ज्ञात्वा कुपितोऽशपत्।<br>विफलः स्यादुपपतिरुपला भव पुंश्चलि॥19॥ |
| रामावलोकनाद् रामा भवेति च कृपाकरः।<br>शापमोक्षं स्वजायायै सोऽहल्यायै प्रदत्तवान्॥20॥ |
| पितृदेवाः सुरेन्द्राय ददुरुत्कृत्य योगतः।<br>निजमेषस्य वृषणं स मेषवृषणोऽभवत्॥21॥ |
| महेन्द्रस्य मनःशल्यं त्वद्भक्तस्य समुद्दर।<br>करुणां कुरु कल्याण्यां भवान् हि करुणाकरः॥22॥ |
| कौशिकेनैवमुदितो मुदितो गत आश्रमम्।<br>प्रैक्षत प्रेक्षणीयेन तामपाङ्गेन शार्ङ्गभृत्॥23॥ |
| सा तद्दर्शनमात्रेण कान्ता कान्तप्रिया बभौ।<br>न तच्चित्रं हरौ विश्वं यद्भ्रूविभ्रमसम्भवम्॥24॥ |
| उदारचरितं रामं सदारः पर्य्यपूजयत्।<br>गौतमो भक्तिभरितो विश्वामित्रं च मानयम्॥25॥ |
| ततः प्रागुत्तरां प्राप्तो दिशं देशे विशङ्कटे।<br>यज्ञवाटं स यज्ञेशो जनकस्य समैक्षत॥26॥ |
| जनतापरिपूर्णस्य यज्ञवाटस्य राघवः।<br>नातिदूरे विविक्ते स्म स्थल आस्ते सकौशिकः॥27॥ |

| |
|---|
| अपूर्वपुरुषोपेतं विश्वामित्रमुपागतम्।<br>जनकोऽभिययौ श्रुत्वा शतानन्दादिभिर्युतः ॥28॥ |
| मखोत्सवमुपायाता नानाजनपदा जनाः।<br>द्रष्टुमभ्यापतन् रामं सस्त्रीबालाश्च नागराः ॥29॥ |
| परिपूज्य यथान्यायं परिवारयुतं मुनिम्।<br>लोकनाथं विलोक्येदं वाक्यमूचे मुनिं नृपः ॥30॥ |
| श्रीमान् मरतकश्यामः पद्मपत्रनिभेक्षणः।<br>नवयौवनसम्पन्नः क एष पुरुषर्षभः ॥31॥ |
| सिंहस्कन्धो महोरस्कः पूर्णचन्द्रनिभाननः।<br>गम्भीरनाभिः को न्वेष कम्बुग्रीवो महाभुजः ॥32॥ |
| अविस्मितः स्मितमुखो गजराजगतिः कविः।<br>मुने कोऽयं विनयवानमितार्त्थमितं वदन्॥33॥ |
| अङ्गनानामनङ्गोऽयं त्वादृशानां तु किङ्करः।<br>वैरिणां केवलं कालो योगिनां भगवान् हरिः ॥34॥ |
| सुकुमारः कुमारोऽयं जनानां नयनोत्सवः।<br>पादपल्लवयोरस्य भूस्पर्शं न सहामहे॥35॥ |
| अस्य पार्श्वेऽपरः कोऽयमस्य सादृश्यवान् स्थितः।<br>प्रतिबिम्बवदन्वेति बिम्बोष्ठो यमिमं सदा॥36॥ |
| पृच्छति स्वच्छहृदये राजन्येवं जनान्तरे।<br>किञ्चित् स्मित्वाऽवदद् वाणीं प्रवीणो गाधिनन्दनः ॥37॥ |

| |
|---|
| अयं दशरथस्याङ्ग नन्दनः पुरुषोत्तमः।<br>चिकीर्षुः सुरकार्य्याणि रामो नाम मनोरमः॥38॥ |
| अयमस्यानुजः प्रेष्ठो लक्ष्मणः शुभलक्षणः।<br>अयोध्याया मयाऽऽनीतावेतौ सिद्धाश्रमं प्रति॥39॥ |
| रक्षो निहत्य यज्ञं मे लीलयाऽयमपीपलत्।<br>अपाङ्गेन मुनेः शापादहल्यामप्यमूमुचत्॥40॥ |
| धन्विनामग्रणीरेष धनुस्तव दिदृक्षते।<br>धानुष्कहाटकानां तन्निकशाश्मायितं किल॥41॥ |
| समस्तगुणसम्पन्नमेनं जामातरं कुरु।<br>वीर क्षीराम्बुधिरिव पुराणपुरुषं पुरा॥42॥ |
| गामित्थं गाधिपुत्रस्य श्रुत्वा गौतमनन्दनः।<br>शतानन्दो महानन्दो रघुनन्दनमब्रवीत्॥43॥ |
| राम देव जगन्नाथ स्वागतं सानुजस्यते।<br>दिष्ट्या मे जीविता माता भवता करुणावता॥44॥ |
| मन्ये धन्यमिमं लोके विश्वामित्रं महामुनिम्।<br>अन्तेवासिवदन्वेति यद् भवान् पुरुषोत्तमः॥45॥ |
| एष राजा पुरा राम गाधिसूनुर्म्महाबलः।<br>वसिष्ठस्य वरिष्ठस्य गां कामदुहमाहरत्॥46॥ |
| शबला सा शकम्लेच्छयवनैर्वल्लबादिभिः।<br>आत्मनोऽवयवोद्भूतैर्जघान नृपतेर्बलम्॥47॥ |

| |
|---|
| नरदेवो महादेवं प्रसाद्यास्त्राण्यवाप्तवान्।<br>सब्रह्मास्त्राणि सर्वाणि वसिष्ठं तैर्य्युयोध सः ॥48॥ |
| ब्रह्मजो ब्रह्मदण्डेन वैष्णवेन तमभ्ययात्।<br>अग्रसत् तानि सोऽस्त्राणि परब्रह्मप्रसादतः ॥49॥ |
| वैष्णवेनैष तपसा समर्थो गाधिनन्दनः।<br>चण्डालितं च वासिष्ठैस्त्रिशङ्कुं स्वर्ग्गमानयत्॥50॥ |
| मखे क्लृप्तम् पशुत्वेन शुनःशेपमपालयत्।<br>पुनश्चोरुतपस्तेपे वासुदेवमसौ स्मरन्॥51॥ |
| मेनकायां तु कामेन रम्भायं क्रोधतोऽप्यसौ।<br>दैवेच्छया तपोनाशं प्राप्य तेपे पुनस्तपः ॥52॥ |
| निराहारो निरुच्छ्वासो निरास्पन्दो निरामयः।<br>वर्षायुतान्यनेकानि तपश्चक्रेऽथ चक्रिणे॥53॥ |
| राजर्षित्वमृषित्वं च महर्षित्वं महाव्रतैः।<br>ब्रह्मर्षिता च ब्रह्माद्यैः क्रमेणास्यान्वमोद्यत॥54॥ |
| वासुदेवप्रसादोऽयमीदृशो यस्य विद्यते।<br>ब्रह्मण्यस्य तवैतस्मिन् प्रणयो नातिविस्मयः ॥55॥ |
| गौतमात्मजगिरं स राघवः शुश्रुवानिति ददर्श कौशिकम्।<br>तत्रतत्र हि कथाः श्रुणोत्यसौ सर्वविच्च जनतां विडम्बयन्॥56॥ |
| सज्ज्ञानरूपे जगदेकदीपे नाज्ञानलेशोऽपि घटेत रामे।<br>प्रकाशमूर्त्तावहिमप्रकाशे न हि क्वचिद् ध्वान्तलवोऽपि लक्ष्यः ॥57॥ |

इति श्रीनारायणपण्डिताचार्यविरचिते रामाङ्के सङ्ग्रहरामायणे बालकाण्डे षष्ठः सर्गः ॥1–6–54॥

[आदितः श्लोकाः 249+57=306]

## सप्तमसर्गः ॥1-7-35॥

ततः परस्मिन् दिवसे स राजा स राघवं कौशिकमात्मशालाम्।
आनीय नत्वा परिपूर्णकामः सप्रश्रयं वाचमुवाच वाग्ग्मी॥1॥

यागाय गां गाधिज कर्षतो मे बभूव कन्या भुवनेषु धन्या।
सीराग्रमार्ग्गादुत एव सीता महानिधिश्रीरिव निर्द्धनस्य॥2॥

पूर्णा यदा चन्द्रकलेव बाला तदा चिरं मां प्रविवेश चिन्ता।
इमामयोग्याय कथं नु दद्यां त्रयीमिवान्त्याय कथञ्चनेति॥3॥

इदं धनूरत्नमलाभि शम्भोः प्रसादितान्नस्तपसा चिरेण ।
विना पिनाकास्त्रमचालनीयं विना यथा भूतळमादिकोलम्॥4॥

दक्षाध्वरे पूर्वमनेन शर्वो न प्राप्य भागं त्रिदशांश्चकर्त्त।
प्रसादितः क्षिप्रतरप्रसादः स्वाङ्गानि तेषामथ सन्दधे च॥5॥

आरोपयेच्चापमिदं य एव तस्मै प्रदास्यामि सुतां ममेति।
प्रतिश्रवो मे विससार लोके सहस्ररश्मेरिव रश्मिराशिः॥6॥

विराजमाना इह राजपुत्राः सयक्षरक्षःप्रवराश्च दैत्याः।
स्वयम्बरं वीरवरा उपायन् पद्माकरं हंसवराइवाऽऽशु॥7॥

आलोक्य केचिद्धनुराप्य केचिदन्ये परिस्पृश्य परे प्रचाल्य।
वीरा अवीरत्वमवाप्य याताः केचिद् गतांस्तानवलोक्य भीताः॥8॥

| |
|---|
| उद्धर्त्तुकामा धनुरुद्धता ये स्विन्नाः क्षितौ ते पतिता समूर्च्छाः।<br>दशाननाद्याश्च दशामगच्छन् शोच्यामशोच्याः किमुतान्यलोकः॥9॥ |
| शठा हठादप्यपहर्त्तुकामाः कन्यां न शेकुर्बलिनोऽपि मत्ताः।<br>संवत्सरं संयति माऽभियाता बलं विरिञ्चस्य वरो वरो मे॥10॥ |
| आरोपयेद् राघव एव चापमन्वेतु सीता पतिमेनमेव।<br>सम्पूर्णचन्द्रं प्रति चन्द्रिकेव प्रभा प्रभानाथमिवानुरूपा॥11॥ |
| इति ब्रुवाणं नरनाथमेनमुदाहरद् विप्र उदारचेताः।<br>शरासनं वैरिनिरासनं तदानीयतां द्रागवनीश्वरेति॥12॥ |
| राजाज्ञयाऽथाऽचकृषेऽष्टचक्रमञ्जूषयाऽयःकृतयाऽभिगुप्तम्।<br>वीरोत्तमैः पञ्चसहस्रसङ्ख्यैर्वराच्छिवस्यैव वरं शिवास्त्रम्॥13॥ |
| मुनिर्म्मुकुन्दं निजगाद वत्स रामेदमापूरय चापरत्नम्।<br>इतीरितोऽयं नृपतेः कुमारो ब्रुवाण ओमित्युदतिष्ठदीशः॥14॥ |
| रामं चलत्कुण्डलचारुगण्डं लावण्यसिन्धुं धनुराव्रजन्तम्।<br>लोकेशमालोक्य विलासनीनामन्योन्यमासीदिति तत्र वार्त्ता॥15॥ |
| धन्या हि सा कोसलराजकन्या या सूनुमेनं सुषुवे सुवेषम्।<br>सा राघवो राजवरोऽपि धन्यस्तातेति यं तापहरोऽयमाह॥16॥ |
| सञ्चित्य सौन्दर्य्यरसान् समस्तानिमं विधाता व्यधितेति मित्थ्या।<br>अकृत्रिमं प्रादुरभूद् भुवीदमाश्चर्य्यरत्नं जनहर्षणाय॥17॥ |
| सीता च सीरध्वजकन्यकेयं सामान्यनारी न हि लोकमान्या।<br>यागप्रयोगे भुव आविरासीद् या देवमाया जलधेरिव श्रीः॥18॥ |

| |
|---|
| सीतैव रामस्य घटेत रामा तस्याश्च योग्यो ननु राम एव।<br>यथेन्दिरैवास्ति मुकुन्दयोग्या मुकुन्द एवोचित इन्दिरायाः॥19॥ |
| सीतापतित्वं न परीक्षणीयं रामस्य राज्ञा धनुरानमेन।<br>न हि प्रदीपेन परीक्षणीयं प्रभाकरस्य प्रभया युतत्वम्॥20॥ |
| नृपात्मजोऽयं जनकात्मजाया गृह्णातु पाणिं रमणो रमण्याः।<br>नारायणः साध्वनुमोदतां तच्छपामहे नः सुकृतेन सख्यः॥21॥ |
| प्रजल्पितानीति पुराङ्गनानामाकर्ण्णयन् कर्ण्णसुखानि पुंसाम्।<br>अविस्मितः सुस्मित एत्य रामो वामेन दोष्णा धनुरुज्जहार॥22॥ |
| नृणां सहस्रे स्वमवेक्षमाणे सस्वस्तिवादे नृपतौ मुनौ च।<br>निजानुजे  स्मेरमुखे सलीलामारोप्य चापं समपूरयत् सः॥23॥ |
| तालप्रमाणं परिकृष्यमाणं मध्ये महाचापमभज्यताऽऽशु।<br>विश्वाधिनाथेन विनैव यत्नं यथेन्द्रनागेन नवेक्षुदण्डः॥24॥ |
| जगत्त्रये दूतइवातिवेगी ध्वनिर्धनुर्भङ्गभवः ससार।<br>रामेण सीतोपगतेति वार्त्तामुद्घोषयन् व्यक्तमिवातिरम्याम्॥25॥ |
| छित्त्वैवमच्छेद्यमवश्यमन्यैस्तत् कार्म्मुकश्रेष्ठमुदारकर्म्मा।<br>सलक्ष्मणः शोभनलक्षणोऽयं तस्थौ विलोक्यास्य मुनेर्म्मुखेन्दुम्॥26॥ |
| अथाऽविरासीन्नरदेवकन्याच्छलेन देवी स्वयमिन्दिरैव।<br>अन्तःपुरान्निर्ग्गतवत्युदारा सा वेदगर्भादिव वेदवाणी॥27॥ |
| मञ्जीरमञ्जुध्वनिपूरिताशा गतिश्रिया निर्ज्जितराजहंसी।<br>पदेपदे रम्यरसा पदाभ्यां सीताऽभिरामं शनकैर्ज्जगाम॥28॥ |

| |
|---|
| पुनरन्निरीक्ष्यापि पुनर्न्नवा सा कान्त्या हसन्तीव विनाऽपि हासम्।<br>दृष्ट्याऽऽलपन्तीव विनाऽभिलापं महोत्सवोऽभूज्जनलोचनानाम्॥ 29॥ |
| औदार्य्यसौन्दर्य्यविलासपूर्वान् सर्वान् गुणान् कः कथयेत देव्याः।<br>यान् प्रब्रुवाणश्चतुराननोऽपि कौतूहलेनाचतुराननोऽभूत्॥ 30॥ |
| लज्जानदीं क्षिप्रतरप्रवाहां न्यक्कुर्वती भक्तिमहार्णवोघैः।<br>शनैरपाङ्गेन सुमङ्गलाङ्गी ददर्श देवी जगदेकनाथम्॥ 31॥ |
| प्रसन्नवक्त्रं सरसीरुहाक्षं श्यामं सुगन्धारुणचन्दनाक्तम्।<br>शूरं किशोरं शरणं प्रजानां कान्तं विलोक्याऽभिननन्द कान्ता॥ 32॥ |
| सीताऽथ रामे नवचन्दनाद्रां हेमारविन्दस्रजमामुमोच।<br>रामोऽपि देव्यां प्रणयामृताद्रां दृष्टिं मनोज्ञां निदधे तदैव॥ |
| शम्भुशङ्करपुरन्दरादयः सुन्दरीयुतमवेक्ष्य सुन्दरम्।<br>आत्मनां जनकमादिपुरुषं तुष्टुवुश्च तुतुषुश्च सानुगाः॥ 34॥ |
| गन्धर्वगीतरुतमप्सरसां च नृत्तं |
| देवीभिरर्प्पितमुरुद्युतरुप्रसूनम्।<br>वाद्यस्वनं च निजपूजनमाकलय्य |
| रामश्च रामरमणी चमुदं दधाते॥ 35॥ |
| इति श्रीमन्नारायणपण्डिताचार्य्यविरचिते रामाङ्के सङ्ग्रहरामायणे बालकाण्डे सप्तमः सर्गः॥ 1-7-35॥<br>आदितः श्लोकाः [305+35=341] |

## अष्टमः सर्गः ॥1-8- 81॥

जनकं प्रति रामस्य जनकोऽथ जनेश्वरः।
दूतान् प्रस्थापयामास विश्वामित्रानुमोदितः॥1॥

प्राप्य दूतास्त्रिरात्रान्ते राघवेन्द्रनिवेशनम्।
संश्रान्ता विश्रमं जग्मुर्हंसाः प्राप्येव मानसम्॥2॥

अथोचुस्ते दशरथं मन्त्रिभिः परिवारितम्।
अञ्जसाऽञ्जलिमाबध्य विदेहेश विवक्षितम्॥3॥

उर्व्यां सर्वे समासाद्य चापं वीरा वृथा गताः।
रामो राजीवनयनः कोदण्डं समखण्डयत्॥4॥

सीता चात्रानुरक्ताऽऽसीच्चिन्त्यतामित उत्तरम्।
विश्वामित्रो भवन्मित्रं भवन्तं सम्प्रतीक्षते॥5॥

विवाहाय समायाहि नन्दनस्य सबान्धवः।
इति दूतोदितं श्रुत्वा परितुष्यन्नजात्मजः॥6॥

गमनाय मतिं चक्रे मन्त्रिभिः सह मन्त्रयन्।
तस्यां रात्र्यां व्यतीतायां मतिमान् मानवेश्वरः।
प्रागेव प्रेषयामास दूतान् सह महाधनैः॥7॥

युयोज यानं त्वरितः सुमन्त्रो राघवाज्ञया।
पुरो निर्य्यापयामास चमूं च चतुरङ्गिणीम्॥8॥

मन्त्रिभिः सह विप्रैश्च सभार्य्यः सविधातृजः।
रथेनासौ दशरथो जगाम जनकालयम्॥9॥

| |
|---|
| प्रवेक्ष्यन्तं पुरीमाराद् भूपं दृष्ट्वाऽथ मैथिलः।<br>शतानन्दादिभिः सार्द्धं सानन्दोऽभिययौ द्रुतम्॥10॥ |
| पुरीं प्रवेश्य सम्पूज्य यथाशास्त्रं स शास्त्रवित्।<br>राघवं प्रावदद् राजा मुनीन्द्राणां च संसदि॥11॥ |
| दिष्ट्या दृष्टोऽसि राजेन्द्र दुर्ल्लभं प्रियदर्शनम्।<br>दिष्ट्या मे राघवश्रेष्ठैरभूद् बान्धवमीदृशम्॥12॥ |
| रामाय लक्ष्मणायापि प्रदास्यामि सुते मम।<br>अवसाय महायज्ञमहं सीतोर्म्मिळे ध्रुवम्॥13॥ |
| इत्युक्तो जनकेनोचे किञ्चित् स्मित्वा स राघवः।<br>प्रतिग्रहो दातृवशस्तस्मादेवं भवत्विति॥14॥ |
| सानन्दो नन्दनैः सार्धं राजा वेश्मान्तरेऽवसत्।<br>विश्वामित्रवसिष्ठाध्यैः साकं हरिकथापरैः॥15॥ |
| परेद्युर्भ्रातरं दूतैरुत्सवार्थं कुशध्वजम्।<br>वीरमिक्षुमतीतीरादानिनायाथ मैथिलः॥16॥ |
| कुलाचार्य्यः कुलीनानां कुलधर्म्मं समाचरन्।<br>सभायां सन्निधौ राज्ञां वरवंशमवर्ण्णयत्॥17॥ |
| यस्मिन्निक्ष्वाकुमान्धातृसगराः साम्बरीषकाः।<br>रघ्वजाद्याः सार्वभौमा नारायणपरायणाः॥18॥ |
| जनकश्च वधूवंशं मनीनामाज्ञयाऽवदत्।<br>यस्मिन्निमिर्द्देवरातो ह्रस्वरोमादयो नृपाः॥19॥ |

| |
|---|
| रामरामानुजाभ्यां स वाग्दानं कन्ययोर्व्यधात्।<br>विश्वामित्रवसिष्ठौ तावथ मैतिलमूचतुः॥20॥ |
| कुशध्वजस्य ते भ्रातुर्भ्राजमाने सुते उभे।<br>दातव्ये भरतायाङ्ग शत्रुघ्नाय च शोभने॥21॥ |
| ऋषीन्द्रयोर्वचः श्रुत्वा मैथिलावप्यथोचतुः।<br>अत्थ्यर्मस्माभिरेवेदं भवद्भ्यां  व्याहृतं त्विति॥22॥ |
| अथ श्वोभाविनि महे नान्दीश्राद्धानि राघवः।<br>निमन्त्र्य ब्राह्मणांश्चक्रे चक्री नः प्रीयतामिति॥23॥ |
| चतुर्णामपि पुत्राणां भूत्यै विप्रगणायसः।<br>गवां चतुःसहस्राणि ददौ सस्वर्णवाससाम्॥24॥ |
| धनैरन्नादिभिश्चायं यदा विप्रानतोषयत्।<br>युधाजिदापि तत्राऽगात् तदा भरतमातुलः॥25॥ |
| सम्बान्धवो दशरथः कृतस्वस्त्ययनो द्विजैः।<br>भूषणैर्भूषयामास पुत्रान् स्वगुणभूषणान्॥26॥ |
| यथा दशरथश्चक्रे स्वपुत्राणां महारथः।<br>भूत्यै दानादि सत्कर्म्म चक्राते मैथिलौ तथा।<br>कन्यानां साधुकृत्यानि शतानन्दमते स्थितौ॥27॥ |
| उत्तराभ्यां स उद्वाहः फल्गुनीभ्यामभूत् तदा।<br>प्राजापत्यमिदं कर्म्म यत्र शंसन्ति पण्डिताः॥28॥ |

| |
|---|
| राघवाणां चतुर्णां च विवाहोऽयं गजत्प्रियः।<br>आसीन्मुहूर्त एकस्मिन् ब्राह्मणैः स्वस्तिवादिभिः॥29॥ |
| सम्भारानथ सम्भृत्य कुलधर्म्मानुकूलतः।<br>वसिष्ठोऽग्नौ जुहावात्र विश्वामित्राभ्यनुज्ञया॥30॥ |
| चक्राङ्केन सरोजाङ्कं सीतापाणिं स्वपाणिना।<br>अरुणेनारुणं रामो जग्राह जगदीश्वरः॥31॥ |
| त्रिवारं परिणीयाऽथ सम्यक् सप्तपदानि च।<br>गमयित्वा क्रियाशेषमशेषं च समापयत्॥32॥ |
| जनकं जगतां रामं जननीमपि जानकीम्।<br>वधूवरत्वमायाताववैक्षन्त सुरोत्तमाः॥33॥ |
| रत्नैर्दीप्यमानानां विमानानामथाऽवळिः।<br>अलञ्चकार गगनं देवदेवानुगाकुला॥34॥ |
| देववाद्यान्यवाद्यन्त गीतं गन्धर्वपुङ्गवैः।<br>प्रवृष्टानि प्रसूनानि प्रनृत्तं चाप्सरोगणैः॥35॥ |
| लोकानां लोचनानन्दाः सर्वाभरणभूषिताः।<br>विचेरुः पुरि चार्वङ्ग्यो दिवि देव्य-इवोत्सवे॥36॥ |
| ऊर्म्मिळा लक्ष्मणस्याऽसीन्मालवी भरतस्य च।<br>भार्य्याऽथ श्रुतकीर्तिश्च शत्रुघ्नस्याभवच्छुभा॥37॥ |
| पुरोहितान् वसिष्ठाद्यान् वित्तैरुत्तमकल्पकैः।<br>अमानयन्महीपालो ब्राह्मणानपरानपि॥38॥ |

| |
|---|
| आपृच्छ्यातुच्छहृदयं सवसिष्ठं महीपतिम्।<br>विश्वामित्रो ययौ प्रातर्म्मुक्तः सास्रेण भूभृता॥39॥ |
| परिबर्हं प्रबर्हं हि राघवेभ्यो ददौ नृपः।<br>क्षौमाणि मणिराशींश्च कम्बळानम्बराणि च॥40॥ |
| गवां लक्षाण लक्ष्मीवान् चमूं च चतुरङ्गिणीम्।<br>नियुतं च हिरण्यानि ददौ दासीश्च मैथिलः॥41॥ |
| दक्षिणेव प्रभुं यज्ञं दामोदरमिवेन्दिर।<br>जयन्तीवर्षभं देवं सीता रामामुपागमत्॥42॥ |
| न जरा न परिस्पन्दो न मलं विमलात्मनोः।<br>अनयोः किल दम्पत्योरगण्यगुणपूर्णयोः॥43॥ |
| जगतां पितरावेतौ कमलाकमलेक्षणौ।<br>नार्थितौ किल नाकीन्द्रैरवन्यामवतेरतुः॥44॥ |
| किंवदन्तीति ववृते दम्पत्योश्च गृहेगृहे।<br>अपि त्रिलोक्यां पापघ्नी निश्रेणी मुक्तिपद्धतेः॥45॥ |
| अथानुज्ञाप्य जनकं  द्विजैः सार्द्धं बलैरपि।<br>ससूनुः सस्नुषो राजा सभार्य्यः स्वपुरं ययौ॥46॥ |
| निमित्तानि निमित्तज्ञः स निरीक्ष्य नराधिपः।<br>पदव्यां विपदाशङ्की हितमूचे पुरोहितम्॥47॥ |
| शकुनानामयं शब्दश्चित्तं दारयतीव मे।<br>प्रादक्षिण्येन कल्याणं शंसन्तीव मृगाः कथम्॥48॥ |

| |
|---|
| वाणीमाकर्ण्य भूपस्य वसिष्ठोऽविस्मितोऽब्रवीत्।<br>अस्ति नो भयमासन्नं शान्तिश्चास्य भवेदिति॥49॥ |
| ततः प्रादुरभूद् भूयस्तेजसां पुञ्जमद्भुतम्।<br>प्रळयानलसङ्काशं तं दृष्ट्वोचुर्म्महर्षयः॥50॥ |
| त्रिस्सप्तकृत्वश्चक्रे यः क्षमामक्षत्रियामिमाम्।<br>स एष भगवान् रामः कस्माज्ज्वाज्वल्यतेऽधुना॥51॥ |
| कठोरेण कुठारेण वैकुण्ठः कण्ठसङ्गिना।<br>चापेन चाग्निवर्ण्णेन किं चिकीर्षुरिहाऽऽगतः॥52॥ |
| रामाग्निर्न्न दहेत् कच्चित् क्षत्रगोत्रतृणं पुनः।<br>कच्चित् त्रिलोकीं न दहेदिति तं मुनयोऽनमन्॥53॥ |
| जामदग्न्य प्रसीदेति वसिष्ठाद्यैर्द्विजोत्तमैः।<br>पूजितो राममासाद्य रामो धीरमभाषत॥54॥ |
| चापरत्ने उभे राम लब्ध्वा हरिहरौ पुरा।<br>जगत्पती जगत् ताभ्यां जिग्यतुः ससुरासुरम्॥55॥ |
| ओजोजिज्ञासया देवैः प्रार्त्थितौ प्रार्त्थितप्रदौ।<br>देवौ युद्धाय सन्नद्धौ तस्थतुस्तौ धनुर्धरौ॥56॥ |
| अहङ्कारमयं शर्वं हुङ्कारेणैव केशवः।<br>क्षणेन स्तम्भयामास गरुडः पन्नगं यथा॥57॥ |
| विजिष्णुं विष्णुममरा ब्रह्माद्यास्तमथास्तुवन्।<br>विश्वं यन्नियतं तस्य नेदं चित्रं हरेरिति॥58॥ |

| |
|---|
| भवता ननु तद् भग्नं शङ्करस्य शरासनम्।<br>तेन ते वितता कीर्ती रामोऽद्वन्द्वः पुमानिति॥59॥ |
| इदं तद् वष्णवं चापं राघवाऽरोपयेर्य्यदि।<br>मम तुल्यबलो वीरः परमः पुरुषो भवान्॥60॥ |
| इति गम्भीरवाचं तं भार्ग्गवं प्रेक्ष्य भूपतिः।<br>सबाष्पराद्गदो दीनः प्रणिपत्येदमब्रवीत्॥61॥ |
| अरागाद्वेषदोषो हि देवो नारायणो भवान्।<br>रेणुकायां मुनेर्ज्जातो भूभारपरिभूतये॥62॥ |
| भक्तवत्सल भक्ताय मह्यं प्रवयसे प्रभो।<br>न्यस्तशस्त्रेण भवता पुत्रभिक्षा प्रदीयताम्॥63॥ |
| प्रयाचमानमेवं तं प्रोवाच भृगुनन्दनः।<br>पुत्रास्त्रयस्ते रामो मे प्रतिवीरो भवेदिति॥64॥ |
| राम राम गृहाणेति रामो रामेण चोदितः।<br>ब्रह्मन् स्यादेवमित्युक्त्वा चापं जग्राह सस्मितः॥65॥ |
| सज्योतिर्म्मण्डलं चापं सज्यं कृत्वा हसन्नयम्।<br>राघवो लाघवेनैव क्षणाद् बाणं च सन्दधे॥66॥ |
| देवोपदेवमुनयस्तयोराश्चर्य्यचर्य्ययोः।<br>क्रीडां दिदृक्षवः प्राप्ता अलञ्चक्रुर्न्नभस्तळम्॥67॥ |
| परब्रह्मस्वरूपत्वान्न शरेणेश शीर्य्यसे।<br>इत्युक्त्वाऽऽकृष्टबाणं तं राघवं भार्ग्गवोऽब्रवीत्॥68॥ |

| |
|---|
| कारणान्तरतो राम स्वेच्छयाऽन्तः कृतं मया।<br>तपोमयं लोकमयं महेष्वास हरासुरम्॥ 69॥ |
| वदत्येवं जामदग्न्ये स शरो राघवच्युतः।<br>असुरं तरसा भस्मीचकारातुलनामकम्॥ 70॥ |
| भार्ग्गवो भगवानूचे राम दाशरथेऽधुना।<br>साक्षान्नारायणोऽसीति सम्यग् ज्ञातं जनैरिति॥ 71॥ |
| प्रदक्षिणीकृत्य मुदा दक्षिणं लक्ष्मणाग्रजम्।<br>तेनैकीभूय भूयश्च माहेन्द्रं भार्ग्गवो ययौ॥ 72॥ |
| लीलेयं रामयोः साक्षाद् विश्वरूपस्वरूपयोः।<br>न हि भेदोऽनयोः कश्चिदित्युक्त्वा स्वर्य्ययुः सुराः॥ 73॥ |
| शुचा नतं मुखं राज्ञः प्रोत्फुल्लं रामतेजसा।<br>नैशाम्भुना शिथिलितं भानुभासेव पञ्कजम्॥ 74॥ |
| वसिष्ठाद्यैर्म्मुनिश्रेष्ठैः स राजा परिवारितः।<br>सनन्दनो महानन्दः पुरीं प्रायाद् बलैर्य्युतः॥ 75॥ |
| अयोध्यामाप नगरीमयोध्यामरिभिर्नृपः।<br>सिक्तां पुष्पाक्षताकीर्ण्णां पताकाकेतुमालिनीम्॥ 76॥ |
| पूर्ण्णैं सुवर्ण्ण कलशैर्न्नानावाद्यैश्च वादितैः।<br>नरा नार्य्यश्चाभिययुर्वधूवरसमागमे॥ 77॥ |
| विवेशान्तः पुरं राजा पुरन्दरपुरोपमम्।<br>मङ्गल्यसूक्तं शंसद्भिर्ब्राह्मणैर्ब्राह्मणप्रियः॥ 78॥ |

रमणा रमणीभिस्ते लक्ष्मणाद्याः सुलक्षणाः।
विरेजिरे त्रयस्तत्र ज्वालाभिरिव पावकाः॥79॥

रेमेऽथ रामो रमणीमवाप्य सीतां जगन्मङ्गलमङ्गलात्मा।
श्रीरेव सीता गुणसम्पदेति सत्यौपचारी न हि यत्र वाणी॥80॥

श्वेतद्वीपे यथाऽयं विहरति रमया राजमाने विमाने।
श्रीमद्भोगीन्द्रभोगे गुणनिधिरधिकं भासमानेऽसमाने।
जम्बूद्वीपेऽत्र पुर्य्यां जनकतनयया राजयन्त्या जयन्त्या
देव्या रामोऽथ रेमे वृषभइव जगद् रञ्जयन्त्या जयन्त्या॥81॥

इति श्रीनारायणपण्डिताचार्य्यविरचिते रामाङ्के सङ्ग्रहरामायणे बालकाण्डे अष्टमः सर्गः॥1-8-81॥ [
आदितः श्लोकाः [341+81=422]

बालकाण्डं समाप्तम् ॥1-8 -422॥

## अयोध्या खाण्डम्: 2-12

### प्रथमः सर्गः : ॥2-1-32॥

रामे रमण्या सह पूर्णरूपे प्राप्तोदये चन्द्रिकयेव चन्द्रे।
समृद्धिपूरैः परिपूर्य्यमाणो रराजराजा सरितामिवेशः॥1॥

मातामहस्यौकसि कैकयस्य शत्रुघ्नयुक्ते भरते चिराय।
विद्यागणाभ्यासिनि तस्य वार्त्तां श्रुत्वा नरेन्द्रोऽधिकमाननन्द॥2॥

सङ्कीर्त्तितै रामगुणैरगण्यैर्जनैः सभावर्त्मगृहापणेषु।
पूर्णं विशालं विरराज राज्ञो हृन्मण्डलं विष्टपमण्डलं च॥3॥

| |
|---|
| सुमन्त्रपूर्वैरथ मन्त्रिमुख्यैः सम्मन्त्र्य सन्मन्त्ररतैश्च विप्रैः।<br>रामाभिषेकाय समाहरत् स सामन्तवर्य्यान् प्रकृतीश्च सर्वाः॥4॥ |
| दिवीव देवैः सह देवराजो व्योम्नीव ताराधिपतिः सतारः।<br>सभातळे स्वैः परिवारवर्ग्गैः समाबभासे सहितो महीशः॥5॥ |
| उवाच वाचं नरदेवानाथो निगृह्य वेगं स्वमनोरथस्य।<br>सुतं युवानं युवराजमेनं कुर्म्मो मतं चेद् भवतां तदेवम्॥6॥ |
| रोमोद्गमोऽङ्गे प्रमदाश्रु नेत्रे रामश्च चित्तेऽञ्जलिरास मूर्ध्नि।<br>मुखे विकासो वदने च वाणी तत् साधुसाध्वित्यखिलप्रजानाम्॥7॥ |
| पौरे जने जानपदे च तस्मिन् सहान्तपालैरधिकं विवक्षौ।<br>सपद्यभिप्रायविदः सभायां वृद्धाः समृद्धामथ गामवोचन्॥8॥ |
| महाजनोऽयं मनसा च वाचा करोति रामस्य सदाऽभिषेकम्।<br>महाजनानामधिनाथ राजन् महाभिषेकं कुरु कर्म्मणैव॥9॥ |
| नैसर्गिकैरेव गुणैरगण्यैः प्रजापते ते तनयः प्रजानाम्।<br>मनांस्युपाकर्शति सत्वभाजामयांस्ययस्कान्तइव स्वगोभिः॥10॥ |
| नारायणात्मा किल नन्दनस्ते परायणात्मा निखिलात्मनां च।<br>अमुष्य को वा गणयेद् गुणौघान् रजांसि भूमेर्ग्गणयेत् कविश्च॥11॥ |
| अणोरणीयान् महतो महीयान् गुरोर्ग्गरीयांश्च लघोर्ल्लघीयान्।<br>ईशः समस्तस्य च सत्यकामः स्वतन्त्र ऐश्वर्य्ययुतोऽयमेवम्॥12॥ |
| सशम्भुशक्राणि जगन्ति रामो धातुं विधातुं सहसा पिधातुम्।<br>भ्रूविभ्रमेणैव खलुप्रभुः स्याद् वीरस्य वीर्य्याणि हि तादृशानि॥13॥ |

| |
|---|
| न केवलं यः कुमुदं विकासं नयत्यभीक्ष्णं हि दिवो मुदं च।<br>द्विपक्षपूर्णोऽस्तकलङ्कलेशः कीर्त्तीन्दुरस्यास्यति पूर्णमिन्दुम्॥14॥ |
| भित्त्वा भुवं राजसुताच्छलेन यल्लोभतः श्रीः स्वयमेनमाप।<br>तां सर्वलोकानुपमामनन्तां रूपश्रियं त्वस्य निरूपयामः॥15॥ |
| भावीनि भूतानि भवन्ति वाऽपि समस्तवस्तूनि समं विशेषैः।<br>यो हस्तहारेन्द्रवदेव वेत्ति ज्ञाने समो नाप्यधिकोऽस्य भूम्नः॥16॥ |
| अमन्दमानन्दमनिन्दनीयं निरन्तरं यन्निजमेव भुङ्क्ते।<br>स्त्रीराज्यकोशादिषु तस्य तेन न रागरोगोपहता मनीषा॥17॥ |
| गुणान् षडेतानथ पञ्च भावांस्तिस्रः स्वशक्तीरुदयांश्च सिद्धीः।<br>अर्थान् द्वयांश्चेति बिभर्त्ति रामो वेदोदितान् नीतिपथोदितांश्च॥18॥ |
| स्वं पारमेष्ठ्यं परमेष्ठिनो यदोजः पुरारेर्विभवो बलारेः।<br>अन्येगुणाश्चान्यगता गुणानां रामस्य सर्वे प्रतिबिम्बभूताः॥19॥ |
| कामः स्वकान्तिं परिशान्तिमिन्दुः प्रभां प्रभाकृद् धनितां धनेशः।<br>क्षमां क्षमेयं रघुवंशकेतोर्दृष्ट्वा गुणान् स्वाननुशिक्षयन्ति॥20॥ |
| औदार्य्यमाधुर्य्यसुधैर्य्यशौर्य्यगाम्भीर्य्यचातुर्य्यमहार्य्यभावैः।<br>गुणैरसङ्ख्यैरपरैश्च पूर्णः सुतस्त्रिलोकीतिलकस्तवायम्॥21॥ |
| सर्वत्र सर्वानपि सर्वदाऽपि प्राप्नोति कामान् ननु सत्यकामः।<br>कामः कथं द्रुह्यति तेन जातु सीतापतिं विश्वपतिं सुतं ते॥22॥ |
| प्रियस्य हानिर्न्न कदाचिदस्य प्रियेतरस्यापि न सम्भवः स्यात्।<br>क्रोधस्ततो लक्ष्मणपूर्वजस्य पराजितः पादरजांस्युपास्ते॥23॥ |

सन्त्यज्य साम्राज्यमिदं प्रभुः स्यात् वनं प्रयातुं सहसा प्रसन्नः।
आत्मानमप्येष ददाति सद्भ्यो रामे न लोभो लभतेऽवकाशम्॥24॥

आयान्ति शान्तिं किल यत्प्रसादान्मोहाद्यवद्यानि कुतोऽस्य मोहः।
यस्याहिमांशोरुदये व्यपैति महान्धकारोऽत्र कुतोऽन्धकारः॥25॥

अविद्यमानात्मगुणाभिमानं मोहादहङ्कारमुशन्ति सन्तः।
अविद्यमानो न गुणोऽस्ति रामे तस्मादहङ्कारलवोऽपि नास्य॥26॥

न मद्वशोऽसाविति चित्ततोदं मात्सर्य्यमार्य्याः समुदाहरन्ति।
विश्वं च यद्वश्यमवश्यमेतत् स मत्सरी चेत् तुरगोऽपि शृङ्गी॥27॥

मदप्रमादौ भयदुःखशोकाः क्षुत् तृट् त्रिधातुप्रभवाश्च दोषाः।
न सन्ति रामे पठितः श्रुतौ य आदित्यवर्ण्णं तमसः परस्तात्॥28॥

योयो गुणो नाम स एव रामे योयश्च दोषः स तु नैव तस्मिन्।
नरेन्द्र किं वा बहुनोदितेन प्रत्यक्षयुक्तिश्रुतयोऽत्र मानम्॥29॥

क्षान्तः प्रशान्तः प्रियवाक् प्रसन्नो नित्यानृशंसोऽनुपमानुभावः।
चराचराणामविपश्चितां च गुणाम्बुधिः सम्मत एव रामः॥30॥

रामाय राज्यं नरदेव देहि स्वभावपूर्ण्णाय तवैव भूत्यै।
रत्नाकरायाम्बुधये यथाऽर्घ्यं त्रैलोक्यदीपाय यथा प्रदीपः॥31॥

इति वसिष्ठगरिष्ठसभाजनैरभिहितः स्थिररामसभाजनैः।
दशरथस्तनयाय महीमतः प्रतिददौ सुनयाय महीमतः॥32॥

इति श्रीनारायणपण्डिताचार्य्यविरचिते रामाङ्के सङ्ग्रहरामायणे अयोद्याकाण्डे प्रथमः सर्गः॥2-1-32॥

[ आदितः श्लोकाः [422+32=454]

## द्वितीयः सर्गः ॥2-2-45॥

| |
|---|
| इति वाक्यस्य तस्यान्ते हृष्यतां तत्र नृत्यताम्।<br>महाजनानां शब्दोऽभूत् परितः साधुसाध्विति॥1॥ |
| पुत्रेऽनुरागमालोक्य जनानां स जनेश्वरः।<br>हारैरिव बभौ पन्नैरानन्दास्रोदबिन्दुभिः॥2॥ |
| स वरिष्ठान् वसिष्ठादीन् ब्राह्मणानिदमब्रवीत्।<br>यौवराज्येऽभिषेक्ष्यामि रामं राजीवलोचनम्॥3॥ |
| श्वोभूते पुष्ययोगोऽयं चैत्रेऽस्मिन् मासि शस्यते।<br>तत्राभिषेक्तुं सम्भारा आदिश्यन्तां यथाविधि॥4॥ |
| उक्तो दशस्यन्दनेन शतानन्दस्य नन्दनः।<br>आभिषेचनिकान् नानासम्भारानादिशद् द्रुतम्॥5॥ |
| वस्त्ररत्नानि नूत्नानि मधु सर्वौषधानि च।<br>शातकुम्भमयैः कुम्भैः शतं तीर्थोदकानि च॥6॥ |
| यच्चान्यद् विविधं द्रव्यं वसिष्ठस्याऽऽज्ञया तदा।<br>सर्वं सम्पादयामासुः पुरुषाः शीघ्रकारिणः॥7॥ |
| समानय सुमन्त्राऽऽशु रामं मम मनोरमम्।<br>राज्ञ इत्याज्ञया मन्त्री रामधाम रथी ययौ॥8॥ |
| प्राञ्जलिः कञ्जनाभाय पितुराज्ञां न्यवेदयत्।<br>स यावत् तावदेवायं देवोऽध्यास्त रथं च तम्॥9॥ |

| |
|---|
| सार्वभौमः परीतोऽसौ सामन्तैः स्वैःसमन्ततः।<br>प्रासादे सुप्रसन्नात्मा ददर्शाऽऽयान्तमात्मजम्॥ 10॥ |
| इन्दीवरोदरप्रख्यमिन्दिरायाः प्रलोभनम्।<br>अमन्दचन्द्रवदनं मन्दहासंरं निसर्ग्गतः॥ 11॥ |
| सिंहसंहननं वीरं मत्तमातङ्गगामिनम्।<br>उत्तमं सर्वलोकानां पद्मपत्रारुणेक्षणम्॥ 12॥ |
| सर्वाभरणसम्पन्नं सर्ववायवसुन्दरम्।<br>सर्वेन्द्रियसुखं पुंसां सर्वेश्वरमुपागतम्॥ 13॥ |
| अपाङ्गैर्म्मङ्गलकृतं जय रामेत्युपेयुषाम्।<br>मितभाषणमप्यारात् स्मितपूर्वाभिभाषिणम्॥ 14॥ |
| जनकं स्वजनौधानां कृतान्तमिव वैरिणाम्।<br>परं ब्रह्माऽत्मविदुषां सुतं राजा स ऐक्षत॥ 15॥ |
| न राज्ञोऽतृप्यतां नाम नयने नळिनायते।<br>रामलावण्यपीयूषं पायम्पायं सुदुर्ल्लभम्॥ 16॥ |
| स्यन्दनात् समवस्कन्द्य चारु चलितकुण्डलम्।<br>सन्नतं सौधमारुह्य सोऽब्यनन्दत् स्वनन्दनम्॥ 17॥ |
| पाणिभ्यामनुकुर्वद्भ्यां पारिजातस्य पल्लवम्।<br>ववन्दे स पितुः पादौ नामकीर्त्तनपूर्वकम्॥ 18॥ |
| वन्दनायाऽनतं देवमक्रमापेक्षणो नृपः।<br>कृत्वा निःसङ्गमुत्सङ्गे परिरेभे मुदा यदा॥ 19॥ |

| |
|---|
| तदैवाऽऽनन्दजैर्बाष्पैरभिषिञ्चन् नृपः सुतम्।<br>सार्वभौमो भवेत्युक्त्वा कृतकृत्योऽभवद् ध्रुवम्॥20॥ |
| आसीनः पितुरादेशादासने शुद्धकाञ्चने।<br>जगन्नाथो जगद्दीपं जिगायोदयशैलगम्॥21॥ |
| रामेन्दुना कृतानन्दान्नरेन्द्रकुमुदाकरात्।<br>वचःपरिमळो जज्ञे सभाजनसभाजितः॥22॥ |
| यौवराज्यच्छलेन त्वां साम्राज्ये सद्गुणान्वितम्।<br>अभिषेक्ष्यामि वत्साहमनुमोदस्व कर्म्म तत्॥23॥ |
| भारक्षमे त्वयि न्यस्य भारं भूभूरणाह्वयम्।<br>प्रवया मन्दयत्नोऽहं विश्रमिष्यामि नन्दन॥24॥ |
| इति तातगिरं रामो बाढमित्यभिनन्द्यताम्।<br>प्राप स्वधाम राजाऽपि विवेशान्तःपुरं ततः॥25॥ |
| दुर्न्निमित्तैर्न्निमित्तज्ञश्चिन्तामाप महीपतिः।<br>पुनश्च पुत्रमाहूय रहो राममभाषत॥26॥ |
| इष्टं दत्तं मया भुक्तं स्वधर्म्मश्च स्वनुष्ठितः।<br>नूनं मे दुर्ल्लभं तात तत्फलं तेऽभिषेचनम्॥27॥ |
| अमङ्गलनिमित्तानि स्वाप्रजागरणानि च।<br>भवन्ति मृतिशंसीनि कार्य्यविघ्नकराणि च॥28॥ |
| शान्ताः स्युरन्तराया मे वासुदेवप्रसादतः।<br>सह वध्वा त्वया त्वद्य दीक्षा कार्य्योपवासिना॥29॥ |

| |
|---|
| इत्थं पित्रोपदिष्टः स मातुरन्तःपुरं गतः।<br>ददर्श तत्र कौसल्यां नारायणपरायणाम्॥30॥ |
| पुत्रस्याभ्युदयं श्रुत्वा पूजयन्तीमधोक्षजम्।<br>देवीं सुमित्रासहितां स ववन्दे सलक्ष्मणः॥31॥ |
| तावत् सा वाग्यता देवी रामाभ्युदयकाङ्क्षिणी।<br>अब्रवीद् बाष्पपूर्णाक्षी प्रेम्णा प्रियतमं सुतम्॥32॥ |
| स्वस्ति वत्स चिरं राम सतः पाह्यसतो जहि।<br>जगतीनाथ जगतीं पाहिमां पुत्रिकामिव॥33॥ |
| इति पुत्राशिषः प्रोच्य चक्रे साऽभ्युदयक्रियाः।<br>आमन्त्र्य लक्ष्मणं रामः ससीतः स्वगृहं ययौ॥34॥ |
| पुरोहितो ब्रह्मसुतस्त्वरितो राज्ञ आज्ञया।<br>रमारमणधामाभं रामधामाभ्यपद्यत॥35॥ |
| आसनात् सहसोत्थाय श्रीमान् विनयभूषणः।<br>गुरुं जगत्त्रयगुरुः पूजयामास शाश्वतः॥36॥ |
| आभिषेचनिकीं दीक्षां दक्षः प्राप्य विधानतः।<br>प्रददौ कनकाकल्पमाचार्य्यायायुतं गवाम्॥37॥ |
| हुत्वा भुक्त्वा हविष्यान्नं सपत्नीक उपोषितः।<br>दध्यौ रामः स्वमात्मानं ज्योतिर्न्नारायणाह्वयम्॥38॥ |
| यतवाक् सह वैदेह्या स्वास्तृते दर्भसंस्तरे।<br>स शिष्ये शेषशयनस्तां निशामृषिवाक्यतः॥39॥ |

अभूदभूतपूर्वोऽस्यामयोद्ध्यायां महोत्सवः।
रामाभिषेकलोलानां लोकानां वदतां मिथः॥40॥

अर्क्कोदयेऽभिषेकः स्यात् कदा न्वर्क्क उदेष्यति।
कदा नु रामं पश्यामः ससीतमभिषेकिणम्॥41॥

इत्यादिवादिनस्तत्र पौरजानपदा जनाः।
सबालवृद्धवनिता रामवार्त्ताः स्म जाग्रति॥42॥

प्रतिसद्म प्रतिसभं प्रतिवर्त्म प्रतिव्रजम्।
महोत्सवोत्सुका राममस्तुवन् गणशः प्रजाः॥43॥

मालाध्वजपताकाद्यैः सम्मार्ज्जैरुपलेपनैः।
सार्वभौमाज्ञया सर्वामलङ्क्रुः पुरीं नराः॥44॥

रामानुरागामृतभोगतृप्ता न केवलं कोसलमण्डलस्थाः।
त्रयोऽपि लोकाः सकलाः सपालास्त्रैलोक्यनाथो हि स कोसलेन्द्रः॥45॥

इति श्रीनारायणपण्डिताचार्य्यविरचिते रामाङ्के सङ्ग्रहरामायणे अयोद्ध्याकाण्डे द्वितीयः सर्ग्गः
॥2-2-45॥ आदितः श्लोकाः [454+45=499]

## तृतीयः सर्ग्गः ॥2-3-69॥

ज्ञातिदास्यथ कैकेय्या गृहे जाथा सहोषिता।
कुब्जा प्रासादमारूढा मन्थरा पुरमैक्षत॥1॥

तुष्टपुष्टजनं दृष्ट्वा नगरं समलङ्कृतम्।
वाद्यमानमहावाद्यं धात्रीं पप्रच्छ सा खला॥2॥

कोऽयं महोत्सवो भद्रे पुर्य्यामस्यां प्रवर्त्तते।
राममात्रा कुतो वित्तं विप्रेभ्यो भूरि दीयते॥3॥

| |
|---|
| पृष्टेति धात्री सन्तुष्टा नृत्यन्तीबेदमब्रवीत्।<br>रामोऽभिषिच्यते हन्त साध्वलङ्क्रियतामिति॥4॥ |
| व्याळीव यष्टिसंस्पृष्टा व्याघ्रीव हृतपोतका।<br>चुक्षोभामर्षताम्राक्षी मन्थरा नन्वमन्थरा॥5॥ |
| साक्षादलक्ष्मीः क्षोणीस्था कस्मिंश्चित् कारणान्तरे।<br>रामेण चरणे क्षिप्ता जज्ञे रामैकवैरिणी॥6॥ |
| दीर्घश्वासकृतायासा प्रासादादवरुह्य सा।<br>गृहे शयानां कैकेयीं हा हताऽस्मीत्युपाद्रवत्॥7॥ |
| तदुपश्रुत्य कैकेयीं सम्भ्रान्तां सहसोत्थिताम्।<br>किमेतदिति पृच्छन्तीं कितवा साऽभ्यभाषत॥8॥ |
| रामोऽभिषिच्यते राज्ञा भूयो नो भयमागतम्।<br>इत्युक्तवत्यै दास्यै सा प्रहृष्टा भूषणं ददौ॥9॥ |
| इमां च वाचमाचष्ट भद्रे भीरिह नास्ति नः।<br>समौ मे रामभरतौ सुतौ राजसुतौ ध्रुवम्॥10॥ |
| वदान्यो लोकमान्योऽयं ज्येष्ठः श्रेष्ठो नृपात्मजः।<br>कथं मया परिद्वेष्यो भक्तिमान् मयि मातृवत्॥11॥ |
| इति ब्रुवन्त्यां कैकेय्यां तां च भूषां निरस्य सा।<br>निर्भत्सयन्ती निर्भाग्या राज्ञीं पुनरभाषत॥12॥ |
| विनयादनयं प्राप्य व्यसने मज्जसि ध्रुवम्।<br>सपत्नीपक्षिणा राज्ञा मूढेऽसि त्वं विलोभिता॥13॥ |

| |
|---|
| सानुजे भरते याते पश्य रामाभिषेचनम्।<br>लक्ष्मणो राममन्वास्ते शत्रुघ्नो भरतं यथा॥14॥ |
| यदि रामोऽभिषिच्येत सपत्न्यास्तव नन्दनः।<br>त्वया ससुतया दास्यं कौसल्याया विधीयताम्॥15॥ |
| भरतस्यान्ववायोऽपि दास्यमेव प्रयास्यति।<br>नह्यराजसुतो राजा राजत्वं रामसन्ततेः॥16॥ |
| निगूढवैरो वीरोऽयं कालयेद् वा त्वदात्मजम्।<br>त्वं तु रामानुरागेण स्वपुत्रस्याहिते रता॥17॥ |
| आदितेयान् हि दैतेयास्तपोविद्याबलान्विताः।<br>छिद्रे छिन्दन्ति सत्येवं क्षत्रधर्म्मः सनातनः॥18॥ |
| कैकेयी कुब्जयेत्युक्ता कष्टभावेदमब्रवीत्।<br>सत्यमेतत्कथं कुब्जे राज्यं सूनोर्भवेन्मम॥19॥ |
| नीतिमांस्च विनीतश्च रामोऽयं जनरञ्जनः।<br>पितुः प्राणसमो राज्यात् कया नीत्या प्रयाप्यते॥20॥ |
| इति ब्रुवाणां कैकेयीं सस्मिता स्माऽह मन्थरा।<br>वरौ किं विस्मृतौ मुग्धे पत्या प्रत्तौ पुरैव ते॥21॥ |
| वरद्वयं वृणीष्व त्वं वरमेतद् वरानने।<br>साम्राज्यं भरतस्याऽऽशु प्राव्राज्यं जानकीपतेः॥22॥ |
| चतुर्द्दशसमा रामो वने यदि वसेद् व्रती।<br>छिन्नमूलो भवेद् व्यक्तं भरतो रञ्जयेज्जनम्॥23॥ |

कैकेयीत्थं समाकर्ण्य विलासं मन्थरामतेः।
आशिश्लेष द्रुतं दासीं हसन्ती साधुसाध्विति॥24॥

कुब्जायै कुण्डले दत्वा कैकेयी स्वे प्रहर्षिता।
क्रोधागारे द्रुतं शिश्ये मन्थराया मतेन सा॥25॥

अभिषेकस्य सम्भारान् विभवांश्च प्रकल्प्य सः।
राजा राजीवनयनः कैकेयीभवनं ययौ॥26॥

संस्मरन् सुस्मितां जायामनङ्गस्य वशं गतः।
नापश्यच्छयनागारे रत्नदीपप्रदीपिते॥27॥

कुत्र कान्तेति सम्भ्रान्तः  क्रोधगारं प्रविश्य सः।
ददर्श तरुणीं भार्य्यां शयानं केवलं भुवि॥28॥

तां पापनिश्चयां भूपो रमणीत्यभ्युपेयिवान्।
भुजङ्गीं माल्यबुद्ध्येव परिरभ्येति चाब्रवीत्॥29॥

त्यज शोकं विशालाक्षी मामालप शुकालपे।
नोपयासि प्रिये त्वॆ मां कथं स्मरशराहतम्॥30॥

अवन्यां चतुरान्तायां कस्मिन् दण्डो निपात्यताम्।
अब्राह्मणकुलं ब्रूहि देवी ते विहितागसम्॥31॥

प्रयच्छाम्यधुना सर्वं कृशोदरि यदिच्छसि।
कल्पवृक्षइवाहं ते स्मितेनोत्तिष्ठ सुस्मिते॥32॥

कान्तवाणीमिति श्रुत्वा कान्ता वाणीमभाषत।
सत्यसन्धः सदा राजन् भव धर्म्मविदां वर॥33॥

पुरा सुरासुररणे त्वां निशासु शरक्षतम्।
अरक्षं ननु रक्षोभ्यो विद्यया विप्रदत्तया॥34॥

तदा प्रीत्या प्रदत्तौ मे वरौ नरवर त्वया।
याचे तौ याचनीयं त्वां दीनाऽहं तव वल्लभा॥35॥

इति तस्या वचो वीरो वक्राया मधुराक्षरम्।
मृगो गीतमिवाऽऽकर्ण्य विवशो वाक्यमब्रवीत्॥36॥

वरौ वरानने दत्यामभीष्टौ सत्यमेव ते।
पुत्रेण मम रामेण प्राणेभ्यः प्रेयसा शपे॥37॥

राज्ञः प्रतिज्ञां तां श्रुत्वा किञ्चिदुत्फुल्ललोचना।
वचोवज्रं ससर्ज्जासौ जगन्मङ्गलभङ्गदम्॥38॥

तव राजन् प्रतिज्ञायाः साक्षिणो धर्म्मसाक्षिणः।
रामः प्रियश्चेद् भवतो मह्यं देहि वराविमौ॥39॥

अनेनैवोद्यमेनाद्य भरतोऽत्राभिषिच्यताम्।
चतुर्द्दशसमा रामो याप्यतां च वनं प्रति॥40॥

वाक्यबाणेन तेनैव विदीर्ण्णहृदयो नृपः।
पपात सहसा मह्यां छिन्नमूल इव द्रुमः॥ 41॥

कैकेयीत्रिनताशक्त्या मुक्तो मन्थरया शरः।
वाङ्मयोऽपातयद् भूपं दैत्येषुभिरपातितम्॥42॥

दुःधमोहपराभूतः स मुहूर्त्तं महीपतिः।
सञ्ज्ञां कथञ्चित् सम्प्राप्य दीन आस्ते स्म भूतळे॥43॥

|  |
| --- |
| क्रोधशोकाभिसन्तप्तान् बाष्पबिन्दून् महोष्मणः।<br>विमृज्य दीर्घं निश्वस्य कैकेयीं वीक्ष्य सोऽब्रवीत्॥44॥ |
| धिग्धिग् बुद्धिविहीनां त्वां दुर्बुद्धौ बुद्धिमानिनीम्।<br>शैलूषीमिव निःशङ्कां वाचाटां टिट्टिभीमिव॥45॥ |
| कृषाणीव कृपाहीना कोमलाऽपि निसर्गतः।<br>परैः कृष्टा सुवंशाऽपि मन्नाशायासि धारिता॥46॥ |
| गेहाद् रामं प्रयाप्य त्वं देहान्मामपि पापिनि।<br>स्नेहात् त्वत्स्थाच्च भरतं लोकांस्त्वं पातयस्यधः॥47॥ |
| अहर्प्पतिं विनेवाहर्विना वारीव वारिजम्।<br>देहीवोक्थं विना रामं विनाऽहं नास्मि सर्वथा॥48॥ |
| मया रामेण च त्यक्तां भरतो नाऽवसेत् पुरीम्।<br>प्राणजीवपरित्यक्तां तनूमिव मनः स्वयम्॥49॥ |
| भरतस्यासि जननी भार्य्या मेऽश्वपतेः सुता।<br>त्रयाणामपि नः कीर्त्तिं धार्म्मिकाणां निकृन्तसि॥50॥ |
| अनुक्तपूर्वं दुर्वाक्यमिदानीमुक्तवत्यसि।<br>सर्वेषामपि पूर्वेषां गुणानां दहनायितम्॥51॥ |
| सर्वभूताभिरामाय रामायगुणसिन्धवे।<br>ऋजवेऽनभ्यसूयाय को ह्यसूयति कुत्रचित्॥52॥ |
| समौ मे रामभरतावित्यवादीः कथान्तरे।<br>भरताच्चातिशुश्रूषू रामस्ते त्यज्यते कथम्॥53॥ |

| |
|---|
| वनं गच्छेति वक्ष्यामि कथं राममनागसम्।<br>कान्तत्यक्तां प्ररुदितां वधूं द्रक्ष्यामि वा कथम्॥54॥ |
| सम्मता त्वं गुणैः सर्वैः पौरजानपदेष्वपि।<br>त्यजैकं बुद्धिदोषं तु सर्वदूषणकारणम्॥55॥ |
| यद्यदिच्छसि वामोरु तत्तद् दास्यामि सर्वथा।<br>वरावेतौ विना देवी प्रणम्य त्वां प्रसादये॥56॥ |
| मम दीनस्य वृद्धस्य तव प्राणैः समस्य च।<br>लालप्यमानस्य भृशं शरणं भव भामिनि॥57॥ |
| विलपन्तं पतिमिति विलोठन्तं महीतळे।<br>विलोक्यानल्पदर्प्पा सा कैकेयी वाक्यमब्रवीत्॥58॥ |
| अनेनासत्यवादेन यशोधर्म्मादयो गुणाः।<br>स्फीता नश्यन्ति ते राजन् वरौ मे न ददासि चेत्॥59॥ |
| औशीनरादयः पूर्वे सत्यार्थे देहमत्यजन्।<br>त्वं च राज्यं प्रतिज्ञाय स्वपुत्राय न दास्यसि॥60॥ |
| रामं राज्येऽभिषिच्य त्वं रन्तुं कौसल्ययेच्छसि।<br>शिष्टलक्षण दुष्टात्मन्नष्टोऽयं ते मनोरथः॥61॥ |
| सपत्नीं मम कौसल्यां मानिनीं दीनतां गताम्।<br>एकाहं चेदवेक्षिष्ये गमिष्यामि कृतार्थताम्॥62॥ |
| विषं पास्यामि विषमं मरिष्यामि तवाग्रतः।<br>न चेत् प्रतिज्ञां कुरुषे प्रोच्येति विरराम सा॥63॥ |

हा रामेति क्षितौ पन्नो मोहेन स महीपतिः।
नानासान्त्वैरशान्तां तां पुनः क्रुद्धोऽब्रवीदिदम्॥64॥

पापे पाणिर्म्मया यस्ते गृहीतो मन्त्रपूर्वकम्।
तं त्यजामि ममायोग्यं रामसन्त्यागकारणम्॥65॥

श्रुत्वैव वरदानं मे रामः क्षिप्रं गमिष्यति।
ऋजुर्म्मन्दस्य मेऽभीष्टां राज्यरक्षां न धास्यति॥66॥

इत्थं लालप्यमानस्य कैकेय्या दातितात्मनः।
सहस्रायामा तस्याऽऽसीत् सा त्रियामाऽपि शर्वरी॥67॥

प्रभाते जगदे कान्तः सीताया मागधैरिति।
प्रभा ते जगदेकान्तश्रिये राम रवेरिव॥68॥

तत्रोत्सवे मणिगणो रुचिभिर्विरेजे तेनैव भूषणगणो विविधो विरेजे।
रामोऽथ तेन सह वल्लभया विरेजे भूम्ना चराचरमिदं सकलं विरेजे॥69॥

इति श्रीमन्नारयणपण्डिताचार्यविरचिते रामाङ्के सङ्ग्रहरामायणे अयोद्याकाण्डे तृतीयः सर्गः ॥2-3-69॥

[आदितः श्लोकाः 499+69=568]

## चतुर्थः सर्गः ॥2-4-53॥

दिवाकरेऽथाभ्युदिते सुमन्त्रो मन्त्रिसत्तमः।
सत्वरः सत्वसम्पन्नो नरेन्द्रान्तःपुरं ययौ॥1॥

प्रविश्यान्तःपुरं कान्तं मन्त्री द्वास्थैरवारितः।
सुप्तं मत्वा नरपतिं बोधयन्नभ्यधादिदम्॥2॥

| |
|---|
| स्वस्ति तेऽस्तु नृपोत्तिष्ठ प्रजाः सर्वाः प्रजापते।<br>त्वयि निद्राति निद्रान्ति त्वयि जाग्रति जाग्रति॥3॥ |
| सामन्ता मन्त्रिपूर्वाश्च सर्वाः प्रकृतयस्तथा।<br>महोत्सवोत्सुका हि त्वां प्रतीक्षन्ते सभातळे॥4॥ |
| सर्वान् सम्भृत्य सम्भारानाभिषेचनिकानिह।<br>वसिष्ठाद्याश्च मुनयस्त्वरन्ते ते हिते रताः॥5॥ |
| कृतस्वस्त्ययनः श्रीमान् रामस्तव नियोगतः।<br>अलङ्कृतः सपत्नीक आस्ते कार्य्यं कुरु द्रुतम्॥6॥ |
| सचिवस्य वचः श्रुत्वा लज्जाशोकाकुले नृपे।<br>अवाङ्मुखे मौनवति प्रोचे सा कैकयात्मजा॥7॥ |
| रामहर्षेण राजेन्द्रो जैगर्त्ति स्म निशामिमाम्।<br>तस्मान्नूनं सनिद्रोऽसौ त्वं शीघ्रं राममानय॥8॥ |
| मन्त्री मत्वा वचः सत्यं तयेति समुदाहृतम्।<br>निर्ग्गतः प्रैक्षत द्वारी मन्त्रिणः सपुरोहितान्॥9॥ |
| उदेति देवः सविता सम्भारः सम्भृतोऽखिलः।<br>आवेदयाऽऽशु राजानं स तैरित्यभ्यभाष्यत॥10॥ |
| ततः सुमन्त्रः सम्भ्रान्तः कालस्यात्ययशङ्कया।<br>पुनरन्तःपुरं गत्वा स्तुवन् भूपमबोधयत्॥11॥ |
| महेन्द्रसख राजेन्द्र महासुरनिबर्हण।<br>आयुष्मन् रामजनक क्षिप्रमुद्बुध्यतां त्वया॥12॥ |

| |
|---|
| सुमन्त्रस्तुतिवाक्यानि कैकेयीक्रूरवाक्यतः।<br>राज्ञोऽतिदुःसहान्यासन् रामविश्लेषशङ्किन॥13॥ |
| महिशो मन्त्रिणं स्माऽह मृतकं स्तौषि किं सखे।<br>जीवन् क्षणं च पश्यामि राममानय मङ्क्षिति॥14॥ |
| ततः किञ्चिदपक्रम्य किमेतदिति दुर्म्मनाः।<br>चिन्ताक्रान्तः सुमन्त्रोऽथ रामधाम द्रुतं ययौ॥15॥ |
| हृष्टपुष्टजनं वप्रैः सौवर्ण्णैः सप्तभिर्य्युतम्।<br>पुरमिन्द्रपुराक्षिप्नु वैकुण्ठोपममाविशत्॥16॥ |
| ददर्श देवं सौवर्ण्णे पर्यङ्के राङ्कवास्तृते।<br>आसीनं चन्दनेनाक्तं वराहरुधिरत्विषा॥17॥ |
| सीतया सेवितं देव्या चारुचामरहस्तया।<br>द्रष्टुमिच्छति राजा त्वामित्यूचे स प्रणम्य तम्॥18॥ |
| आरुरोह रथं रामः प्रभाकरसमप्रभम्।<br>अभिनन्द्याथ मैथिल्या अपाङ्गं विश्वमङ्गलम्॥19॥ |
| पुरात् पुरुषसिंहोऽयं महासिंहो बिलादिव।<br>निर्ज्जगाम जगन्नाथो नानाभटगणैर्य्युतः॥20॥ |
| रम्याणि हर्म्याण्यारुह्य रमा रामं निरीक्ष्य च।<br>परस्परमिति स्माऽऽहुः पुरुषाश्च समन्ततः॥21॥ |
| सीमन्तिनी न सीतायाः समाऽस्ति भुवनत्रये।<br>राघवं वल्लभं लेभे या मुकुन्दमिवेन्दिरा॥22॥ |

| |
|---|
| कौसल्ययया नृपेणापि किन्नु तत् सुकृतं कृतम्।<br>रामं वत्सेति यावेनं समाश्लिष्याभिनन्दतः॥23॥ |
| मानुषाइव पीयूषं धनं भूरीव निर्द्धनः।<br>लब्ध्वा रामं सुराजानं हन्त मोदामहेऽधुना॥24॥ |
| एवं विचित्रा मोदेन वाचः प्रब्रुवतो जनान्।<br>सस्मितेन कटाक्षेण लाळयन् प्रययौ प्रभुः॥25॥ |
| प्रविश्य राजभवनं देवराजगृहोपमम्।<br>ववन्दे पितरं देवः कैकेयीमपि मातरम्॥26॥ |
| आयुष्मान् भव वत्सेति विवक्षोरपि भूपतेः।<br>वचनं नागलद् वक्रान्नेत्राभ्यामगलज्जलम्॥27॥ |
| पितुस्तं शोकमालक्ष्य कैकेयीं पृच्छति स्म सः।<br>जानंश्च सर्वं सर्वेशो लोकमेवं विडम्बयन्॥28॥ |
| किमम्ब दुःखं तातस्य किमागो मयि पश्यति।<br>किं त्वयाऽऽगः कृतं मानात् सत्यं ब्रूहि सुताय मे॥29॥ |
| वाणीमाकर्ण्य रामस्य शठा कठिणमानसा।<br>कैकेयी कैतवप्रज्ञा सस्मितं तमभाषत॥30॥ |
| न त्वयाऽऽगः कृतं पुत्त्र न मया नापरेण वा।<br>राजा मह्यं वरौ दत्वा त्वद्भयादनुतप्यते॥31॥ |
| यदि तात स्वताते ते भवेद् भक्तिरकैतवा।<br>धर्म्मकृच्छ्रादिमं पाहि वक्ष्ये त्वं चेत् प्रतिश्रवी॥32॥ |

| |
|---|
| इत्युक्त ऊचे भगवान् न कुर्य्यां किं पितुः प्रियम्।<br>पिबेयं कालकूटं वा विशेयं ज्वलितानलम्॥33॥ |
| मातः क्षमापय क्षिप्रं क्षमावन्तं क्षमापतिम्।<br>पित्रा प्रत्तौ वरौ तुभ्यं मया सत्यं प्रतिश्रुतम्॥34॥ |
| प्रभुणैवं प्रतिज्ञाते सा पापा व्याललाप तम्।<br>त्वत्पित्रा मे वरौ प्रत्तौ पालितेन पुरा मया॥35॥ |
| इदानीं तौ वरौ दातुमुचितौ याचितौ मया।<br>स्वयं दत्वाऽप्यहो मे त्वां सौजन्यान्न वदत्यसौ॥36॥ |
| वने वस त्वं तपसा वत्सरान् तव पञ्चच।<br>भरतः पातु पृथिवीमेतद् राज्ञोऽनुशासनम्॥37॥ |
| इत्युक्त ऊचे काकुत्स्थो वनं यास्याम्यहं सुखम्।<br>आनीयतां च भरतो दूतैः साध्वभिषिच्यताम्॥38॥ |
| निःसङ्गाः स्मो वयं मातर्न्न तु प्राकृतधर्म्मिणः।<br>किन्तु कस्मादिदं तातः स्वयं नाऽऽज्ञापयत्यहो॥39॥ |
| इत्युक्ता सा खला प्रोचे तव मानधनः पिता।<br>लज्जया त्वां न वक्तीह गूढो भावोऽस्य चोच्यते॥40॥ |
| यावत् तिष्ठस्ययोध्यायां तावन्नाश्नाति ते पिता।<br>शीघ्रं गच्छान्यथा हन्त गुर्वाज्ञामतिवर्त्तसे॥41॥ |
| इत्थं काळ्यैव कैकेय्या सर्वारुन्तुदयोदिते।<br>धिक् कष्टमिति भूपालः स पपात मुमोह च॥42॥ |

| |
|---|
| राम ऊचेऽथ कैकेयीं देवी द्रक्ष्यामि मातरम्।<br>सीतां च सान्त्वयिष्यामि पुनर्य्यास्यामि तापसः॥43॥ |
| एतावत् क्षम्यतां मातस्त्वया राजर्षिजायया।<br>भरतः पातु पृथिवीं पितृशुश्रूषणे रतः॥44॥ |
| इति शुद्धां शुभां श्रुत्वा गिरं रामस्य पार्त्थिवः।<br>हा राम राम वत्सेति मुक्तकण्ठो रुरोद सः॥45॥ |
| राज्ञस्तस्य विसञ्ज्ञस्य कैकेय्याश्च जगद्गुरुः।<br>परिक्रम्याभिवाद्याङ्घ्रीनिश्चक्राम निवेशनात्॥46॥ |
| आर्त्तस्वनो महानासीन्महिषीणां महीभृतः।<br>पितुरन्तःपुरात् तस्मात् प्रव्रजत्यखिलेश्वरे॥47॥ |
| सर्वभूतप्रियो रामः क्व नो वत्सो गमिष्यति।<br>कथं त्यजति राजानं मुहूर्त्तं विरहासहम्॥48॥ |
| इत्युच्चैः क्रन्दितं तासां सङ्घेसङ्घे निवेदितम्।<br>सर्वत्राऽऽक्रन्दितं तेन बीजं बीजान्तरं यथा॥49॥ |
| पूर्णानन्दस्य रामस्य पूर्णेन्दुनिभमाननम्।<br>दृष्ट्वा राज्यच्युतस्यापि शोचन्ति स्म पुनः प्रजाः॥50॥ |
| लक्ष्मणः क्षुभितो लज्जाशोकक्रोधसमुच्चयात्।<br>बद्धमौनो निजं ज्येष्ठं निर्य्यान्तमनुनिर्य्ययौ॥51॥ |
| स जगज्जनको गत्वा जनन्या धाम धामवत्।<br>वैष्णवव्रतनिष्ठां तामभ्यवन्दत सानुजः॥52॥ |

| |
|---|
| राज्ञी कनत्कनककङ्कणके प्रकोष्ठे |
| न्यस्याक्षमाल्यमथ कम्पितकर्णभूषा।<br>आश्लिष्य राममवदत् प्रमदाश्रुपूर्णा |
| स्याद् यौवराज्यमधुनैव तवाऽऽत्मजेति॥53॥ |
| इति श्रीमन्नारयणपण्डिताचार्यविरचिते रामाङ्के सङ्ग्रहरामायणे<br>अयोद्याकाण्डे चतुर्थः सर्गः॥2-4-53॥ [अदितः श्लोकः 568+53=621] |

## पञ्चमः सर्गः ॥2-5-50॥

| |
|---|
| लक्ष्मणं प्रेक्ष्य भगवान् सस्मितं स्माऽऽह मातरम्।<br>अम्ब नूनं न जानासि तवाप्रियमुपस्थितम्॥1॥ |
| समयेन नृपं बध्वा केकेय्या मे प्रचोदितः।<br>वनेचतुर्द्दश समा वासो राज्यं स्वसन्ततेः॥2॥ |
| इत्युपश्रुत्यकौसल्या निपपातावनीतळे।<br>उल्लूना पुष्पवल्लीव सारङ्गीव शराहता॥3॥ |
| आलोक्य लोकनाथस्तां मूर्छितां भुव उद्धरन्।<br>ममार्ज्ज पांसूस्तद्गात्रात् कराभ्यां करुणाकरः॥4॥ |
| मुहूर्त्तात् सा शनैः सञ्ज्ञां लब्ध्वा शोकाग्निशोषिता।<br>दीना जगाद सास्त्रौघा दृष्ट्वा पुत्रमुखाम्बुजम्॥5॥ |
| अस्वैरिणीं शुचिं दान्तां गुरुदेवार्च्चने रताम्।<br>त्यक्तुं नार्हसि मां तात मातरं त्वमनागसम्॥6॥ |

| |
|---|
| सपत्न्या मम कैकेय्याः कलहाख्यानलोष्मणा।<br>सन्तप्तां सुचिराय त्वं कथं त्यजसि धार्म्मिक॥7॥ |
| नाप्रियाऽहं तव पितुर्न्नापि लोकैर्विनिन्दिता।<br>किन्तु सा वक्रधीर्न्नाहं तस्मान्मम पराभवः॥8॥ |
| याः सप्तविंशतिसमास्त्वयि जात इमाः सुत।<br>तवोदयं प्रतीक्ष्याहं स्थिताऽब्दमिव चातकी॥9॥ |
| वज्रात् स्वरतरं नूनं हृदयं मम नन्दन।<br>त्वद्यात्रावाक्यवज्रेण यन्न भिन्नं सहस्रधा॥10॥ |
| पितुर्ग्गरियसी माता न गच्छातो ममाऽऽज्ञया।<br>यदि यास्यसि हास्यामि देहं त्वद्विरहाग्निना॥11॥ |
| स्वर्ग्गं यास्यति राजेन्द्रो निर्ग्गते त्वयि सर्वथा।<br>क्षणं त्वद्विरहाशक्तो न जीवेयमभर्तृका॥12॥ |
| वयं शाकेन जीवामः कैकेय्याः सन्तु सम्पदः।<br>करुणां कुरु धर्म्मज्ञ  न मां मुञ्च कथञ्चन॥13॥ |
| विलपन्तीमिमां वीक्ष्य क्षुभितं लक्ष्मणं भृशम्।<br>नियम्य हेतुमद् वाक्यं जगाद जगतां पतिः॥14॥ |
| माता गरीयसी मातः सर्वस्माज्जगतोऽपि तु।<br>आचार्य्याज्जनकाद्  वाऽपि परं नास्ति हरिं विना॥15॥ |
| मातरं मारयामास भार्ग्गवो भगवान् पुरा।<br>आज्ञया पितुरेवाथ तत्प्रसादादजीवयत्॥16॥ |

| |
|---|
| कण्डुना पण्डितेनैव गौर्हता पितुराज्ञया।<br>पित्रर्थे नन्वनुज्ञं मे देहि मातःप्रियोऽस्मि चेत्॥17॥ |
| पितुराज्ञामनुष्ठाय चतुर्द्दशसमास्वहम्।<br>निवर्त्तिष्ये प्रतीपं मा ब्रूहि प्राणैः शपे मम॥18॥ |
| अनुनीयेति जननीं रामो लक्ष्मणमब्रवीत्।<br>दैवोपपादिते कार्य्ये न तात क्रुध्यतामिति॥19॥ |
| कैकेय्याः कैतवं सर्वं प्रजासङ्कटमुत्कटम्।<br>आर्जवं च प्रभोर्वीक्ष्य पुनश्चुक्रोध लक्ष्मणः॥20॥ |
| लालाटीं भ्रुकुटीं बिभ्रद् भ्रमद्भ्रूररुणेक्षणः।<br>अमित्रघ्नोऽत सौमित्रिः प्रोचे प्रेक्ष्यासिमात्मनः॥21॥ |
| यद् दैवं देवदेवेश स्यात् ते राज्यापनोदनम्।<br>हन्म्यां पुरुषकारेण तत् प्रसन्ने सति त्वयि॥22॥ |
| चतर्द्दशसु लोकेषु श्रिये यस्तेऽभ्यसूयति।<br>कृपाणीयं कृपाहीना तस्य पास्यति शोणितम्॥23॥ |
| कैतवेनैव केकेयी वहावादत्त भूपतेः। |
| पश्चात्तप्तं च नः पित्रा कोऽत्र धर्म्मव्यतिक्रमः॥24॥ |
| अप्रियं सर्वभूतानां कृत्वा प्रव्रजनं त्वया।<br>क्षुद्राया नैव केकेय्याः प्रियं नाथ विधीयताम्॥25॥ |
| इत्युक्त ऊचे भगवान् क्व नो दुःखं क्व नो सुखम्।<br>पट्टनं च वनं चाङ्ग निःसङ्गानां समं मतम्॥26॥ |

| |
|---|
| पूर्णमस्मद्यशश्चन्द्रं कलङ्को न स्पृशेदयम्।<br>राघवो राज्यलोभेन तातं लङ्घितवानिति॥27॥ |
| पुण्यारण्यशरण्यानां कुर्वाणो निर्वृतिं सताम्।<br>वनेषु सञ्चरिष्यामि सन्त्यन्ये चाऽत्र हेतवः॥28॥ |
| मयि स्वभावभक्तस्य युक्तं प्रोक्तं तदेदृशम्।<br>भरतेन समं मातापितृशुश्रूषणं कुरु॥29॥ |
| इति विश्वेश्वरेणोक्तं श्रुत्वा विश्वेश्वरानुजः।<br>शान्तकोपो ययौ शोकं स्वामिविश्लेषशङ्कया॥30॥ |
| बद्धाञ्जलिर्बाष्पमुखश्चिन्तया शान्तविभ्रमः।<br>सेवोत्कण्ठो रुद्रकण्ठो राममाचष्ट लक्ष्मणः॥31॥ |
| नाथ ते यत्रयात्रा स्यात् तत्र त्वामनुयाम्यहम्।<br>त्वत्सेवा मे वरा मुक्तेः किमुतेतरसम्पदः॥32॥ |
| यदि यास्यसि मां त्यक्त्वा करुणाकर काननम्।<br>क्षुद्रं देहमिमं त्यक्त्वा सेवेय त्वाऽन्यजन्मनि॥33॥ |
| वेदाहं पुरुषं पूर्णं प्रभुं त्वां प्रकृतेः परम्।<br>यत्सेवया कृतार्त्थाः स्युर्ब्रह्मब्रह्मभवादयः॥34॥ |
| इति भागवताग्रण्यो भगवान् शुश्रुवान् वचः।<br>सस्मितं तमवेक्ष्योचे बाडमागम्यतामिति॥35॥ |
| पुत्रयात्रोद्यमं दृष्ट्वा कौसल्या पुनरब्रवीत्।<br>पुरातनानां वचनं मान्यं चेच्छृणु नन्दन॥36॥ |

| |
|---|
| गुरोरप्यवलिप्तस्य कार्य्याकार्य्यमजानतः।<br>कामचारप्रवृत्तस्य न कार्य्यं ब्रुवतो वचः॥37॥ |
| मानवेन्द्रेण मनुना गाथेयं नन्वगीयत।<br>तस्मात् त्वमभिषिच्यस्व राजऽप्यत्रानुनीयताम्॥38॥ |
| मातुरेतद् वचः श्रुत्वा प्रोवाच प्रहसन् प्रभुः।<br>पितुः शान्तस्य दान्तस्य कार्य्यैवाऽज्ञा गुरोरिति॥39॥ |
| दीर्घश्वासकृतायासा सन्तताश्रुजलाकुला।<br>अनिर्वर्त्त्यं सुतं ज्ञात्वा कौसल्या विललाप सा॥40॥ |
| सपत्न्या भक्ष्यमाणां मां व्याघ्र्या गामिव दुर्बलाम्।<br>तात सन्त्यज्य मा याहि नय मामपि काननम्॥41॥ |
| इत्युक्त ऊचे भगवान् मातरेवं तु मा वद।<br>पतिशुश्रूषणात् स्त्रीणां परमात्मा प्रसीदति॥42॥ |
| भरतं मामिवेक्षस्व स च त्वां मद्वदर्चयेत्।<br>सत्यमानन्दयिष्यामि वत्सरे त्वां चतुर्द्दशे॥43॥ |
| काकुत्स्थे कथयत्येवं सा देवी देवतोपमा।<br>नियम्य नीत्या तं शोकं तस्य स्वस्त्ययनं व्यधात्॥44॥ |
| रक्षोघ्नान् सर्षपान् जप्त्वा बबन्ध तनुमध्यमा।<br>चक्राङ्के चक्रिणः पाणौ चक्री त्वां पालयेदिति॥45॥ |
| सर्वदा स्वस्तये सन्तु सर्वभूतानि तात ते।<br>सर्वभूतान्तरात्मा च केशवः स्वस्तयेऽस्तु ते॥46॥ |

विनतेवाऽऽत्मतनयमुपेन्द्रमिव चादितिः।
विष्णुप्रसादाद् द्रक्ष्यामि त्वां विक्रान्तमुपागतम्॥47॥

पुरुषोत्तम भक्त्या मे पुनरेहि सलक्ष्मणः।
इत्युक्त्वा मूर्ध्न्युपाघ्राय परिरेभे सुतं सती॥48॥

प्रसाद्य मातरं देवः परिक्रम्य प्रणम्य च।
निर्जगाम गृहात् तस्माल्लक्ष्मीवान् लक्ष्मणान्वितः॥49॥

रराज रामोऽतनुराजमार्ग्गे स श्यामधामा वियतीव मेघः।
स्वदृष्टिवृष्ट्या परितापहारी मुहूर्त्तमार्त्तिं शमयन् प्रजानाम्॥50॥

इति श्रीमन्नारायणपण्डिताचार्य्य विरचिते रामाङ्के सङ्ग्रहरामायणे अयोद्याकाण्डे पञ्चमः सर्ग्गः॥2-5-50॥ [ आदितः श्लोकाः : 621+50=671]

## षष्ठः सर्ग्गः ॥2-6-43॥

महोत्सवोत्सुकजनं प्रविश्य स्वपुरं प्रभुः।
अन्तःपुरान्तरगतां देवीमूचे चिकीर्षितम्॥1॥

त्वया सह वनं यामि देवेत्यूचेऽत जानकी।
पुर एवोष्यतां तावत् त्वयेत्यूचे जगत्पतिः॥2॥

समूदे सह तद्यात्रां कृच्छ्रेण किल केशवः।
सदाऽप्येकाधियोरेतद् देवदेव्योर्विडम्बनम्॥3॥

वनवासविवादं तं राजराज्ञ्योः प्रशुश्रुवान्।
अन्तःपुरजनः सर्वो रुरोद विवशो भृषम्॥4॥

| |
|---|
| लक्ष्मणं बाष्पपूर्णाक्षं पार्श्वे प्रह्वमुपस्थितम्।<br>ध्यायन्तमथ कर्त्तव्यं भगवान् समभाषत॥5॥ |
| कैकेय्या नियतो राजा मातरौ नौ न मानयेत्।<br>भरतः श्रीमदानन्धश्च तस्मादत्रोष्यतां त्वया॥6॥ |
| मज्जनन्या हि शुश्रूषा मच्छुश्रूषैव नान्यथा।<br>किञ्चित् क्लेशासहं प्रेष्ठं त्वां वनं न नयाम्यहम्॥7॥ |
| एवं ब्रुवाणे देवेऽस्मिंस्तूर्णं पादाभिवन्दनम्।<br>कृत्वाऽऽर्य्यस्य तथाऽऽर्य्याया रुदन्नाचष्ट लक्ष्मणः॥8॥ |
| कौसल्या नैव शोच्या सा त्वद्वियोगं सहेत चेत्।<br>यस्या ग्रामसहस्रं हि निसृष्टमुपजीवनम्॥9॥ |
| कौसल्यां च सुमित्रां च भरतस्त्वयि गौरवात्।<br>पूजयेदधिकं मातुः कृत्यं नास्त्यत्र मे ततः॥10॥ |
| प्रेष्ठोऽहं चेत् तव स्वामिन् कथं मां न नयस्यहो।<br>त्वच्छुश्रूषोचितं साक्षात् प्रेष्यं शिष्यं तवानुजम्॥11॥ |
| देव त्वं सह वैदेह्या वने स्वैरं हि रंस्यसे।<br>सकलः सफलः कालो युवयोः सेवयाऽस्तु मे॥12॥ |
| एवमुक्तवतस्तस्य भक्तिं तां भक्तवत्सलः।<br>विज्ञाय प्रत्युवाचेदं लक्ष्मणं लक्ष्मणाग्रजः॥13॥ |
| वत्सैवं स्यात् प्रसन्नोऽस्मि त्वमापृच्छ्य सुहृज्जनम्।<br>ये राज्ञे वरुणप्रत्ते धनुषी ते समानय॥14॥ |

अभेद्यं कवचं हृद्यमक्षयेषू तथेषुधी।

खड्गौ चाऽऽनय विन्यस्तं सर्वमाचार्य्यसद्मनि॥15॥

इत्युक्तमात्रे सौमित्रिः स्वमापृच्छ्य सुहृज्जनम्।

आचार्य्य सद्मनो हेतीर्हेमदीप्ताः समानयत्॥16॥

पुनश्च देवस्याऽऽदेशात् स दानाय समानयत्।

सुयज्ञं च वसिष्ठस्य सूनुमन्यान् द्विजानपि॥17॥

कोटीरकाञ्चीकटककेयूरादिविभूषणम्।

अनर्घं राघवः प्रादात् सुयज्ञाय मणीनपि॥18॥

भूषणानि परार्घ्याणी वासांसि विविधानि च।

सुयज्ञपत्न्यै प्रददौ रामपत्नी मुदाऽन्विता॥19॥

मातुलेनाऽऽत्मने दत्तं नागं शत्रुञ्जयं प्रभुः।

हेमभूषं ददौ तस्मै सहस्रेण गवां सह॥20॥

ब्राह्मणेभ्यस्तथाऽन्येभ्यः सर्वेभ्योऽर्थिभ्य एव च।

यथेष्टं प्रददौ वित्तं प्रीतास्ते चाऽशिषोऽवदन्॥21॥

ततः सौमित्रिमाहूय भगवानिदमब्रवीत्।

धनराशिमिमं पश्य लक्ष्मणोत्तमलक्षण॥22॥

द्विजाग्र्येभ्यश्च भृत्येभ्यः सुहृद्भ्यश्च प्रदीयताम्।

योयो जनोऽधुना वित्तं यद्यदिच्छति तद् दिश॥23॥

अगस्त्यं कौशिकमुनिं गार्ग्यं शाण्डिल्यमप्युत।

तैत्तिरीयं गुरं चाऽऽशु तर्प्पयैतैर्म्महाधनैः॥24॥

| |
|---|
| सूतं च मे चित्ररथं बन्दिहासकमल्लकान्। तर्प्पयान्यांश्च शिल्पाद्यान् रजकान् श्मश्रुवर्द्धकान्॥25॥ |
| कौसल्यायाः सुमित्रायाः प्रेष्यान् भिक्षूंश्च तद्गृहे। द्वाभ्यान्द्वाभ्यां सहस्राभ्यां निष्काणां प्रतितर्प्पय॥26॥ |
| मयि नाथे वनं याते नाऽस्माकः कोऽपि सीदतु। विश्राणय विशेषज्ञ निःशेषं मे ततो धनम्॥27॥ |
| इत्यार्य्यस्य वचः श्रुत्वा तथा चक्रे स लक्ष्मणः। पुनश्च धनशेषं स्वं व्यङ्गादिभ्यो ददौ प्रभुः॥28॥ |
| अथ कश्चिद् द्विजो वृद्धो मलिनो मलिनाम्बरः। त्रिजटो नाम दुद्राव रामं दण्डावलम्बनः॥29॥ |
| स गार्ग्यो देवमाचष्ट राम मे तरुणी प्रिया। बह्वपत्या च दारिद्र्यात् खिन्नामे दीयतां धनम्॥30॥ |
| इत्युक्त ऊचे भगवान् हास्यं लोके हसत्यमुम्। इतो दण्डं क्षिपसि चेद् गोषु दास्यामि ता इति॥31॥ |
| स शाणीं मलिनां कक्ष्यां वृद्धः संवेष्ठ्य सम्भ्रमी। आविद्ध्य दण्डं चिक्षेप सर्वप्राणेन वेपितः॥32॥ |
| स दण्डः सरयूं तीर्त्त्वा गोसहस्रे समापतत्। प्रशस्याऽश्लिष्य तं विप्रं गोसहस्रं ददौ प्रभुः॥33॥ |
| यियक्षवे पुनस्तस्मै कामं वित्तं प्रदत्तवान्। ब्रह्मण्यत्ववदान्यत्वे प्रशशंसुः प्रजाः प्रभोः॥34॥ |

इत्थं विभज्य विप्रेभ्यो विश्वेशो वित्तमुत्तमम्।

सानुजः सह जानक्या जनकं द्रष्टुमेयिवान्॥35॥

वाच ऊचुर्बहुविधाः शोकशङ्कुक्षतान्तराः।

तत्र जानपदाः पौरा नरा नार्य्यो निरीक्ष्य तान्॥36॥

यान्तं यमन्वेति चमूश्चतुरं चतुरङ्गिणी।

तमिमं सीतया साकमनुगच्छति लक्ष्मणः॥37॥

या न शक्या पुरा द्रष्टुं सत्वैराकाशगैरपि।

तामिमां राजमार्ग्गेऽस्मिन् वीक्षन्ते जानकीं जनाः॥38॥

मुञ्चतीमां श्रियं प्राप्तामीश्वरोऽप्यखिलेश्वरः।

कैकेय्या वाक्यमात्रेण पश्यतासङ्गितां प्रभोः॥39॥

यदि रामो वनं याति यामः सर्वे वयं सह।

नैनं विना हि जीवामो जलं जलचराइव॥40॥

आर्त्थवाचमनार्त्तस्तां शुश्रुवान् भगवानिति।

प्रहस्य प्राविशद् गेहं पितुर्न्नानाविलापिनः॥41॥

विज्ञाय राममायान्तं सुमन्त्रवचनान्नृपः।

दारार्द्धसप्तशतकं रामं द्रष्टुमुपाह्वयत्॥42॥

व्याप्तेन शोकवनवह्निजवेनराज्ञस्तातप्यमानसकलेन्द्रियसप्तधातोः।

रामाननेन्दुहसितामृतपूरवर्षैःसर्वाभितापशमनः सकृदाविरासीत्॥43॥

इति श्रीनारायणपण्डिताचार्य्यविरचिते रामाङ्के सङ्ग्रहरामायणे अयोध्याकाण्डे षष्ठः सर्ग्गः ॥2-6-43॥ [आदितःश्लोकाः 671+43=714]

| सप्तमः सर्गः ॥2-7-53॥ |
| --- |
| सिंहासनादुत्पपात राजा राममवेक्ष्य तम्।<br>एह्येहि राम वत्सेति शोकोत्कण्ठापरिप्लुतः॥1॥ |
| परिरम्भपरो राजा पतन्नप्राप्य राघवम्।<br>मामेति लोकनाथेन सहसा पर्य्यगृह्यत॥2॥ |
| परिरभ्य सुतं भूयः पर्य्यङ्के सन्निवेश्य सः।<br>सीतां सौमित्रिमप्याराद् विवक्षुर्म्मूर्च्छितोऽपतत्॥3॥ |
| स्त्रीसहस्रस्य रावोऽभूत् करुणो राजसंसदि।<br>राज्ञि मूर्च्छामुपायाते रामविश्लेषशङ्कया॥4॥ |
| मुहूर्त्तात् प्राप्तसञ्ज्ञं तं प्रोवाच पितरं प्रभुः।<br>तात मामनुजानीहि वनवासाभिकाङ्क्षिणम्॥5॥ |
| सीतेयं लक्ष्मणश्चायं वारितौ हेतुभिर्म्मया।<br>अप्यन्वागच्छतस्ताभ्यां ततोऽनुज्ञा प्रदीयताम्॥6॥ |
| इत्युक्त ऊचे राजेन्द्रः कितवायै वरावदाम्।<br>ततो मां शिक्षयित्वा तेयुक्तं राज्यस्य पालनम्॥7॥ |
| बत यास्यसि तात त्वमथवा सर्वथा वनम्।<br>नय मां नरवैडूर्य्य न जीवामि त्वया विना॥8॥ |
| इत्युक्त ऊचे रामस्तं नैवं वक्तुं त्वमर्हसि।<br>त्वमेव राजा भरतो युवराजो मदाज्ञया॥9॥ |

| |
|---|
| स्वर्गे वा नरके वाऽपि वने वा पट्टनेऽपि वा।<br>सुखमेव न मे दुःखं तस्मा त्वं निर्वृतो भव॥10॥ |
| राजारामस्य निर्बन्धं ज्ञात्वा मन्त्रिणमब्रवीत्।<br>सकोशरत्नस्त्रीरत्नं बलं राममनुव्रजेत्॥11॥ |
| कामं वने वसेद् रामो मम सर्वविभूतिभिः।<br>निर्द्धनायामयोध्यायां कैकेयीतनयो वसेत्॥12॥ |
| वयोज्येष्ठो गुणज्येष्ठः श्रेष्ठोऽयं सर्वदेहिनाम्।<br>कथं रामो भवेच्छोच्यः कैकेयीकैतवार्द्दितः॥13॥ |
| इत्याकर्ण्ण्य गिरं पत्युः क्रुद्धा कैकेय्यभाषत।<br>असमञ्जसवदा रामो ज्येष्ठोऽपि त्यज्यतामिति॥14॥ |
| धिग्धिक् पापीयसीमित्थमुक्त्वा राजन्यवाङ्मुखे।<br>सिद्धार्त्थनामा प्रोवाच महामात्रो नृपप्रियः॥15॥ |
| सरय्वां प्राक्षिपद् बालानिति त्यक्तोऽसमञ्जसः।<br>सगरेण पुरा राज्ञी वद रामस्य दूषणम्॥16॥ |
| निर्द्दोषं वृणुते नाथं सल्लोकोऽयं गुणार्ण्णवम्।<br>विनीतं तं प्रियं रामं कथं राजा परित्यजेत्॥17॥ |
| महामात्रे वदत्येवं कैकेयीं क्रूरवादिनीम्।<br>शपमाने च राजेन्द्रे राघवः पुनरब्रवीत्॥18॥ |
| राजन् राजविभूत्या किं राज्यं त्यक्तवतो मम।<br>गजं त्यक्तवतः पुंसः किं फलं राजकक्ष्यया॥19॥ |

| |
|---|
| सर्वं दास्यामि कैकेय्यै चीराण्येव वृणे स्वयम्।<br>खनित्रपिटके चोभे सशिक्ये नरनायक॥20॥ |
| भगवत्युक्तवत्येवं निर्ल्लज्जा कैकयात्मजा।<br>चीराणि परिधत्स्वेति ददौ रामाय संसदि॥21॥ |
| अविचार्य्यैव ते चीरे गृहीत्वा पर्य्यधात् प्रभुः।<br>विहाय वाससी सूक्ष्मे प्रसन्नाननचन्द्रमाः॥22॥ |
| स्वनाथं जगतां नाथं दृष्ट्वा तं चीरधारिणम्।<br>चीरे प्रदत्ते कैकेय्या पर्य्यधादाशु लक्ष्मणः॥23॥ |
| चीरे प्रदत्ते कैकेय्या गुग्धेवाऽऽदाय मैथिली।<br>ग्रीवायामेकमाबध्य रामं प्रेक्ष्येदमब्रवीत्॥24॥ |
| मुनिवध्वो निबध्नन्ति कथं चीरमिदं प्रभो।<br>इत्युक्त्वा चीरहस्ता सा तस्थौ लज्जावती सती॥25॥ |
| सत्वरः स त्वथोपेत्य कुशचीरं गृहीतवान्।<br>कौशेयोपरि सीताया रामस्तत् पर्य्यधापयत्॥26॥ |
| देवीं चीरधरां दृष्ट्वा वीरनाथामनाथवत्।<br>वसिष्ठे मन्युरूद्भूचन्दनाग इवानलः॥27॥ |
| मामेति सीतां संवार्य्य कैकेयीमब्रवीन्मुनिः।<br>अतिप्रवर्त्तसे पापे कैकेयि कुलदूषणि॥28॥ |
| त्वद्वरेणापि दुर्वृत्ते न गन्तव्यं हि सीतया।<br>सीता रामशरीरार्धं मेदिनीं पालयेत् पुरे॥29॥ |

| |
|---|
| सदारो याति चेद् रामो यामः सर्वे वयं वनम्।<br>भरतः सानुजो रामं चीरधार्य्यनुयास्यति।<br>शून्यामयोध्यामद्यास्व त्वं काळीव कलिप्रिये॥30॥ |
| वदत्येवं वसिष्ठे स्वं धिक्कुर्वाणे जने नृपः।<br>धर्म्माशां जीविताशां च चिच्छेद विरहे प्रभोः॥31॥ |
| रामस्यैकस्य पापिष्ठे वनवासो वरस्तव।<br>सीतालक्ष्मणयोः कस्माच्चीरमित्यवदन्नृपः॥32॥ |
| सर्वमाकुलमालोक्य रामो राजानमब्रवीत्।<br>मत्स्नेहादपि पाहीमां जननीं जनकाधुना॥33॥ |
| यत्कृपालुतयाऽऽकृष्टं निःसङ्गमपि मे मनः।<br>तस्यां मातरि मे तात कृपणायां कृपां कुरु॥34॥ |
| निशम्यैवं निगदितं राजा रामस्य गच्छतः।<br>मुक्तकण्ठो रुरोदोच्चैः प्रियैर्भार्याशतैर्युतः॥35॥ |
| चिरं विलप्य राजेन्द्रः कैकेयीं गर्हयन् मुहुः।<br>रामं पदातिमेष्यन्तं ज्ञात्वा सूतमभाषत॥36॥ |
| सुमन्त्रमम यानेन नन्दनं मे वनं नय।<br>मात्रा पित्रा च निर्यास्यः पुत्रो नन्वेवमीदृशः॥37॥ |
| इति राज्ञा समादिष्टः सारथी रथमानयत्।<br>सीतां दृष्ट्वा रुदन् भूपः कोशाध्यक्षमभाषत॥38॥ |

| |
|---|
| वरीयांसि च वासांसि पराध्य्याभरणानि च।<br>समाः सङ्ख्याय देह्याशु स्नुषायै मे यथेप्सितम्॥39॥ |
| इति राज्ञा नियुक्तेन राजामात्येन तत्क्षणात्।<br>दत्तैराकल्पवासोभिर्विरेजे वीरवल्लभा॥40॥ |
| स्नुषामुवाच कौसल्या लाळयन्ति सुतामिव।<br>माऽवमंस्था मुनिं रामं वत्से साध्वी भवेरिति॥41॥ |
| कान्ते त्रैलोक्यकान्ते मे स्थिरा भक्तिर्ग्गुणार्णवे।<br>आर्य्ये न प्राकृतस्त्री स्यामिति सीताऽभ्यभाषत॥42॥ |
| सीतामाश्लिष्य भाष्पाक्षी कौसल्या राममब्रवीत्।<br>पुत्र सीतां च सौमित्रिं त्वां च पाहि वनेश्विति॥43॥ |
| परिभावी न मे माता स्त्रैलोक्ये ससुरासुरे।<br>शीघ्रमेष्यामि चैताभ्यां प्रसीदेत्यब्रवीत् प्रभुः॥44॥ |
| रामोऽर्द्धसप्तशतकं मातॄणामभ्यवन्दत।<br>संवासे क्षम्यतामागः साध्वनुज्ञायतामिति॥45॥ |
| क्रौञ्चीनामिव देवीनां करुणे क्रन्दिते सति।<br>रामलक्ष्मणजानक्यो राजानं चाब्यवादयन्॥46॥ |
| परिक्रम्य महीपालं धर्म्मशिक्षणलक्षणाः।<br>कौसल्यां च सुमित्रां च क्रमेणैवाभ्य वादयन्॥47॥ |
| सुमित्रोचे प्ररुदिता वन्दमानं स्वनन्दनम्।<br>पुत्र सत्पुत्रवत्यस्मि त्वया पुत्रेण साधुना॥48॥ |

तरुणीं रमणीं त्यक्त्वा मां च यद् यासि राघवम्।
तात रामः ससीतस्ते जगन्नाथः परा गतिः॥49॥

एतावदुक्त्वा सौमित्रिं सुमित्रा राममब्रवीत्।
तातानुजस्तव प्रेष्यो लक्ष्मणः पाल्यतामिति॥50॥

एवमेवेति देवेशे ब्रुवाणे भास्वरं रथम्।
इङ्गितज्ञ उपानिन्ये सुमन्त्रो देशकालवित्॥51॥

सानुजो रथमारुह्य सीतामारोपयत् प्रभुः।
करं करेण सङ्गृह्य करेणुं करिराडिव॥52॥

अध्यास्त तद् युगपदेव युगं च योग्यं

रुच्या ततं दशमुखाक्रमणे प्रसिद्धम्।
अत्यायतं सुमनसां सुमनोरथं च

दिव्यं तदा दशरथस्य रथं स रामः॥53॥

इति श्रीनारायणपण्डिताचार्य्यविरचिते रामाङ्के सङ्ग्रहरामायणे अयोध्याकाण्डे सप्तमः सर्गः॥2-7-53॥
[आदितः श्लोकाः 714+53=767]

## अष्टमः सर्गः ॥8-63॥

चोदितोऽचोदयद् भ्रून्ना तं रथं सारथिर्य्यदा।
सबालवृद्धवनिताः प्रजास्तमनुदुद्रुवुः॥1॥

तृषार्त्ताइव तोयौघं भवार्त्ताइव माधवम्।
भयार्त्ताइव पातारं शोकार्त्ता राममन्वगुः॥2॥

| |
|---|
| सारथे स्थीयतां किञ्चिच्छनैर्वा नीयतां रतः।<br>रामाननेन्दुं पश्यामो द्रक्ष्यामस्तं कदा पुनः॥3॥ |
| धन्याऽसि देवी सीते त्वं धन्योऽसि त्वं च लक्ष्मण।<br>श्रेयः स्वर्ग्गापवर्ग्गाभ्यां यद् वां स्याद् रामदर्शनम्॥4॥ |
| जनेषु प्रवदत्स्वेवं राजा स्त्रीभिरनुद्रुतः।<br>रामं पुनर्द्दिदृक्षेऽहमित्युक्त्वा पुनराद्रवत्॥5॥ |
| धावतोः स्वखलतोर्भूयो बाष्पैरन्धीकृताक्षयोः।<br>मातापित्रोः प्रवयसोर्द्दशा कं न कृपां नयेत्॥6॥ |
| हा राम राम वत्सेति हा सीते लक्ष्मणेति च।<br>मातापित्रोः समाक्रन्दस्त्रैलोक्यकरुणोऽभवत्॥7॥ |
| तिष्ठतिष्ठेति राजेन्द्रो याहियाहीति राघवः।<br>सुमन्त्रमभितोऽब्रूतां सुमन्त्रो विक्लबोऽभवत्॥8॥ |
| नाश्रौषमिति राजेन्द्रं सुमन्त्रा ब्रूहि सङ्गमे।<br>इति रामोदितः सूतो रथं निन्ये कृताञ्जलिः॥9॥ |
| यं पुनर्द्दष्टुमन्विच्छेन्न तं दूरमनुव्रजेत्।<br>नृप एवं वसिष्ठाद्यैर्वारितोऽध्वन्युपाविशत्॥10॥ |
| प्राणिदेहादिव प्राणे सेतुबन्धादिवाम्भसि।<br>रामे निर्ग्गच्छति पुरात् सर्वमासीदमङ्गलम्॥11॥ |
| स्थावराणां तिरश्चां च शोकवह्निमदीपयत्।<br>रामदेवस्य विरहो मानवानां तु किम्पुनः॥12॥ |

| |
|---|
| शोचतः पततो राज्ञो मामेति सहसा सती।<br>कौसल्या दक्षिणं बाहुं कैकेयी वाममग्रहीत्॥13॥ |
| केकेयीमवलोक्याथ क्रुद्धो दशरथोऽब्रवीत्।<br>कर्म्मणा चण्डि चण्डेन चण्डाली त्वं न मां स्पृश॥14॥ |
| त्वया छलादवच्छिन्नं राज्यं चेद् भरतो भजेत्।<br>न तेन दत्तमुदकं प्रेतस्यापि प्रियं मम॥15॥ |
| तस्यैवं ब्रुवतो राज्ञो राममेवान्वगच्छताम्।<br>स्वभावायतनेत्रस्य नेत्रे अत्यायते तदा॥16॥ |
| चक्षुराद्यैरुपरतं रामेऽक्ष्यविषये सति।<br>रतमस्मिन् मनोवाग्भ्यां भूपतेर्य्योगिनो यथा॥17॥ |
| राममातुर्न्नयत मां कौसल्याया निवेशनम्।<br>रामपादारविन्दाङ्के भूतळे स्वस्ति मे भवेत्॥18॥ |
| एवं निगद्य सुचिरं विलप्य च महीपतिः।<br>कौसल्यालयमापेदे दिवाकर इवाम्बुदम्॥19॥ |
| राजा राममिहापश्यंश्चुक्रोशोद्बाहुरुच्चकैः।<br>हा राम क्वाऽसि सीते त्वं लक्ष्मणेति पुनः पुनः॥20॥ |
| शयानः शयने तत्र मग्नः शोकमहार्ण्णवे।<br>रामलीलां स्मरन्नेव सकलं कालमत्यगात्॥21॥ |
| अनुयातुमशक्तत्वाल्ललनाः सह बालकैः।<br>स्मरन्त्यो राममुद्बाष्पा न्यवर्तन्त गृहान् प्रति॥22॥ |

| |
|---|
| हा राम क्क प्रयासि त्वं सीतयेत्युरुरोदनाः।<br>अन्वधावन् समं पौरैः सर्वाः प्रकृतयः प्रभुम्॥23॥ |
| आधावतो रुद्धकण्ठान् प्राञ्जलीनश्रुलोचनान्।<br>जनांस्तान् मेघगम्भीरं प्रोवाच करुणाकरः॥24॥ |
| निवर्त्तध्वं च वर्त्तध्वं भरतस्यानुशासने।<br>स मे भक्तोऽनुजो राजा तन्मे शुश्रूषणं प्रजाः॥25॥ |
| इत्युक्ता अपि ते सर्वे तमेवान्वाद्रवन् द्रुतम्।<br>विप्रा मार्ग्गालसाः प्रोचुस्त्रयीवेदान्तपारगाः॥26॥ |
| हे जात्या वाजिनोऽस्माकं स्वामी नो नीयतां वनम्।<br>पुरमानीयतामेनं व्रजन्ति शरणं प्रजाः॥27॥ |
| पदातीनां द्विजातीनामिति श्रुत्वाऽऽत्र्थभाषितम्।<br>अवतीर्य्य रथाद् रामो ययौ मन्दं दयानिधिः॥28॥ |
| विप्राः प्राञ्जलयः प्रोचू रामं राजीवलोचनम्।<br>निवर्त्तस्व पुरं वत्स पालयास्मान् कृपालय॥29॥ |
| पश्येमान् प्रणतान् भूमौ हंसशुक्लशिरोरुहान्।<br>मुनीन् भगवतश्रेष्ठान् वाजपेयादियाजिनः॥30॥ |
| पश्यग्नीननुयातांस्त्वां वेदांश्चाङ्गानि चाधुना।<br>पश्येदं ब्राह्मणकुलं पर्य्याकुलमनाकुल॥31॥ |
| नानास्तम्बलतोपेता रुद्धापादा हि पादपाः।<br>अनुयातुमशक्तास्त्वामनुशोचन्ति शोभन॥32॥ |

| |
|---|
| तिर्य्यञ्चः कीटपर्य्यन्ता हन्तेमे मृगपक्षिणः।<br>भक्तवत्सल दृश्यन्तां खिन्ना भक्ताश्चराचराः॥33॥ |
| एकच्छत्रोचितो लोके त्वमच्छत्रो हि गच्छसि।<br>वयं त्वां वाजपेयोत्थैः श्वेतच्छत्रैरुपास्महे॥34॥ |
| प्रययौ भगवांस्तूष्णीं श्रृण्वंस्तेषां सरस्वतीम्।<br>सन्ध्यायां प्राप्तवान् नाम्ना तमसां च सरस्वतीम्॥35॥ |
| फलमूलोदकैर्वृत्तिरद्य प्राप्ता गृहं स्मरन्।<br>नोत्कण्ठां कुरु तातेति रामः सौमित्रमब्रवीत्॥36॥ |
| रामाज्ञया सुमन्त्रोऽश्वान् विमुच्य यवसं ददौ।<br>स सौमित्रिः शुभां शय्यां चक्रे च मृदुलैर्द्दलैः॥37॥ |
| अनन्तशय्यस्तां शय्यामध्यासामास सीतया।<br>सौमित्रिस्त्वनयोस्तूर्ण्णं चक्रे पादावनेजनम्॥38॥ |
| स तस्मिंस्तमसातीरे विमले गोकुलाकुले।<br>सन्ध्यामुपास्य शिश्येऽत्र पर्य्यङ्के सीतया समम्॥39॥ |
| सौमित्रिश्च सुमन्त्रश्च देवदेव्योरदूरतः |
| मनोरमान् रामगुणान् वर्ण्णयन्तौ स्म तिष्ठतः॥40॥ |
| रामोऽर्द्धरात्र उत्थाय सौमित्रिमिदमब्रवीत्।<br>पश्यपौरानिमान् सुप्तान् वनेषु भवनेष्विव॥41॥ |
| पुत्रमित्रकळत्राणि क्षेत्रवित्तगृहाणि च।<br>त्यक्त्वा मद्भक्तिसम्पूर्ण्णा मां योगिनइवान्वगुः॥42॥ |

अस्मिन् यामे वयं यामः सुप्तेष्वेतेषु सत्वरम्।
दुःसहो विरहो ह्येषां किं वा लक्ष्मण मन्यसे॥43॥

इत्युक्त्वा सूतमूचेऽसौ पौरव्यामोहनाय हि।
नयोदीचीं रथं क्षिप्रं निवर्त्तस्व पुनस्त्विति॥44॥

सुमन्त्रोऽथ तथा कृत्वा रथं भूम्ने न्यवेदयत्।
आरुरोह रथं रामः ससीतालक्ष्मणस्ततः॥45॥

रथमारुह्य तरसा तमसामतितीर्य्य सः।
तेनैव रात्रिशेषेण दीर्घमध्वानमत्यगात्॥46॥

प्रभाते सति पौरास्ते मन्वाना नगरं गतम्।
रामं लोकाभिरामं तं प्रहृष्टा नगरं ययुः॥47॥

अतिगच्छन् बहून् ग्रामान् कोसलान् कोसलेश्वरः।
वेदस्मृतिं नाम नदीं गोमतीं चात्यवर्त्तत॥48॥

दक्षिणाभिमुखं यान्तं दक्षिणं सरयूनदीम्।
तरन्तं कोसलाद्यास्तं सर्वे जानपदा ययुः॥49॥

दीनानश्रुमुखान् दृष्ट्वा भक्तांस्तान् विरहासहान्।
भूमा भुजं भुजङ्गाभमुद्यम्येदमभाषत॥50॥

वेदाहं भवतां भक्तिं भवनं प्रति गम्यताम्।
इत्युक्तास्ते ययुर्नत्वा वर्ण्णयन्तो गुणार्ण्णवम्॥51॥

द्विजसङ्घैः सदा सेव्यां भजतामघनाशिनीम्।
गच्छन्नाप त्रिपथगां गङ्गां रामस्त्रयीमिव॥52॥

| |
|---|
| ससीतं सानुजामात्यमिङ्गुदीवृक्षमूलगम्।<br>प्रणनाम प्रभुं प्राप्य निषादाधिपतिर्गुहः॥53॥ |
| तवेदं सपुरं राज्यं देव दासा वयं तव।<br>निवसात्रैव नाथेति गुहो राघवमब्रवीत्॥54॥ |
| वनवासेन देवस्य भक्तः खिन्नोमुहुर्गुहः।<br>सान्त्वितस्तेन यवसं रामश्वेभ्यो ददौ तदा॥55॥ |
| देवदेव्योः स सौमित्रिः पर्ण्णपर्य्यङ्कयातयोः।<br>पादावक्षाळयद् धन्यो रवावस्तुमुपेयुषि॥56॥ |
| सन्ध्यायां समतीतायां देवदेव्योः शयानयोः।<br>तिष्ठन्तं लक्ष्मणं वीक्ष्य गुह ऊचे धनुर्द्धरम्॥57॥ |
| वीर विश्रम्यतां किञ्चित् किङ्करो भवतामहम्।<br>आर्य्ययोः पालने युक्त इत्युक्तो लक्षणोऽब्रवीत्॥58॥ |
| वीक्ष्येमं पर्ण्णपर्य्यङ्कं प्रासादेऽनर्घशय्ययोः।<br>आर्य्ययोर्द्दूयते मे धीर्ग्गुह किं गूहयामि ते॥59॥ |
| हा रामेति विलोठन्तावनाथौ स्थविरौ भुवि।<br>पितरौ स्मरतो मेऽङ्कं निद्रा विद्राविता शुचा॥60॥ |
| गहासौमित्रिसूतानामित्थं रामप्रसङ्गिनाम्।<br>जाग्रतामेकभावानां सा व्यतीयाय शर्वरी॥61॥ |
| करेण ताम्रेण मनोहरेण स्पृष्टं मनाक् सुस्मितमुल्ललास।<br>रामेण देव्या वदनारविन्दं सूर्य्येण तुल्यं तरुणारिविन्दम्॥62॥ |

इति श्रीनारायणपण्डिताचार्य्यविरचिते रामाङ्के सङ्ग्रहरामायणे अयोध्याकाण्डेऽष्टमः सर्ग्गः॥2-8-62॥

[आदितः श्लोकाः 767+62 = 829]

## नवमः सर्गः॥2-9-50॥

रामाज्ञयाऽथ सौमित्रिः प्लवायाचोदयद् गुहम्।
गुहश्चोपानयन्नावं स्वरित्रां किङ्करैर्दृढाम्॥1॥

राघवो निरघं सूतं सुमन्त्रं प्रत्यमन्त्रयत्।
याहि सौम्याधुनाऽयोध्या पाहि तातं शुचाऽर्द्दितम्॥2॥

कैकेयीं नावमन्यध्वं कुरुध्वं भरतं नृपम्।
पितुराज्ञा तनुध्वं मे सर्वथैवं प्रियं मम॥3॥

तातं सान्त्वय सान्त्वज्ञ मम दीनां च मातरम्।
वसिष्ठादींश्च सर्वांस्त्वं नानुशोचन्तु मामिह॥4॥

एवमुक्ते भगवता लक्ष्मणः कुपितोऽब्रवीत्।
राजा कृतार्त्थः कैकेय्या रामं नानुस्मरेदिति॥5॥

इत्युक्त ऊचे भगवान् सूत मैवं नृपं वद।
श्रुत्वा क्रोधोक्तमस्येदं पिता जह्यादसूनिति॥6॥

याहीति चोदयन्तं तं सुमन्त्रः कलिताञ्जलिः।
मुक्तकण्ठो रुदन्नुच्चैस्तन्निगृह्येदमब्रवीत्॥7॥

हतवीरामिव चमूं निर्वीरामिव सुन्दरीम्।
त्वद्धीनां रथधुरं कथं नेष्यामि ते पुरम्॥8॥

| |
|---|
| पितरौ किं नु वक्ष्यामि पौरांश्च पथि पृच्छतः।<br>अयि देव दयाळो त्वं तव सेवां प्रशाधि मे॥9॥ |
| इत्युक्त ऊचे भगवांस्त्वयि याते वने रतम्।<br>मां प्रत्येष्यति कैकेयी सेवेयं मे भवेदिति॥10॥ |
| सान्त्वयित्वा तथा सूतं रामदेवेन चोदितः।<br>वटक्षीरं जटाः कर्त्तुमुपानिन्ये गुहो बहु॥11॥ |
| लक्ष्मणस्याऽऽत्मनश्चाथ जटाश्चक्रे जगद्गुरुः।<br>जटाभिस्तौ विरेजाते नरनारायणाविव॥12॥ |
| गुहसूतावनुज्ञाप्य विनीतावनुनीय च।<br>विचित्रारित्रसम्पन्नां नावं प्रापदनामयः॥13॥ |
| देवदेवाज्ञया देवीं नावमारोप्य वीर्य्यवान्।<br>लक्ष्मणः स्वयमारूढः पश्चाल्लक्ष्मणपूर्वजः॥14॥ |
| तारकैस्तार्य्यमाणा सा देवी देवान्तिके स्थिता।<br>तां गङ्गामवलोक्याथ मङ्गलाङ्गीदमब्रवीत्॥15॥ |
| हे विष्णुपदि धन्या त्वं ब्रह्मलोकादिहागता।<br>देवे वनान्निवृत्ते त्वां पूजयिष्यामि जाह्नवी॥16॥ |
| एवं ब्रुवन्त्यां वैदेह्यां परं पारं प्लवोऽगमत्।<br>अवरुह्य प्लवात् तस्माद् रामो लक्ष्मणमब्रवीत्॥17॥ |
| अग्रतो गच्छ सौमित्रे सीता त्वामनुगच्छतु।<br>अनुयास्याम्यनायासी त्वां च सीतां च पालयन्॥18॥ |

इत्येवं व्रजतोः स्वैरं रामरामानुजन्मनोः।

सुमध्यमा ययौ मध्ये करेणुः करिणोरिव॥19॥

ते गत्वा दीर्घमध्वानं प्राविशन्नद्भुतं वनम्।

न्यग्रोधमूलमासाद्य तत्र वासमकल्पयन्॥20॥

सीतालक्ष्मणयो रामो दर्शयामास पद्मिनीम्।

सुदर्शनां नाम ततः पद्मान्यदत्त लक्ष्मणः॥21॥

पदपद्मोपमं पत्युः पद्ममादाय मैथिली।

विरराजान्तिके भर्त्तुःसुन्दरीवेन्दिरा स्वयम्॥22॥

ते त्रयोऽत्र त्रिरात्रान्ते मृणालादनतर्प्पिताः।

अवसंस्तत्र तां रात्रिं नानासङ्कथनैः सुखम् ॥23॥

प्रभाकरे प्रभातेऽथ प्रतस्थुस्ते ततो वनात्।

बहून् बहुविधान् देशान् पश्यन्तः शीघ्रगामिनः॥24॥

अल्पावशेषे दिवसे रामो जायानुजान्वितः।

सङ्गमं गतवान् पुण्यं गङ्गायमुनयोः प्रभुः॥25॥

ऋषिर्बृहस्पतिसुतो भरद्वाजो जगत्प्रभुम्।

तस्यैव वचनाज्ज्ञात्वा पूजयामास भक्तिमान्॥26॥

तं सजायानुजं देवमर्घ्यमूलफलादिभिः।

परिपूज्य जगत्पूज्यमासीनमृषिरब्रवीत्॥27॥

उत्तमश्लोक सुचिरात् त्वां दिदृक्षामहे वयम्।

त्वद्दर्शनान्तः सन्तापः सन्ततोऽपि हि देहिनाम्॥28॥

| |
|---|
| इदं क्षेमकरं क्षेत्रं क्षेत्रज्ञ स्वैरमावस।<br>तन्वानोऽतनुमानन्दमस्माकं क्षेत्रवासिनाम्॥29॥ |
| इत्युक्तो भगवानूचे प्रेक्षका हि जना इह।<br>ससीतं मां संव्रजेयुरेकान्तं मे वदेरिति॥30॥ |
| कपालशिर आदीनां सिद्धिभूमिं तपस्विनाम्।<br>ततस्त्रियोजनाभ्याशे चित्रकूटं द्विजोऽब्रवीत्॥31॥ |
| तस्यां रात्र्यां व्यतीतायां रामो जायानुजान्वितः।<br>अभिनन्द्य मुनीन्द्रं तं पश्चिमाभिमुखो ययौ॥32॥ |
| यामुनाद्रिमथ प्राप्य यमुनां प्रभुरैक्षत।<br>सप्तसप्तेरिवाश्वाळिं सत्वरां शाममलश्रियम्॥33॥ |
| खण्डयित्वाऽथ खड्गेन लक्ष्मणो नळवेतसान्।<br>रामाज्ञया व्यधात् तत्तु सङ्घाटं वेत्रबन्धनैः॥34॥ |
| रामो गहीत्वा वैदेहीं किञ्चिल्लज्जास्मिताननाम्।<br>आरोपयत् तं सङ्घाटं भूषणान्यायुधानि च॥35॥ |
| राघवौ ययतुर्व्वीरौ सङ्घाटं परिगृह्य तम्।<br>काळिन्द्या दक्षिणं तीरं दक्षिणौ रामलक्ष्मणौ॥36॥ |
| यमुनावनमभ्येत्य तटाके बहुपुष्करे।<br>किञ्चिद् विश्रम्य यान्तस्ते श्यामं न्यग्रोधमाययुः॥37॥ |
| यापयामास भगवानग्रतो भरताग्रजम्।<br>रामः  स्वयं पृष्ठतोऽगाज्जानकी मध्यतो ययौ॥38॥ |

| |
|---|
| गव्यूतिमात्रं गत्वा ते ततोऽपि यमुनातटे।<br>हत्वा मृगानुपादाय तां निशामवसन्निह॥39॥ |
| श्रान्तं भुवस्तळे सुप्तं लक्ष्मणं लक्ष्मणाग्रजः।<br>कराभ्यां शङ्कराभ्यां तं परिमृज्योदबोधयत्॥40॥ |
| ततस्ते प्रस्थिताः प्रातश्चित्रकूटं गिरिं गताः।<br>तत्राऽऽश्रमं श्रमोपेता अनुरूपममन्वत॥41॥ |
| मन्दाकिनीपरिगतं मन्दानिलहिमं वनम्।<br>देवीं देवोऽभिनन्द्यात्र सार्वकामिकमैक्षयत्॥42॥ |
| शाले विशाले चक्राते पादपैर्गजपातितैः।<br>लतावितानैराबध्य पर्णैरास्तीर्य्य राघवौ॥43॥ |
| अशोधयत स्थलं कृत्वा लक्ष्मणः पर्णशालयोः।<br>देवी शाले अलञ्चक्रे मार्त्तिकैरनुलेपनैः॥44॥ |
| रामानुजो रामगिरा हत्वा कृष्णमृगं वने।<br>जनयित्वाऽग्निमचिराच्छ्रपयित्वा न्यवेदयत्॥45॥ |
| सतां पतिः ससीतोऽथ स्नात्वा विहितमाचरन्।<br>जुहाव हविषो भागं बर्हिरिध्मादिभिः क्रमात्॥46॥ |
| निवेद्य वासुदेवाय देवाय स्वात्मने हविः।<br>पितृभ्योऽथ पवित्रेषु निवापं सजलं ददौ॥47॥ |
| पञ्चयज्ञांश्च यज्ञेशो विधायैवं सलक्ष्मणः।<br>हविष्यं बुभुजे दिव्यं देव्या पात्रे समर्प्पितम्॥48॥ |

परिवेषं सुवेषाऽथ भर्तृदेवरयोरिह।
विधाय भर्त्तुरुच्येषं कान्तैकान्त उपाददे॥49॥

पर्ण्णशालां विशालां तां रामो राजीवलोचनः।
वैकुण्ठइव वैकुण्ठं प्राविशत् प्रियया समम्॥50॥

नानाफलप्रसवपत्रगणोपहारं मालिन्युदारसलिलैरुपसर्प्पणं च।
आलोक्य लक्ष्मणसमीरणयोः स्वसेवां रामश्च रामरमणी च मुदं दधाते॥51॥

इति श्रीनारायणपण्डिताचार्य्यविरचिते रामाङ्के सङ्ग्रहरामायणे अयोद्याकाण्डे नवमः सर्ग्गः॥2-9-51॥
[आदितः श्लोकाः 829+51=880]

## दशमः सर्गः ॥2-10-61॥

रामदेवविहरानलदूनास्तद्गुणान् जगुरथामृततुल्यान्।
नागराः सवनिताः शिषुवृद्धा मातरोऽस्य जनकः स्वजनाश्च॥1॥

रामरूपमखिलेन्द्रियरम्यं दर्शयन् विहसितामृतसारम्।
सध्य एव पिद्धासि दृशां नो हा विधे तव दया क्व नु याता॥2॥

पूर्त्तमिष्टमुदितं विदितं वा यद्यदस्ति हि शुभं विहितं नः।
तेन तुष्टिमुपगम्य परात्मा रामदर्शनसुखं प्रदिशेन्नः॥3॥

अत्र सन्निहितमात्मकटाक्षं भाग्यदेव्यगमयद् वनवीथीम्।
तेन तत्र विलसन्ति समस्तश्रीपदानि रघुनाथपदानि॥4॥

किं नु तेन सुकृतं कृतमासीन्मार्ग्गजेन तृणगुल्मगणेन।
ब्रह्मरुद्रमकुटोपनिवेश्यं यं परिस्पृशति रामपदाब्जम्॥5॥

| |
|---|
| रामपादरजसा विरजस्का पावनीभवति सा वनराजिः।<br>यां करेण करुणाकर आरादिन्दिराकरसखेन निमार्ष्टि॥6॥ |
| ता नदीर्न्न भजते भुवने को यासु मज्जति जगत्पतिरेषः।<br>यत्पदे सपदि सङ्गममात्रज्जाह्नवी शिवशिरोमणिरासीत्॥7॥ |
| चारुचीरमचिरादुपयातं प्रेष्ठबन्धुमिव बन्धुरमारात्।<br>तं जटावलयिनं किलदृष्वा पूजयन्ति मुनयः कृतकृत्याः॥8॥ |
| चापपाणिमवलोक्य ससीतालक्ष्मणं भुवनसुन्दरमेनम्।<br>तर्कयन्ति सरतिं रतिनाथं कानने मधुसखं मुनिवध्वः॥9॥ |
| यत्रयातिरघुसन्ततिकेतुस्तत्रसम्पदतुला न विपत्तिः।<br>सौख्यमूर्तिरिति नैव स शोच्यस्तद्वियोगिजनतैव हि शोच्य॥10॥ |
| किं धनैः प्रियजनैरथ किं वा किं सुतैः किमपरैरपि हृद्यैः।<br>स्याम रामगुणकीर्त्तनतृप्ता यावदायुरपि तच्चरणाप्त्यैः॥11॥ |
| इत्थमुत्थितविरागविवेकास्ते जना हृदि जनार्द्दनमाप्य।<br>योगिवत् सकलकालमवश्यं निन्यिरे सफलमेव हि धन्याः॥12॥ |
| राम रम्यहसितामृत सीते लक्ष्मण क्व नु वने द्रवथाद्य।<br>हा हतोऽस्मि विरहादिति राजा सुस्वरं स विविधं विललाप॥13॥ |
| एकमेकमपि रात्रि विशेषं कल्पकल्पमनयत् पृथिवीशः।<br>क्लेश एव परमं तप आसीद्रामसंस्मृतिबलाद् बत राज्ञः॥14॥ |
| तं रथं समधिरुह्य सुमन्त्रः शोकशोषितमनाः पुरमायात्।<br>तं परीत्य जनता नगरस्था तत्र राममनवेक्ष्य रुरोद॥15॥ |

| |
|---|
| राघवस्य ननु मन्त्रिवरस्त्वं त्यक्तवानसि वने क्व नु रामम्।<br>दुःसहामिति गिरं परिशृण्वन् बाष्पवान् नृपगृहं प्रविवेश॥16॥ |
| रामदूतमवलोक्य सुमन्त्रं मूर्च्छितो नरपतिः स मुहूर्त्तम्।<br>वल्लभाशतवृतोऽथ ससञ्ज्ञः पृष्टवान् सपदि राघववृत्तम्॥17॥ |
| राघवस्य रमणीय मुदन्तम् कीर्त्तयन् स जनतापमुदास।<br>वर्षुकोऽम्बुदइवाम्बु सुमन्त्रो रामवाचमपि तावदुवाच॥18॥ |
| नन्दयिष्यति नरेन्द्र भवन्तं नन्दनः समयमेनमतीत्य।<br>त्वां सदा परिचरन्ननुरागात् साधु शास्तु भरतः किल राज्यम्॥19॥ |
| वन्दते भुवनवन्द्यपदस्त्वां सुन्दरीच मिथिलेन्द्रसुता सा।<br>लक्ष्मणश्च परितप्तमनास्ते हेळनेन महिळाविहितेन॥20॥ |
| राममातरुपचर्य्य सदा त्वं रामतातमखिलं त्यज शोकम्।<br>राम एष्यति मुदे तव सत्यं रम्य एष ननु रामनियोगः॥21॥ |
| ताम्यति स्म वनमम्बुजिनीभिः कस्य रामविरहेण न शोकः।<br>स्याच्चराचरगतिस्तव सूनुर्म्मानदेति निजगाद सुमन्त्रः॥22॥ |
| राम वत्स विपिने क्व नु शेषे कुत्र तन्वि परिताम्यसि सीते।<br>क्वाऽसि लक्ष्मणसुतेति रुदन्तौ स्माऽह रामपितरावथ सूतः॥23॥ |
| हे नृदेव नरदेवि न तापो राघवेनिजसुखामृतपूर्णो।<br>नो भयं स्वबलधारितलोके सर्वसद्गुणनिधौ न हि दोषः॥24॥ |
| न प्रताम्यति न सीदित सीता सौमनस्यमपि नैव जहाति।<br>राममानसमिता मलहीनं पद्मपाळिरिव हन्त हसन्ती॥25॥ |

| |
|---|
| रामपादमुपसेव्य कृतार्थौ लक्ष्मणः पुरुषलक्षणदक्षः।<br>शोच्यता न खलुतेषु ततः स्यान्निर्य्ययाविति निगद्य सुमन्त्रः॥26॥ |
| हा हताऽस्मि नरनाथ बताहं मत्सुतस्य विरहानलदूना।<br>त्वं रमस्व मम कान्त सपत्न्येत्यत्र रामजननी विललाप॥27॥ |
| देवि मैवमभिधेहि सती त्वं मा क्षतं मम मनोऽथ च भिन्धि।<br>राममातरुपसंस्पृश दोर्भ्यां मां बतेति नरदेव उवाच॥28॥ |
| वल्लभ प्रलपितं बहुशोकोन्मत्तया ननु मया न विवेकात्।<br>हा क्षमस्व सुजनेति गदन्ती तत्र राजमहिषी प्रणनाम॥29॥ |
| पञ्चकल्पसदृशाः प्रभुपित्रोः पञ्च रामरहिता दिवसास्ते।<br>पञ्चमेऽह्नि विगतेऽथ सुमित्रा नक्तमभ्यदित तौ विलपन्तौ॥30॥ |
| नो कटु स्पृशति यं कटुरश्मिर्य्यत्र वात उत वाति न तीक्ष्णम्।<br>विश्वमानमति यं बत रामं नैष शोच्य इति शोभननीतिः॥31॥ |
| आपदं समपनेष्यति रामः सम्पदं ध्रुवमुपैष्यति देवः।<br>यद्यपास्यति रविस्तिमिरौघं यद्यसावुदयमेति सुतेजाः॥32॥ |
| जानकी जगति धन्यतमाऽसाविन्दिरैव ननु सुन्दरपत्नी।<br>नानुशोकपदमेवमवश्यं लक्ष्मणः स हि तयोः प्रियदासः॥33॥ |
| शान्तयोरिति शुभेन सुमित्रासान्त्वितेन बत राघवपित्रोः।<br>शोकवह्निरथ चोषसि निद्राभस्मना क्षणमभूदुपगूढः॥34॥ |
| षष्ठ एव दिवसेऽथ निशीथे शोकशोषितमना नरदेवः।<br>संस्मरन् स्वकृतदुष्कृतवीर्य्यं राममातरमवेक्ष्य जगाद॥35॥ |

| |
|---|
| ईश्वरः खलु शुभाशुभमूलं भावयेत् स हि सुखासुखभोगम्।<br>अत्र जन्मनि परत्र पुनर्वा तन्वि तत्रहि निदर्शनमेतत्॥36॥ |
| शब्दवेधपटुना मृगयायां तिष्ठतोषसि वने द्विपबुद्ध्या।<br>कुम्भमम्भसि निमज्जितवान् द्राक् सूदितो ननु मया मुनिसूनुः॥37॥ |
| सानुतापमवलोक्य विषण्णं मां तदा करुणयर्षिकुमारः।<br>स्यान्न ते नविदुषो द्विजहत्या राघवेति निगदन् दिवमाप॥38॥ |
| अन्धयोः स्थविरयोर्म्मुनिपित्रोः पार्श्वमेकसुतयोरहमाप्य।<br>आर्ज्जवं परमवेत्य शुचाऽऽर्त्तः प्रावदं बत मुदन्तमुदन्तम्॥39॥ |
| आवयोस्त्वयि हि तात निविष्टं जीवितं च सुकृतं च गतसत्वम्।<br>यज्ञदत्त नय नौ द्रुतमित्थं तत् तपस्विमिथुनं विललाप॥40॥ |
| त्वं च पुत्र विरहात् त्यज देहं पार्त्थिवेति सति मामथ शप्त्वा।<br>तापसस्तनयतापपरीतः स्वर्ग्गमार्ग्गमगमत् सह पत्न्या॥41॥ |
| दुष्कृतं ननु कृतं तदिदं मे तत्फलं मरणमेव न चान्यत्।<br>भेषजं मम सुतस्य मुखेन्दोर्द्दर्शनामृतमुपागतमृत्योः॥42॥ |
| श्यामलं सुलळितं विमलाङ्गं कोमलं कमलचारुतराक्षम्।<br>आव्रजन्तमवलोक्य हि लोको धन्यतां व्रजति मे तनयं तम्॥43॥ |
| पादपद्मगुणनिर्ज्जितपद्मं यात्रया द्विरदराजसपत्नम्।<br>प्रेक्षते भुवनभूषणरत्नं पुण्यवान् पुनरवेक्षणनूत्नम्॥44॥ |
| वीरवर्य्यमचिरद्युतिचीरं दीर्घबाहुमिषुकार्म्मुकपाणिम्।<br>आयतोरसमवेक्ष्य सुतं मे कस्यतृप्यतिमनो नयनं वा॥45॥ |

| |
|---|
| कम्बुकण्ठमरुणाम्बुजमाल्यं प्रोल्लसन्मकरकुण्डलगण्डम्।<br>विद्रुमाधरमहो मम पुत्रं द्रक्ष्यतीक्षणमिदं तु कदा नु॥46॥ |
| अर्द्धचन्द्रमिव तस्य ललाटं चन्द्रसुन्दरकलामिव हासम्।<br>पूर्णचन्द्रमिव तस्य मुखाब्जं पश्यतः क्व परितापलवोऽपि॥47॥ |
| राजमौलिमणिमद्भुतमौलिं सीतया सह वरासनमाप्तम्।<br>लक्ष्मणाचलितचामरमाराद् वीक्षिता मम सुतं पुरि धन्यः॥48॥ |
| ज्ञानयज्ञनिजधर्म्मगुणैर्म्मे तुष्टिमेति यदि नाम विधाता।<br>रामदर्शनसुखं प्रतिदद्यादुद्भवान्तरगताय च मह्यम्॥49॥ |
| इत्यमुष्य स विलापविशेषः शेषतामुपजगाम समाधेः।<br>येन रामपदवेद्यमुदारं ब्रह्म नन्दनधियाऽपि स दध्यौ॥50॥ |
| वैष्णवं पदमवाप स राजा राजहंसइव निर्म्मलरूपः।<br>तच्छरीरमपहाय कृतार्थो वृक्षनीळमिव भीतिसनीळम्॥51॥ |
| रामकीर्त्तनरसामृततृप्तं सुप्तमात्मदयितं प्रतितर्क्य।<br>राममेव हृदयेन दधाना स्वापमापमहिषी क्षितिभर्त्तुः॥52॥ |
| आहरन् परिजना जनभर्त्तुः कानकेषु करकेषु जलानि।<br>वन्दिनः प्रतिववन्दिर एनं कल्यएतदघमप्रतिबुध्य॥53॥ |
| पादशैत्यमवगम्य हि भर्त्तुः पादसेवनकृतो नृपनार्य्यः।<br>आत्मकान्तमुपलभ्य परेतं चुक्रुशुर्न्निजतनूः प्रहरन्त्यः॥54॥ |
| तत्र रामजननी प्रतिबुद्धा प्राणनाथमवलोक्य गतासुम्।<br>व्याललाप मृदुमङ्गलतां स्वां ताडयन्त्यतितरां सुसुमित्रा॥55॥ |

हा पते ननु सुतप्रणयी त्वं स्वां तनुं त्यजसि रामवियोगे।
त्वां च तं च परिहाय न दीर्णं कर्कशं हि कुलिशाद् हृदयं मे॥56॥

नन्दनेन रमणेन च हीनां निन्दितां जगति धिग्धिगवीराम्।
हा विधातरुपयापय पारं मा नृशंस इति नाम लभेथाः॥57॥

राज्यमागतमिदं त्वयि दैवात् सर्वमेव खलुकैकयपुत्रि।
भुङ्क्ष्व साम्प्रतमकण्टकमेतत् त्वत्सपत्नविलयोऽखिल आसीत्॥58॥

इत्यहो विलपितं भुवि पन्नं लोठितं च बहु ताडितमङ्गम्।
स्त्रीशतैः सह हि रामजनन्या तत्र कस्य करुणा न बभूव॥59॥

स्त्रीगणं तमपसार्य्य वसिष्ठस्तां च रामजननीमपयाप्य।
देशकालविदसावधितैलद्रोणि पार्त्थिवतनुं प्ररक्ष॥60॥

रामं रम्यं मरकतमणिश्यामलं कोमलाङ्गं
स्मेरं वीरं मणिघृणिकनत्कुण्डलोल्लासिगण्डम्।
कौसल्या स्वं तनयमुदितं चित्तपद्मे दयालुं
सान्त्वार्त्थं वा सपदि समुपश्लिष्य शोकं मुमोच॥61॥

इति श्रीमन्नारायणपण्डिताचार्यविरचिते रामाङ्के सङ्ग्रहरामायणे अयोद्याकाण्डे दशमः सर्गः ॥2-10-61॥ [आदितः श्लोकाः 880+61=941]

## एकादशः सर्गः ॥2-11-63॥

वैनतेयोदये प्राप्ते वैनतेयध्वजप्रियाः।
ब्राह्मणा राज्यकर्त्तारः सभां प्रापुः ससङ्कटाः॥1॥

मार्कण्डेयो वामदेवो मौद्गल्यः काश्यपो मुनिः।
कात्यायनो गौतमश्च जाबालिरिति सद्गुणाः॥2॥

| |
|---|
| पुरोहितं पुरोधाय वसिष्ठं सममन्त्रयन्।<br>रामे वनं गते राज्ञि स्वर्ग्गते कार्य्यमत्र किम्॥3॥ |
| क्षित्यामराजकायां स्युर्द्दोषाः सर्वभयङ्कराः।<br>भरतः सानुजस्तस्मादानेतव्यो गिरिव्रजात्॥4॥ |
| वसिष्ठ एवं निश्चित्य राजामात्यान् समादिशत्।<br>भोभो विजय सिद्धार्त्थ जयन्ताशोक गच्छत॥5॥ |
| आयातु भरतस्तूर्णं मदाज्ञेति निवेद्यताम्।<br>अयं रामविवासश्च राज्ञो मृत्युश्च नोच्यताम्॥6॥ |
| वासोरत्नधनाकल्पा दीयन्तां कैकयाय च।<br>कथयित्वेति पाथेयं दत्वा दूतानयातयत्॥7॥ |
| वसिष्ठेन गरिष्ठेन त्वरितं प्रेषितास्ततः।<br>ते हस्तिनपुरे गङ्गां तीर्त्थ्वा प्रत्यङ्मुखा ययुः॥8॥ |
| अतीत्य पाञ्चालकुरूनिक्षुमत्यादिका नदीः।<br>बाह्लीकानतिगत्याऽऽपुः केकयान् सप्तमे दिने॥9॥ |
| यां रात्रिं तत्रते यातास्तामेव भरतोऽप्यथ।<br>दुःस्वप्नमवलोक्याभूच्छोकाकुलितमानसः॥10॥ |
| सागरं शुष्कमद्राक्षीच्चन्द्रं च पतितं भुवि।<br>रक्तमाल्यं स्वपितरं गोमये मुक्तमूर्द्धजम्॥11॥ |
| पिबन्तं तैलमसकृद्धसन्तं खरवाहनम्।<br>स्थितं कार्ष्ण्यायसे पीठे कृष्णवस्त्रं तमैक्षत॥12॥ |

| |
|---|
| दुःस्वप्नेनाऽऽकुलः प्रातः प्राप्तान् दूतान् पदे नतान्।<br>सर्वान् कुशलिनोऽपृच्छद् भरतो भयविक्लबः॥13॥ |
| सर्वान् कुशलिनः प्रोच्य दूतास्ते पुनरब्रुवन्।<br>कृत्यमात्ययिकं कर्त्तुमाह्वानं तत् पुरोधसः॥14॥ |
| मातामहं मातुलं च गुरुं चाऽपृच्छ्य सत्वरः।<br>धनं च मातुलप्रत्तं सैन्यं चाऽऽदाय यातवान्॥15॥ |
| शतद्रुवेदधामादिनदीस्तीर्त्वाऽथ सत्वरः।<br>देशानतीत्य विविधान् सप्तमेऽह्नि पुरं ययौ॥16॥ |
| अप्रहृष्टजनां पश्यन्नप्रहृष्टमनाः पुरीम्।<br>भरतो भयसम्भ्रान्तो जनन्यन्तः पुरं ययौ॥17॥ |
| कैकेयी सुतमालोक्य चिरप्रोषितमागतम्।<br>उत्थायाऽऽश्लिष्य पप्रच्छ बन्धूनां कुशलं मुदा॥18॥ |
| भरतस्तान् कुशलिनः प्रोच्य पप्रच्छ मातरम्।<br>कुत्राऽस्ते मे पिता तस्य वन्देय चरणाविति॥19॥ |
| तात ते स्वर्ग्गतस्तातो यज्वा विपुलदक्षिणः।<br>इति मातृक्तिबाणेन भरतो मूर्च्छितोऽपतत्॥20॥ |
| कैकेय्योत्थापितः सञ्ज्ञां सम्प्राप्य पुरुषर्षभः।<br>रुदन् बाष्पाभिपूर्णाक्षो विलप्येदं वचोऽब्रवीत्॥21॥ |
| अभिषेक्ष्यति मे तातो नूनं रामं ममाग्रजम्।<br>इत्यहं हर्षितः प्राप्तो मन्दभाग्यो महापदे॥22॥ |

| |
|---|
| ज्येष्ठाय सर्वश्रेष्ठाय रामाय स्वामिने मम।<br>कृपाकराय गुरवे ब्रूहि मां दासमागतम्॥23॥ |
| भवापदो विनश्यन्ति यत्पादाम्बुजसेवया।<br>तस्य रामस्य नाथस्य कुर्य्यां पादाभिवन्दनम्॥24॥ |
| पिता दैत्यविदारी मे मारितः केन हेतुना।<br>चरमं व्याहृतं तस्य किं च तत् कथ्यतामिति॥25॥ |
| रामं ससीतं द्रक्ष्यन्ति धन्याः सिद्धार्त्थमागतम्।<br>हा रामेत्युत्तरं वाक्यं तस्येत्यम्बा तमब्रवीत्॥26॥ |
| मम नाथो जगन्नाथः ससीतः कुत्र वर्त्तते।<br>इति पप्रच्छ भरतो महादुःखाग्निशङ्कया॥27॥ |
| रामः ससीतासौमित्रिश्चीरी वनमितो गतः।<br>इत्युवाच प्रियंमत्वा कैकेयी तस्य विप्रियम्॥28॥ |
| विवासः श्रीनिवासस्य कस्माद्धेतोरजायत।<br>अनवद्यस्यतस्येति पप्रच्छ भरतोऽथ ताम्॥29॥ |
| इत्याकुलतरं पुत्रं कैकेयी वाक्यमब्रवीत्।<br>सत्यं रामोऽनवद्यात्मा चन्द्रवद् रञ्जयन् प्रजाः॥30॥ |
| तस्योद्यतेऽभिषेकेऽत्र कृतवत्यस्मि ते हितम्।<br>रामस्यतु वने वासं राज्ये त्वदभिषेचनम्॥31॥ |
| आत्माज्ञया वनं याते सीतासौमित्रिसंयुते।<br>रामे हा रामरामेति राजा शोकाद् दिवं गतः॥32॥ |

| |
|---|
| जुगुप्सितमिदं कर्म्म त्वयि स्नेहान्मया कृतम्।<br>रक्ष राज्यं स्वधर्म्मेण यत्नं मे सफलं कुरु॥33॥ |
| जाज्वल्यमाने शोकाग्नाविति वाक्येन पातितः।<br>तातप्यमानो भरतः कैकेयीमिदमब्रवीत्॥34॥ |
| हत्वा मे पितरं घोरे प्रवास्य च ममेश्वरम्।<br>रामं दुःखे महद्दुःखं क्षतेक्षारमिव व्यधाः॥35॥ |
| ब्रह्मभ्रूणवधाभ्यां च दोषौ लक्षगुणोल्बणौ।<br>कृत्वा त्वदर्त्थमित्युक्त्वा मां च भस्मीकरोष्यहो॥36॥ |
| पापिष्ठे राजनिधनं रामप्रव्रजनं च ते।<br>राज्यभोगाय मे नैव तत्र स्युः साक्षिणः सुराः॥37॥ |
| त्वद्देहादुदभूद् देहो योऽयं दूषणभूषणे।<br>इमं तु सन्त्यजाम्यद्यमा भून्मेदेवहेळनम्॥38॥ |
| सहस्रपुत्रा सुरभिः खिन्ना स्मृत्वा कृशौ सुतौ।<br>एकपुत्रा च कौसल्या तद्वियोगं सहेत किम्॥39॥ |
| न त्वमश्वपतेः पुत्री पुत्री त्वं रक्षसो ध्रुवम्।<br>यया नाथो जगन्नाथस्त्यक्तः कान्तश्च सूदितः॥40॥ |
| तस्याऽर्त्तगिरमाश्रुत्य भृशार्त्तो लक्ष्मणानुजः।<br>ज्येष्ठं पतितमुत्थाप्य क्षुभितो वाक्यमब्रवीत्॥41॥ |
| कथं लोकैकनाथेन राज्यं त्यक्तं स्त्रिया गिरा।<br>कथं वा लक्ष्मणो धीरो यान्तं रामं न रुद्धवान्॥42॥ |

| |
|---|
| एवं ब्रुवाणस्तां कुब्जां कैकेयीभेदकारिणीम्।<br>श्रुत्वा ददर्श प्रद्वारेसर्वाभरणभूषिताम्॥43॥ |
| शत्रुघ्नः शत्रुदर्प्पघ्नश्चूडे सङ्गृह्य तां खलाम्।<br>चकर्षामर्षताम्राक्षः स्मरंस्तस्याः कुमन्त्रितम्॥44॥ |
| कुब्जाबन्धुजने याते कौसल्यां शरणार्त्थिनि।<br>पुरश्चकर्ष कैकेय्या हा हताऽस्मीतिवादिनीम्॥45॥ |
| रेणुनाऽपूरयत् तस्याः क्रोशन्त्या मुखकोटरम्।<br>घोरां गां मेघगम्भीरामब्रवीच्चान्तकोपमः॥46॥ |
| पितरं घातयित्वा त्वं स्वामिनं च विवास्य नः।<br>कथं जीवसि दुर्वृत्ते दुर्वृत्तां समुपाश्रिता॥47॥ |
| अद्य नेष्याम्यहं मृत्युं मन्थरे त्वाममन्थराम्।<br>ईश्वरी तव कैकेयी नश्वरीं त्वां तु पश्यतु॥48॥ |
| कर्षन्तमिति तां पापां शत्रुघ्नं भरतोऽब्रवीत्।<br>मयैव वध्या तातेयं कैकेयी मन्थरायुता॥49॥ |
| राजर्षिधर्म्मो रामो मां स्त्रीघातीति परित्यजेत्।<br>तत्पादपांसुलोभेन ध्रुवमेतां सहावहै॥50॥ |
| पाशेन पशुवद् बध्वा विवशान् स्ववशो प्रभुः।<br>कर्षत्यस्मान् कृतान्तोऽयं वत्स तस्मात् सहावहै॥51॥ |
| एवमुक्त्वा स भरतः सानुजः प्रस्थितो द्रुतम्।<br>कौसल्यां च सुमित्रां च ववन्दे भयकम्पितः॥52॥ |

| |
|---|
| राममाता तमाश्लिष्य रामविश्लेषकर्शिता।<br>रामभक्तमुवाचाथ रामभ्रातृव्यशङ्कया॥53॥ |
| वत्स राज्यं चिरं भुङ्क्ष्व मात्रा ते प्रतिपादितम्। |
| घातयित्वा हि ते तातं कालयित्वा तवाग्रजम्॥54॥ |
| मां च  तत्र नयत्वेषा त्वं वा मां नय पुत्रक।<br>ससुमित्राऽथवा यायां स्वयमेव सुतान्तिकम्॥55॥ |
| कौसल्याया अकल्योऽसौ सोडुमेतदुदीरितम्।<br>हा मातरिति तत्पादे पतित्वेदमभाषत॥56॥ |
| मां शुद्धभावमज्ञात्वा मातर्म्मा त्वं निराकुरु।<br>रामपादैकदासोऽहं सत्यमेतद् ब्रवीमि ते॥57॥ |
| गुरुद्रुहां च मूर्खाणां महापातकिनामपि |
| लोकान् मातरहं यायामार्य्यश्चेन्मन्मते गतः॥58॥ |
| देवीति शबथैस्तुष्टा भरतं प्रत्यभाषत।<br>शुद्धस्वभावं जानामि त्वां रामस्यानुजं प्रियम्॥59॥ |
| त्वं संस्कृत्य पितुर्देहं राज्यं धर्म्मेण पालय।<br>चतुर्दशे वत्सरे तु रामेण सह रंस्यसे॥60॥ |
| आर्ज्जवेन प्रसीदन्त्या राममात्रेत्युदाहृतः।<br>रामरामेति विलापंस्तां रात्रिं भरतोऽनयत्॥61॥ |
| तस्मिन् परे जनपदे निखिलप्रजानां |

शोकोऽपि शोकभयशोषणमूलमासीत्।
रामस्मृतिश्रवणकीर्त्तनसम्प्रयोगात्
सर्वाप्रदां प्रशमनो हि हरेः प्रसङ्गः॥62॥

इति श्रीमन्नारायणपण्डिताचार्य विरचिते रामाङ्के सङ्ग्रहरामायणे अयोद्याकाण्डे एकादशः सर्गः॥2-11-62॥ [आदितः श्लोकाः [941+62=1003]

## द्वादशः सर्गः ॥2-12-121॥

प्रभाते भरतं दृष्ट्वा विलपन्तं शुचाऽऽकुलम्।
वृतं प्रकृतिभिस्तत्र वसिष्ठो मुनिरब्रवीत्॥1॥

उत्तिष्ठ शीघ्रमायुष्मन्ननुतिष्ठ पितृक्रियाम्।
उपतिष्ठ द्विजान् वृद्धानधितिष्ठ वरासनम्॥2॥

कालात्मनः परेशस्य लीलेयं लोककालिनी।
न हृष्यन्ति न शुष्यन्ति पण्डिताः सुखदुःखयोः॥3॥

इत्युक्त ऊचे भरतो बाष्पं सम्मृज्य पाणिना।
अपण्डितोऽस्मि शोच्योऽस्मि विना राममहं गुरो॥4॥

साम्राज्यान्मे शतगुणं वने रामाङ्घ्रिसेवनम्।
अमृतान्मे शतगुणं रामास्येन्दोरवेक्षणम्॥5॥

जगतामेकनाथे मे नाथे रामे विराजति।
ब्रह्मनन्दन मां नाथं न ब्रुवन्ति भवादृशाः॥6॥

न्याय्यामुदारं करुणां वाणीं रामानुजन्मनः।
श्रुत्वाऽश्रूण्यमुचंस्तृप्ता गुणैस्तस्य महाजनाः॥7॥

| |
|---|
| तैलद्रोण्यामथ न्यस्तां कौसल्याया निवेशने।<br>वीक्ष्योद्धृतां पितृतनुं शुशोच भरतः पुनः॥8॥ |
| चतुर्दशशतस्त्रीभिः समं राजपरिग्रहैः।<br>मातृर्विलोक्य क्रोशन्तीर्विललाप पुनश्च सः॥9॥ |
| दृष्ट्वा वसिष्ठजाबाली रुदन्तं तमवोचताम्।<br>अप्राकृतः प्राकृतवत् किं रोदिषि नृपात्मज॥10॥ |
| भूरिद्युम्नो गतः स्वर्गं बन्धुशोकैर्न्निपातितः।<br>नानुशोच्यस्ततः प्राज्ञैः पुण्यवान् स्वर्गतिं गतः॥11॥ |
| इत्युक्तो बाढमित्युक्त्वा वन्दिनः प्रेक्ष्य वन्दकान्।<br>नाहं राजेति निर्भत्स्य शत्रुघ्नं भरतोऽब्रवीत्॥12॥ |
| पश्य शत्रुघ्न कैकेय्या दुर्न्नीतिं लोकनिन्दिताम्।<br>रामराजवियोगेन राज्यश्रीर्बिधवा यया॥13॥ |
| एवं ब्रुवाणो भरतो सभायां मन्त्रिभिः सह।<br>मन्त्रयित्वा यथान्यायं चक्रे तस्यौर्ध्वदेहिकम्॥14॥ |
| राजदेहमथाऽरोप्य शिबिकां राजभूतिभिः।<br>नृपात्मजावनयतां विशदं सरयूतटम्॥15॥ |
| चन्दनागरुकाष्टाद्यैश्चितां तत्र नरैश्चिताम्।<br>अलङ्कृतं राजदेहं तावारोपयतामथ॥16॥ |
| अथाऽश्वमेधिकानग्नीन् प्रणीयोद्दीप्य ते द्विजाः।<br>पात्राणि च यथास्थानं विन्यस्य जुहुवुर्घृतम्॥17॥ |

| |
|---|
| ततो भरतशत्रुघ्नौ पुरोहितमतेन तौ।<br>चक्राते पितृसंस्कारं निघ्नन्तौशोकमुत्थितम्॥18॥ |
| तौ विलापं विहायाथ दध्यत् रामसोदरौ।<br>विवेकक्षाळिते चित्ते ज्योतिर्न्नारायणाह्वयम्॥19॥ |
| सरयूसरितं प्राप्य राघवावुदकाञ्जलिम्।<br>विगाह्य पित्रे ददतुः पौरा जानपदा अपि॥20॥ |
| राज्ञा रामेण च त्यक्तां भरतः प्रेक्ष्य तां पुरीम्।<br>नैच्छत् प्रवेष्टुं श्रेयोऽत्र मेने प्रायोपवेशनम्॥22॥ |
| विप्रस्तं धर्म्मपालाख्यो राजामात्योऽन्वबोधयत्।<br>प्रविवेश पुरीं कृच्छ्रादयोध्यां भरतस्ततः॥22॥ |
| अथाऽशौचात्यये वीरश्चक्रे श्राद्धानि भक्तिमान्।<br>प्रादाद् द्विजेभ्यो ग्रामाग्र्यान् धनं जीवधनं बहु॥23॥ |
| अराजकमिदं राज्यं राजनन्दन नश्यति।<br>अभिषिच्यस्व हन्तेति प्रोचुः प्रकृतयोऽथ तम्॥24॥ |
| इत्युक्त ऊचे भरतः सत्यमस्त्वभिषेचनम्।<br>किन्तु ज्येष्ठस्य रामस्य गुणश्रेष्ठस्य सर्वतः॥25॥ |
| रामार्थं तस्यविष्योऽहं चरिष्यामि व्रतं वने।<br>सकामा स्यान्न कैकेयी राज्यकामातुरा खला॥26॥ |
| एवं ब्रुवाणं भरतं सर्वे प्रोचुः प्रहर्षिताः।<br>रामभक्तस्य ते वत्स सम्पदः सन्तु साध्विति॥27॥ |

रामपादान्तिकं गन्तुं सह पौरैः ससैनिकैः।
शिल्पिभिः खनकैश्चाथ मार्ग्गं सोऽचीकरद् द्रुतम्॥28॥

समातृकं च भरतं निर्य्यान्तं परिवार्य्य ते।
पौराः सर्वे प्रभुं जग्मुर्न्निम्नमापइव स्वयम्॥29॥

अयुतेभं लक्षहयं सरथाष्टसहस्रकम्।
ययावसङ्ख्यपादातं सैन्यं रामादिदृक्षया॥30॥

अबला अपि बालाश्च वृद्धाश्च किमुतापरे।
अहं प्रागित्युपाजग्मू रामपाददिदृक्षया॥31॥

मेघश्यामं मेघघोषं मेघवत् तापहारिणम्।
द्रक्ष्यामो राममित्युच्चैः प्रहृष्टाः प्राद्रवन् वनम्॥32॥

गङ्गायां सैन्यमाश्वास्य रामं रामानुजः स्मरन्।
वसिष्ठाद्यैः परिवृतश्चकार पितृतर्प्पणम्॥33॥

भरतः श्रीमदान्धोऽयं रामं प्रत्यवतिष्ठते।
रोत्स्यामीमं रामभक्त्या गुहस्तत्रेत्यमन्यत॥34॥

गुहः सोपायनो दृष्ट्वा भरतं कृतसङ्कथः।
तं शुद्धबुद्धिं विज्ञाय पूजयामास सादरम्॥35॥

कुत्राऽसितं ससीतेन वने नः स्वामिना गुह।
किमत्र लक्ष्मणश्चक्र इत्थ्यपृच्छदसौ गुहम्॥36॥

रामस्य वार्त्तामार्त्ताय भरतायोक्तवान् गुहः।
वनवासाच्च रामस्य सौमित्रेः परिदेवनम्॥37॥

| |
|---|
| फलमूलाम्बुभिर्वृत्तिं जटावलयबन्धनम्।<br>श्रुत्वा सर्वमिदं शोकाद् भरतो मूर्च्छितोऽपतत्॥ 38 ॥ |
| आर्त्तोऽधिकं महूर्त्तेन सञ्ज्ञामाप्य विलप्य च।<br>इङ्गुदीवृक्षमागम्य स्मरन् राममभाषत॥ 39 ॥ |
| ईदृशः पर्ण्णपर्य्यङ्कः फलमूलोपजीवनम्।<br>जगन्नाथस्य नाथस्य कथं न भविता पुनः॥ 40 ॥ |
| वन्यैर्ज्जलैश्च वर्त्तिष्ये शयिष्ये स्थण्डिलेष्वहम्।<br>अद्यप्रभृति गुर्वर्त्थं सत्यमेतत् प्रतिश्रुतम्॥ 41 ॥ |
| लक्ष्मणार्त्थं च शत्रुघ्नः कार्य्यमेवं करिष्यति।<br>आर्य्याभ्यां नगरे स्थेयं दैवं तत्रानुमोदताम्॥ 42 ॥ |
| एवं रामकथामग्नो निशां तामत्यवर्त्तयत्।<br>सशत्रुघ्नोऽथ भरतो मातृभिः परिवारितः॥ 43 ॥ |
| प्रातः सन्ध्यामुपास्याथ गङ्गां स भरतोऽतरत्।<br>चतुरङ्गं च तत् सैन्यं प्लवैर्नौभिश्च तारकैः॥ 44 ॥ |
| दाशैर्ग्गुहनियुक्तैस्तां सन्तीर्थ्य भरतो नदीम्।<br>गुहाभिहितमार्ग्गेण जननीभिः समं ययौ॥ 45 ॥ |
| प्रयागं प्राप्य तत् सैन्यं नियम्याऽरात् ससोदरः।<br>भरतोऽथ भरद्वाजं प्राप्तवानभ्यवन्दत॥ 46 ॥ |
| रामं राज्यात् परित्याज्य त्रैलोक्यस्यैकनायकम्।<br>किं विधत्से ससैन्योऽथ त्वमित्याह स्म तं मुनिः॥ 47 ॥ |

| |
|---|
| अनुतप्तोऽस्मि दुष्टायाः कैकेय्याः कैतवान्मुने।<br>पुरं नेष्यामि मे नाथमिति तं भरतोऽब्रवीत्॥ 48॥ |
| रामानुजोऽसि धन्योऽसि स्वस्ति तेऽस्त्वित्यथाब्रवीत्।<br>ससैन्यं तं भरद्वाज आतिथ्याय न्यमन्त्रयत्॥ 49॥ |
| आहूय विश्वकर्म्मादीन् कारयन् विश्वसम्पदः।<br>वासुदेवप्रसादेन स्वर्ग्गभोगान् व्यधान्मुनिः॥ 50॥ |
| यद्यदिच्छति योयोऽत्र भरतानुव्रतो जनः।<br>तं तेन तर्प्पयामास रामभक्त्या द्विजर्षभः॥ 51॥ |
| प्रभाते भरतो गन्तुमवन्दत महामुनिम्।<br>अवन्दन्त क्रमेणाथ कौलस्याद्याश्च ताः स्त्रियः॥ 52॥ |
| आसां विवेकमाचक्ष्व मातृणां ते नृपात्मज।<br>भरद्वाजेन भरत इत्युक्तः प्रत्यभाषत॥ 53॥ |
| या पूर्वं वन्दितवती देवीयं देवतोपमा।<br>रामविश्लेषतो दीना रममातेति विद्धि ताम्॥ 54॥ |
| तस्या उपान्ते तिष्ठन्ती सुमित्रेयं तपोधन।<br>पुत्रौ लक्ष्मणशत्रुघ्नावेषाऽसूत शुभव्रता॥ 55॥ |
| लज्जयाऽधोमुखी याऽत्र दुष्टा रामप्रवासिनी।<br>कैकैयी मम मातेयमित्येतं भरतोऽब्रवीत्॥ 56॥ |
| निमित्तमात्रं कैकैयी वनवासे जगत्प्रभोः।<br>देवकार्य्याय यातोऽयमिति तं मुनिरब्रवीत्॥ 57॥ |

| |
|---|
| प्याप्यानुज्ञां भरद्वाजाच्छ्रुत्वा रामाश्रमं ततः।<br>स ययौ यमुनां तीर्त्वा चित्रकूटं च सानुगः ॥58॥ |
| नियम्याऽरात् स सैन्यानि सहितः स्वपुरोहितैः।<br>तद् विवेशाऽऽश्रमपदं रामं पृच्छन् मुनीनिह ॥59॥ |
| दृष्ट्वा सैन्यरजोराजिं सालमारुह्य लक्ष्मणः।<br>कोविदारध्वजं प्राप्तं ज्ञात्वा कोपमुपाददे ॥60॥ |
| कैकेयीतनयं दृप्तं ससैन्यं प्रत्युपस्थितम्।<br>अनुज्ञां देहि मे हन्तुमिति सौमित्रिरब्रवीत्॥61॥ |
| शान्तो न दृप्तो भरतः शान्तस्त्वं भव लक्ष्मण।<br>अस्मान् द्रष्टुमवाप्तोऽसाविति रामोऽब्रवीत् स्मितः॥62॥ |
| भरतो भगवत्पार्श्वमेतस्मिन्नन्तरे गतः।<br>पर्णशालां विशालां तामपश्यत् त्रिदिवोपमाम्॥63॥ |
| हेमचित्रप्रहरणैस्तनुत्रैश्चोपशोभिताम्।<br>अरिसङ्घैरनाधृष्यां मृगैः सिंहगुहामिव ॥64॥ |
| प्रागुदक्प्रवणे देशे वेदिं वेदविदां गुरोः।<br>जाज्वल्यमानज्वलनां भरतो मुहुरैक्षत॥65॥ |
| तत्रोटजे जटामौलिं चारुचीरमवैक्षत।<br>ससीतालक्ष्मणं रामं परमानन्दमन्दिरम्॥66॥ |
| न तृप्यति स्म तं दृष्ट्वा भरतो नैतदद्भुतम्।<br>अनन्तकालं पश्यन्तो यं न तृप्यन्ति योगिनः॥67॥ |

| |
|---|
| पादपद्मे निपतितं सन्तप्तं मातृहेळनात्।<br>आशिश्लेषाथ भरतं भक्तं तं भक्तवत्सलः॥68॥ |
| स सर्वज्ञोऽपि सर्वेशः पप्रच्छ कुशलं पितुः।<br>अन्यांश्च विविधानर्थान् लोकवृत्तिं विडम्बनम्॥69॥ |
| प्रोवाच प्राञ्जलिर्दीनः प्ररुदन् भरतोऽग्रजम्।<br>स्वर्ग्गतो नः पिता नाथ रामरामेति कीर्त्तयन्॥70॥ |
| उदकं दीयतां तस्मै प्रियैर्द्दत्तं प्रियं भवेत्।<br>सर्वेषां सर्वतः प्रेष्ठ त्वया दत्तं तु किम्पुनः॥71॥ |
| आकर्ण्य राज्ञो मरणं सदा सर्वप्रवर्त्तकः।<br>अशोकलेशोऽपि विभुर्विललाप विडम्बयन्॥72॥ |
| सीतापतिरुपागम्य सीतालक्ष्मणसंयुतः।<br>मन्दाकिनीं विगाह्याऽत्र जनकायोदकं ददौ॥73॥ |
| दर्भेष्विङ्गुदपिण्याकं पित्रे तं न्यस्तवा विभुः।<br>पितृदेवान् पुमान् स्वान्नैः पूजयेदिति दर्शयन्॥74॥ |
| तत्र प्रकृतयः सर्वाः सेनाः पौराश्च सत्वरम्।<br>प्राप्य लोकेशमालोक्य यान्ति स्म कृतकृत्यताम्॥75॥ |
| कौसल्याऽप्यथ कल्याणी शोकेन परिशोषिता।<br>समं राज्ञीभिरन्याभिर्द्देवं सन्दृश्य निर्वृता॥76॥ |
| मातृः सप्रेमबाष्पास्ता जगद्गुरुरवन्दत।<br>जानकी लक्ष्मणश्चाथ ताश्चाऽऽशीर्भिरपूरयन्॥77॥ |

| |
|---|
| तमःशोकाभिभूतां तामतीत्य रजनीं तदा।<br>भानुर्न्नभसि भाति स्म राघवो जनसंसदि॥78॥ |
| किं नु वक्त्येष भरतः प्रतिवक्ष्यति किं प्रभुः।<br>इति स्थिते जने जोषं भरतो राममब्रवीत्॥79॥ |
| अनुग्रहाय नः स्वामिन् स्वामयोध्यां वनाद् व्रज।<br>इमामनाथां धरणीं विश्वपालक पालय॥80॥ |
| इत्युक्तो भगवानूचे पितुराज्ञाकरा वयम्।<br>सद्धिताय वसामोऽत्र त्वं पालय धरामिति॥81॥ |
| प्रणामाञ्जलिबाष्पाणि कुर्वाणो भरतस्तदा।<br>क्रियासमभिहारेण रामं प्रोचे सगद्गदम्॥82॥ |
| त्वां तु त्यक्त्वा पतिं हत्वा दत्वा मे परितापिताम्।<br>कृत्वा सर्वजगद्दुःखं माता सर्वङ्कषा मम॥83॥ |
| चिकर्त्तिषुं शिरस्तस्या भुजं मे खड्गलम्पटम्।<br>प्रतिभा वारितवती त्वत्प्रीतिक्षतिशङ्किनी॥84॥ |
| अयि नाथ जगन्नाथ भक्तस्याऽघः क्षमस्व मे।<br>भक्तवत्सल भक्तानां नन्वात्मानं दिशेद् भवान्॥85॥ |
| स्त्रीषु नासत्यदोषोऽस्ति पिता नो न विवेद तत्।<br>राजर्षिर्न्न मया दूष्यो ममैवेदमघं महत्॥86॥ |
| भूर्द्दत्ताभूभृता चेन्मे दासस्तेऽर्प्पितवानहम्।<br>लोकन्याय्यं च लोकेश तस्मात्ते राज्यपालनम्॥87॥ |

न यास्यसि पुरं चेत् त्वं नाहं यास्यामि सर्वथा।
योगिमृग्यं पदाब्जं ते सेवे सौमित्रिवत् सदा॥88॥

एवं ब्रुवाणे भरते सर्वाः प्रकृतयः प्रभुम्।
मुनयो मातरश्चैव सबाष्पाक्षा ययाचिरे॥89॥

भरतं भगवानूचे शत्रुघ्नेन पुरीं व्रज।
सलक्ष्मणः सतां प्रीत्यै व्रजेयं दण्डकानिति॥90॥

क्व गुर्वाज्ञा सर्वगुरोर्द्धर्म्मः कोऽसङ्गिनस्तव।
गच्छ देव पुरीं शीघ्रमिति जाबालिरब्रवीत्॥91॥

गुरुदेवार्च्चनं धर्म्मो ननु वेदविनिश्चितः।
इति क्रुद्धइव प्रोचे रामो लोकं विडम्बयन्॥92॥

अनुतिष्ठसि धर्मं चेद् राजन् राज्यमराजकम्।
पूर्वजैः पालितं पाल्यमिति ब्रह्मसुतोऽब्रवीत्॥93॥

मुनिनामुत मातृणां पौराणामपि याचनम्।
रामे नगणयत्येव भरतो दुःखितोऽब्रवीत्॥94॥

आर्य्यं प्रत्युपवत्स्यामि यावन्मे सम्प्रसीदति।
शयिष्येऽहं निराहारः पुरं यावद् व्रजेत् प्रभुः॥95॥

सर्वथा करणीया चेद् गुर्वाज्ञा ते जगद्गुरो।
भवद्दासः करोम्येनां भवांस्तु नगरीं व्रजेत्॥96॥

इति ब्रुवाणमास्तीर्य्य कुशान् स्थण्डिलमण्डले।
स्मित्वा कारुणिकः प्रोचे भरतं भरताग्रजः॥97॥

| |
|---|
| चतुर्दशे वत्सरेऽहं वत्स यास्यामि नः पुरीम्।<br>सत्यमित्युदितोऽपीशं ययाचे भरतः पुनः॥98॥ |
| एतस्मिन्नन्तरे रामं सम्प्रापुः परमर्षयः।<br>देवोपदेवैः सम्मन्त्र्य दशग्रीववधार्त्थिनः॥99॥ |
| ते प्रोचुर्भरतं तत्र नेदानीं पुरमेत्ययम्।<br>कृतकार्य्याविशेषस्तु पुरीं रामो व्रजेदिति॥100॥ |
| भरतं राज्यभारार्त्तं लोठन्तं धरणीतळे।<br>याचमानं पुनर्दृष्ट्वा वसिष्ठो राममब्रवीत्॥101॥ |
| भक्ताय भारताय त्वं देव देहि स्वपादुके।<br>पादुके नित्यमावन्द्य पालयेद् भरतो भुवम्॥103॥ |
| वसिष्ठवाक्यमाकर्ण्य वैकुण्ठः पादुके ददौ।<br>सौवर्ण्णे ते दधन्मूर्ध्नि प्राञ्जलिर्भरतोऽब्रवीत्॥103॥ |
| नगरं न प्रवेक्ष्यामि यावदागमनं तव।<br>प्रवेक्ष्याम्यग्निमप्रेक्ष्य वत्सरे त्वां चतुर्दशे॥104॥ |
| इति प्रतिश्रवौ कृत्वा प्रणम्य च जगत्प्रभुम्।<br>मातृभिर्बाष्पनेत्राभिर्भरतः सानुगो ययौ॥105॥ |
| भरद्वाजं समामान्त्र्य भरतस्त्वरितो गतः।<br>गङ्गामतीत्य सम्प्राप्तः स्वपुरीं रहितां श्रिया॥106॥ |
| प्रवेश्य मातॄन्नगरीं नन्दिग्राममवाप्यसः।<br>सशत्रुघ्नो वसंस्तत्र पालयामास मेदिनीम्॥107॥ |

| |
|---|
| रामस्य पादुकायुग्मं तत्र सिंहासनेऽर्पितम्।<br>सितातपत्रव्यजनैरुपास्त भरतो व्रती॥108॥ |
| रममाणेन रामेण रमण्या रमणीयया।<br>वनेषु पुष्पपूर्णेषु शैलेन्द्रे सुखमासितम्॥109॥ |
| तिलकंलोकतिलकः प्रियाया व्यधिताळिके।<br>पूरयामास पुष्पैश्च कबरीं कमलेक्षणः॥110॥ |
| वनमालाविलसितौ लीलाकुवलयान्वितौ।<br>आनन्दतां यथाकामं दम्पती तौ वनेवने॥111॥ |
| सदा विनिद्रे देवेशे योगनिद्रामुपेयुषि।<br>कदाचिदाययौ तत्र वायसो वासवात्मजः॥112॥ |
| आसुरं भावमाश्रित्य भासुरं जानकीस्तनम्।<br>तुण्डेन चण्डः पस्पर्श बलिभुग् बलिमाद्य सः॥113॥ |
| विभीष्यमाणोऽपि यदा न मुमोच स मैथिलीम्।<br>तदा तस्मै तृणं किञ्चित् पक्षिणे प्राक्षिपत् प्रभुः॥114॥ |
| तेन जाज्वल्यमानेन तृणेनासावनुद्रुतः।<br>त्रिलोकीं विद्रुतः काकः शरणार्थी भयातुरः॥115॥ |
| रामाय नम इत्युक्त्वा ब्रह्मरुद्रादिभिः सुरैः।<br>कालितः स्वालयात् काको रामविक्रमभीरुभिः॥116॥ |
| नाविन्दच्छरणं दीनस्त्रैलोक्ये ससुरासुरे।<br>जिजीविषुर्जीवनार्थं तमेव शरणं ययौ॥117॥ |

देवैर्द्दत्तवरः पक्षी धरान्तरचरः पुरा।
दीनं मां पाहि देवेति पपात हरिपादयोः॥118॥

न जघान दयालुस्तं तस्य नेत्रमशातयत्।
ततः प्रभृति सर्वेऽपि काका एकाक्षतां ययुः॥119॥

खलावलेपखण्डनस्थिरावतारविभ्रमः।
अवेक्षते स्म जानकीमुखेन्दुमिन्दिरापतिः॥120॥

सीतामुखाब्जस्मितभानुभानुः सत्कैरवानन्दनचन्द्रभानुः।
रक्षस्तृणौघक्षणस्फुलिङ्गो रराज रामस्य कटाक्षमोक्षः॥121॥

इति श्रीमन्नारायणपण्डिताचार्य्यविरचिते रामाङ्के सङ्क्षहरामायणे अयोद्याकाण्डे द्वादशः सर्ग्गः॥2-12-121 [ अदितः श्लोकाः 1003+121=1124]

## अरण्यकाण्डम्॥3-6॥

### प्रथमः सर्ग्गः ॥3-1-45॥

पुरा पुलस्त्यः परमेष्ठिपुत्रस्तन्वंस्तपो मेरुगिरेः समीपे।
विलोभयन्तीर्म्मुहुरेत्य कन्या विलोक्य किञ्चित् कुपितो बभाषे॥1॥

या कन्यका मामवलोकयेत सा गर्भिणी स्यादिति वाक्यबाणात्।
कन्या न भीताः पुनरत्र जग्मुर्विवेद नेदं तृणबिन्दुपुत्री॥2॥

सा शुद्धबावाऽपि नरेन्द्रकन्या दृष्ट्वा कदाचिन्मुनिमाप गर्भम्।
प्रसाद्य तं प्राप्य च तत्प्रियात्वं सूते स्म सा विश्रवसं कुमारम्॥3॥

तस्मात् सुतं वैश्रवणं च भारद्वाजस्य पुत्री सुषुवे सुगात्री।
ब्रह्मप्रसादाद् दिगधीश्वरत्वं यः पुष्पकाख्यं च विमानमाप॥4॥

हेतऽर्विधात्रा विहितस्य विद्युत्केशः सुतस्तस्य सुकेश आसीत्।
त्रयोऽस्य पुत्राः किल माल्यवांश्च सुमालिमाल्याह्वयकौ च घोराः॥5॥

ब्रह्माहितैर्ब्रह्मवरादवध्यैर्लङ्कालयैरुत्कटपुत्रपूगैः।
त्रिभिस्त्रिलोकीक्षपणैः प्रभग्नाः प्रायन्त शर्वं शरणं सुरेन्द्राः॥6॥

तानब्रवीत् सुस्मितमिन्दुमौलिर्म्मया न वध्या रजनीचरास्ते।
विष्णुं शरण्यं शरणं व्रजामः स्वामी स नः शर्म्म विधास्यतीति॥7॥

दुग्धाब्धिशय्यं शरणं प्रपन्नाः प्रोचुः सुराः प्राञ्जलयः प्रणम्य।
सुकेशसूनून् दमयापि नाथ लोकान् सपालान् परिपालयेति॥8॥

निरीक्ष्य देवव्यसनं स देवो युयुत्सुरायाद् विहगेन्द्रवाहः।
ते राक्षसा रूक्षगणा अवापुस्तं सिन्धुरेन्द्राइव सिंह राजम्॥9॥

स शङ्खचक्री विबभौ विहङ्गे पिशङ्गवासाः प्रविकृष्टशार्ङ्गः।
गोवर्षवानिन्दुरवी दधानो गिरौ तटित्वानिव सेन्द्रचापः॥10॥

अवाप्य नेशुः शलभा यथाऽग्निं यताग्नयः पूर्णमहो महाब्धिम्।
यथाऽब्धयः सम्प्रळयार्कतापं तथा महेशं पिशिताशिनस्तो॥11॥

माली बली माधवमभ्युपेत्य विक्रान्तिमाक्रान्तसुरां ततान।
अपातयत् तालसमस्य तस्य च्छित्त्वा शिरः पक्वफलं यथेशः॥12॥

सुमालिना माल्यवता च साकं पराद्रुतान् वीक्ष्य परान् परात्मा।
सुरामृताब्धिं प्रतिभासुरं तं मुखेन्दुनाऽऽनन्दयदिन्दिरेशः॥13॥

ततः सुमाली सुरसूदनः स्याद् दौहित्र इत्युग्रमनोरथेन।
रसातळात् प्राप्य रसां निनाय पुलस्त्यपुत्रान्तिकमात्मपुत्रीम्॥14॥

| |
|---|
| लावण्यपण्येन मनो महर्षेः क्रीत्वा सुतानाप च कैकसी सा।<br>दशाननं प्रागथ कुम्भकर्णं विभीषणं शूर्प्पणखामुपान्त्याम्॥15॥ |
| विलोक्य धन्यं धनदं सपत्न्याः सुतं स्वमात्रा प्रतिचोदितास्ते।<br>तपस्यतिष्ठन्नतनिष्ठवीर्य्याः सहोदरा दिव्यसमायुतं च॥16॥ |
| आहारहीनः सततं दशास्यः स्वसाहसादब्धसहस्रकान्ते।<br>एकैकमुत्कृत्य शिरः शरीराज्ज्वल्यमाने ज्वलने जुहाव॥17॥ |
| पूर्णे समानां दशमे सहस्रे चिकर्त्तिषुं तं दशमं शिरश्च।<br>मामेति धाता विनिवार्य्य तात वरं वृणीष्वेति हसन् जगाद॥18॥ |
| सुरासुरैरप्यहियक्षरक्षःपतत्रिभिः कैश्चिदवध्यभावम्।<br>ददौ प्ररोहं च हुताननानां स वीरवर्य्याय वरं विरिञ्चः॥19॥ |
| एकेन पादेन सदैव तिष्ठन् दधन्मुकुन्दं हृदयारविन्दे।<br>ततस्तपस्यन् हरिधर्म्मनिष्ठां विभीषणं प्राप वरं वरीयान्॥20॥ |
| द्वन्द्वाख्यदुःखं सहमान उग्रः स कुम्भकर्णस्तपसा चिरेण।<br>देव्या तदा भ्रंशितगीः सुरात्थं सुप्तिश्चिरायास्तु ममेत्यवोचत्॥ 21॥ |
| तथेत्युदाहृत्य गतेऽब्जयोनौ सभ्रातृकोऽसौ विचरन् दशास्यः।<br>नीत्या प्रहस्तस्य सुमालिनश्च लङ्कालयोऽभूद्धनदं प्रकाल्य॥22॥ |
| मण्डोदरी नाम मयस्य पुत्री बभूव भार्य्या दशकन्धरस्य।<br>या मेघनादं सुषुवे सुरारिं वीची महाब्धेरिव कालकूटम्॥23॥ |
| निद्रां विनिद्रां समियाय विद्युज्जिह्वापतिस्तत्र स कुम्भकर्णः।<br>गन्धर्वपुत्रीं सरमामवाप्य विभीषणो भागवतोऽत्र रेमे॥24॥ |

| |
|---|
| गोब्राह्मणानां वदभद्धदीक्षो जेष्यंस्त्रिलोकीं धनदं विजित्य।<br>स यक्षलक्षाणि बहूनि हत्वा दशाननः पुष्पकमाजहार॥25॥ |
| गर्वेण शर्वस्य स पर्वतेन्द्रमुद्धर्तुकामोऽथ तदङ्घ्रिभग्नः।<br>स्वां रावणाख्यां रवणादवाप घोरः प्रजानामपि रावणत्वात्॥26॥ |
| हिमालये वीक्ष्य स देवमायां कन्यां परां वेदवतीं प्रगृह्य।<br>शप्तस्तया त्वन्मृतये पुनः स्यामित्थं ज्वलन्तं ज्वलनं विशन्त्या॥27॥ |
| मरुत्तदुष्षन्तमुखान् महीशान् पराजितोऽस्मीति स वादयित्वा।<br>हन्ता हरिस्ते मम वंश्य इत्थं शप्तोऽनरण्येन निसूदयंस्तम्॥28॥ |
| युध्वा स सप्ताहमपास्य कालं रसातळे नागकुलं विजित्य।<br>निवातवर्म्माख्यनिबद्धसख्यो जळीचकाराऽथ जलेशपुत्रान्॥29॥ |
| अक्षोहिणीभिः सह राक्षसानां सुकुम्भकर्णः ससुतो दशास्यः।<br>मधुं पुरस्कृत्य महच्चकार महेन्द्रमुख्यैरमरैः सुयुद्धम्॥30॥ |
| महेश्वरस्याथ मखैर्म्महात्मा स मेघनादो युधि मेघवाहम्।<br>बबन्ध नाम्नेन्द्रजिदास तस्माद् ब्रह्माज्ञयाऽमुञ्चदमुञ्च कृच्छ्रात्॥31॥ |
| विशङ्कुजः  सोऽथ सहस्रहस्तं प्रत्युज्जगर्ज्जार्ज्जुनमभ्युपेत्य।<br>विष्णोर्वरादप्रभविष्णुरेष बबन्ध तं ब्रह्मवरादजेयम्॥32॥ |
| पुलस्त्यवाचा पुनरर्ज्जुनेन मुक्तः स लीलामृगवद् दशास्यः।<br>तथाऽप्यनिर्विण्णमतिर्बबाधे लोकान् यथा क्षुद्रमृगान् मृगारिः॥33॥ |
| सान्ध्यं चतुःसिन्धुषु कर्म्म कुर्वन् निक्षिप्य कक्षे विजिगीषुमेनम्।<br>वाली हरेर्भावबलात् पपात विहङ्गभर्त्तेव भुजङ्गमाशु॥34॥ |

| |
|---|
| बलिं जिगीषुं किल रावणं तं चिक्षेप दूरेऽयुतयोजनान्ते।<br>पदाङ्गुलीमात्रत एव देवो दौवारिकस्तस्य हरिर्दयालुः॥35॥ |
| स वासुदेवः कपिलाभिधानो मुष्टिप्रहारान्निरपादयत् तम्।<br>युयुत्सुमम्भोधितटे दशास्यं त्रिकोटिरूपोऽस्य सुतश्च वायुः॥36॥ |
| न रावणं हन्तुमलं जगत्यां विष्णुं विना कश्चन निश्चयोऽयम्।<br>विना सहस्रांशुमलङ्घनीयं महान्धकारं धुनुयात् क एव॥37॥ |
| ववौ न वातोऽतितरां पुरोऽस्य बभौ न भानुः कटुकं कदाचित्।<br>न वह्निरह्नाय ददाह हन्ता तद्भ्रूविजृम्भान्नियतं समस्तम्॥38॥ |
| स यक्षरक्षोमनुचाहिदैत्यगन्धर्वनारीः सह दानवीभिः।<br>विभीषणेनैष निवारितोऽपि जहार हा सत्कुलजाङ्गनाश्च॥39॥ |
| घनस्तनीनां तनुमध्यमानां शुकालपानां शुभलोचनानाम्।<br>चन्द्राननानां नयनाननेभ्यः श्वासाश्रुभिर्वह्निसमैर्बभूवे॥40॥ |
| हा तात हा वल्लभ हा विधातर्देहान्तरं देह्यचिरान्न इत्थम्।<br>सङ्क्रन्दितं तत्परिसुन्दरीणां नराशनानां च कृपां चकार॥41॥ |
| सङ्क्रन्दतोर्हन्ति शिशूंश्च पित्रोरश्लिष्टवत्यां तरुणं तरुण्याम्।<br>गामाग्निहोत्रीं यवसोपहूतां कोऽन्यो नृशंसो दशवक्त्रतुल्यः॥ |
| एवं त्रिलोकीसरसीं विगाह्य सत्पद्मिनीं क्षोभयते खलाय।<br>मत्ताय मांसाशिमतङ्गजाय चुकोप चण्डः किल रामसिंहः॥43॥ |
| स चित्रकूटे वसतो मुनीन्द्रानातङ्किनो रावणकिङ्करेभ्यः।<br>सम्भ्रान्तचित्तान् द्रवतो विलोक्य दयां दयालुर्विपुलां चकार॥44॥ |

दशमुखवधनाट्यपूर्वरङ्गं स्वरमुखमूर्खकुलप्रमापणाख्यम्।
भुवनरसकरं विधातुमायाद् द्रुतमथ दण्डकमण्डलं स रामः॥45॥

इति श्रीमन्नारायणपण्डिताचार्यविरचिते रामाङ्के सङ्ग्रहरामायणे अरण्यकाण्डे प्रथमः सर्ग्गः॥3-1-45॥
[आदितः श्लोकाः = 1124+45=1169]

## द्वितीयः सर्ग्गः ॥3-2-58॥

महर्षिष्वपयातेषु चित्रकूटाद् विनिर्ग्गतः।
ससीतालक्ष्मणः प्रायादत्रेराश्रममश्रमः॥1॥

जगतां पितरौ पश्यन्नत्रिर्य्युक्तोऽनसूयया।
सभाजयामास भृशं कृतार्त्थौ भक्तिपूरितः॥2॥

पृष्टाऽनसूयया तत्र प्रोवाच परमेश्वरी।
आत्मस्वयम्बरकथां रामवीर्य्यप्रकाशिनीम्॥3॥

अत्रिपत्न्या तदा दत्तैः स्त्रगाकल्पानुलेपनैः।
अलङ्कृता रराजालं देवी प्रकृतिशोभना॥4॥

तस्यां रात्र्यां व्यतीतायामापृच्छ्य मुनिपुङ्गवम्।
प्राविशत् पुण्डरीकाक्षो दण्डकारण्यमण्डलम्॥5॥

ज्ञानिनः कर्म्मिणश्चात्र वेदवेदाङ्गपारगाः।
ब्राह्मणा ब्रह्मणस्तातं प्रेक्षन्ते स्म सहस्रशः॥6॥

कमलानुगतं देवं कमलायतलोचनम्।
बिम्बोष्ठं कम्बुकण्ठं तं दृष्ट्वा हृष्टा महर्षयः॥7॥

| |
|---|
| सुकृतानां कृतानां नः सर्वेषां फलमागतम्। रामसन्दर्शनादित्थं मुनयोऽकथमन्मिथः॥8॥ |
| सपर्य्यां सुरवर्य्यस्य विधाय विधिना ततः। विप्राः प्राञ्जलयः प्रोचुर्भक्तिगद्गदभाषिणः॥9॥ |
| लोकनाथ सनाथाः स्मो भवता करुणावता। संसारात् पालयन् लोकान् रावणादपि पालय॥10॥ |
| इति तैरर्त्तितस्तत्र तां निशामावसन् प्रभुः। सदारसोदरः प्रायादुदारगुणवारिधिः॥11॥ |
| तत्रैव दण्डकारण्ये स विवेशाऽऽश्रमान्तरम्। जीर्णाङ्गं शरभङ्गाख्यं तत्र प्रैक्षत तापसम्॥12॥ |
| वानप्रस्तोऽसमर्थोसावग्निहोत्रप्रवर्त्तने। देहं जिहासुः सम्पूज्य रामं हृष्टोऽब्रवीदिदम्॥13॥ |
| पुण्यश्लोक प्रसीद त्वं राम राजीवलोचन। मुहूर्त्तं स्थीयतामत्र भूयानयमनुग्रहः॥14॥ |
| इत्युक्त्वा ज्वालयित्वाऽग्निं हुत्वा देहं प्रभोः पुरः। मन्त्रपूतं हविरिव प्रययौ स हरेः पदम्॥15॥ |
| मङ्गलं शरभङ्गस्य कृत्वा मङ्गलकीर्त्तनः। विजगाहेऽतिगहनं तथैव विपिनान्तरम्॥16॥ |
| विराधं दृष्टवान् वीरो मुनिमांसाशिनं वने। अष्टौसिंहान् विनिर्भिद्य शूलेनाऽऽक्रम्य च स्थितम्॥17॥ |

शम्भोर्वरादवध्योऽसौ राक्षसो रूक्षविग्रहः।

उपद्रुत्य क्षणात् सीतामादायाऽऽकाशमापतत्॥18॥

क्रूरक्रियं क्रूरवाचं क्रूरं दृष्ट्वाऽथ राक्षसम्।

शरैः शरीरं सौमित्रिस्तस्य शीघ्रमदारयत्॥19॥

अविचिन्त्य शरच्छूलं राक्षसः क्षिप्रमाक्षिपत्।

लक्ष्मणायाथ तद् रामः शराभ्यां समशातयत्॥20॥

स्वांसमारोपयत् सोऽत्तुं राघवौः राक्षसः क्षणात्।

भ्रातरौ खड्गिनौ तस्य खण्डयामासतुर्भुजौ॥21॥

स रामशरसंविद्धो विराममवशो व्रजन्।

प्राञ्जलिः कञ्जपत्राक्षं संस्मृतिर्वाक्यमुक्तवान्॥22॥

जय देव रमाकान्त जाने त्वां भक्तवत्सलम्।

तुम्बुरुस्तव दासोऽहं राक्षसीं योनिमागतः॥23॥

शप्तो वित्तेश्वरेणाहमुर्वशीसङ्गमागसः।

तद्दत्तः शापमोक्षश्च तत्प्रसादोऽयमागतः॥24॥

इति रामप्रसादेन गन्धर्वः स्वगतिं गतः।

रामानुजो रामवाक्यात् तद्देहं बिलगं व्यधात्॥25॥

नानाश्रमपदेभ्योऽथ मुनयो राक्षसार्दिताः।

शरण्यं सर्वभूतानां शार्ङ्गिणं शरणं ययुः॥26॥

वैखानसा वालखिल्याः पृश्नयो रश्मिपा अपि।

वारिपा वायुपाः पत्रभोजना अश्मकुट्टकाः॥27॥

| |
|---|
| दन्तो लूखलिनो दन्ताः खेशयाः स्थण्डिलेशयाः।<br>अश्विताः पञ्चतपसोऽपरे दशतपोव्रताः॥28॥ |
| वृक्षाग्रासक्तपादाग्रा न्यञ्चमूर्धानस्तपस्विनः।<br>सर्वे सर्वेश्वरं ब्रह्म ध्यायन्तो वेदपारगाः॥29॥ |
| जाज्वल्यमानास्तपसा ज्वलनादित्यवर्च्चसः।<br>अश्रुपूर्णेक्षणाः क्षामाः प्रणम्याऽऽहुः स्म राघवम्॥30॥ |
| लोकैकनाथे श्रीनाथे त्वयि पृथ्वीं गतेऽप्यहो।<br>राक्षसैरर्द्दिताः स्मोऽथ रावणौजः समाश्रयैः॥31॥ |
| मन्दाकिनीतिरजुषां पम्पातीरजुषां सताम्।<br>प्रत्याश्रमं पश्य देहान् राम राक्षसभक्षितान्॥32॥ |
| करुणाकर तस्मात् त्वं करुणां कुरु साधुषु।<br>हर राक्षससन्दोहं तिमिरं मिहिरो यथा॥33॥ |
| इत्यर्त्थितोऽब्रवीत् देवो मेघगम्भीरया गिरा।<br>खलान् निर्म्मूलयिष्यामि भयं वो मा भवेदिति॥34॥ |
| महर्षिभिर्वृतो रामः सुतीक्ष्णस्याऽऽश्रमं ययौ।<br>तां निशां सह वैदेह्या तेन सम्पूजितोऽवसत्॥35॥ |
| गच्छतोर्म्मुनिभिः सार्द्धं लक्ष्मणेन च कानने।<br>जानकीजानकीभर्त्रोर्ल्लीलावादोऽन्ववर्त्तत॥36॥ |
| तापसस्त्यक्तराज्यस्त्वं न्यस्तदण्डोऽसि राघव।<br>कथं रक्षोवधो धर्म्मस्तवेत्यूचेऽथ जानकी॥37॥ |

| |
|---|
| दहनं दहनस्येव राज्ञो दुर्ज्जननिग्रहः।<br>सर्वावस्थासु धर्म्मः स्यादिति रामोऽभ्यभाषत॥38॥ |
| अग्रतः प्रययौ रामो मद्ध्यतः सा सुमद्ध्यमा।<br>लक्ष्मणः पृष्ठतस्तेषां पृष्ठतस्ते महर्षयः॥39॥ |
| सरः पञ्चाप्सरो नाम प्रापुस्ते यत्र रेमिरे।<br>पञ्चाग्र्याप्सरसोऽदृश्या मुनिना मन्दकर्ण्णिना॥40॥ |
| मासं कुत्रचिदेकं द्वौ क्वचित् त्रिचतुरान् प्रभुः।<br>पञ्चषानथ सप्ताष्टानाश्रमेष्ववसत् सुखम्॥41॥ |
| सुन्दरीमिन्दिरामेनां स्वानन्दी साधु नन्दयन्।<br>ससौमित्रिर्न्नव समा निन्ये मुनिजनप्रियः॥42॥ |
| प्रोचेऽनुजमथ प्राप्य सोऽगस्त्यभ्रातुराश्रमम्।<br>अगस्त्यस्य तपोवीर्य्यं वातापील्वलसूदनम्॥43॥ |
| अगस्त्यस्य स्वभक्तस्य प्रीत्यै प्रापाऽऽश्रमं प्रभुः।<br>सदारसोदरं देवं सम्पूज्यासावभाषत॥44॥ |
| कोदण्डं कालदण्डाभं त्वद्दोर्द्दण्डैकमण्डनम्।<br>वैष्णवं विष्णुमूर्ते त्वं गृहाणेन्द्रेण यापितम्॥45॥ |
| इत्युक्त्वा शार्ङ्गिणे शार्ङ्गं प्रददौ कुम्भसम्भवः।<br>इषुधी अक्षयेषू च खड्गं च खलखण्डनम्॥46॥ |
| तानि सङ्गृह्य भगवान् महर्षेरनुमान्य च।<br>अगस्त्योदितमार्ग्गेण ययौ पञ्चवटीं प्रति॥47॥ |

| |
|---|
| अप्रीयत प्रभुं प्रेक्ष्य जटायुः पततां पतिः।<br>सखा दशरथस्याग्रे दासोऽस्मीति ननाम च॥48॥ |
| विनतायां दक्षपुत्र्यां मारीचात् काश्यपात् पुरा।<br>सञ्जातादरुणाज्जन्म स्वस्योवाच विहङ्गमः॥49॥ |
| वैनतेयात्मजयुतो वैनतेयध्वजस्तदा।<br>प्राप पञ्चवटीं रम्यामाराद् गोदावरीयुताम्॥50॥ |
| सालतालतमालांश्च नागपुन्नागचम्पकान्।<br>चन्दनान् स्यन्दनांश्चूतान् खर्जूरार्जुनकिंशुकान्॥51॥ |
| बकुलान् वञ्जुलाशोकान् पाटलानपरानपि।<br>प्रैक्षताऽनम्रशिरसः पार्त्थिवान् पार्त्थिवाधिपः॥52॥ |
| पल्लवैः पवनोद्धूतैः कुर्वाणानञ्जलीनिव।<br>निष्पतद्भिर्मुहुः पुष्पैः कुर्वाणांश्च बलीनिव॥53॥ |
| फलं निवेद्यदेशीयं नैकमर्पयतः पृथक्।<br>आत्मनः स्तवनायैव कलकोकिलनिःस्वनान्॥54॥ |
| चालितान् पवमानेन प्रहर्षादिव नृत्यतः।<br>अभ्यनन्दन्मुकुन्दस्तान् भक्ताभान् भक्तवत्सलः॥55॥ |
| समे स्थले पर्णशालामनुकूलजलाशये।<br>रामवाक्याच्चकाराऽथ लक्ष्मणश्चारुलक्षणः॥56॥ |
| ससौष्ठवां सत्वरितां सप्तहर्षामवेक्ष्य ताम्।<br>शुश्रूषां लक्ष्मणगुरुर्लक्ष्मणं परिरब्धवान्॥57॥ |

तां पर्णशालां विमलां विशालां तापैस्त्रिभिर्न्नानुगतां कदाऽपि।

अध्यास्त रम्यां रमया समेतो रामो मनीषामिव योगभाजाम्॥

इति श्रीनारायणपण्डताचार्यविरचिते रामाङ्के सङ्ग्रहरामायणे अरण्यकाण्डे द्वितीयः सर्ग्गः ॥3-2-58॥ [ आदितः श्लोकाः [1169+58 =1227]

## तृतीयः सर्ग्गः ॥3-3-54॥

वैकुण्ठस्येव वैकुण्ठे वने निवसतः सुखम्।

सार्द्धस्त्रयोदशसमा रामस्यैवं समागमन्॥1॥

उत्थाय काल्ये कल्याणं देवं गोदावरीं गतम्।

सीतां कृत्वाऽग्रतो  बिभ्रत् कलशं लक्ष्मणोऽन्वगात्॥2॥

ऋतौ हेमन्त आलोक्य हिमानीपीडितं जगत्।

प्राञ्जलिः कञ्जनाभं तं सौमित्रिर्वाक्यमब्रवीत्॥3॥

श्रीहानिदा हिमानीयमन्येषां जाड्यकारणम्।

न मां त्वत्पादपार्श्वस्थमियं च प्रतिबाधते॥4॥

इदानीं स्थण्डिलान्नूनमुत्थाय सरयूं गतः।

त्वत्सङ्गमार्त्थी भरतः स हि धन्यतमो भुवि॥5॥

कष्टं कथं नु केकेयी भूत्वा दशरथप्रिया।

सूत्वा च भरतं साधुं तदघं कृतवत्यहो॥6॥

इत्युक्त ऊचे भगवान् कार्य्यो नो रक्षसां वधः।

तस्माद् वनप्रवेशोऽत्र सा निमित्तमभूदिति॥7॥

| |
|---|
| स्नात्वा शालामुपागम्य कृतपौर्वाह्णिकक्रियः।<br>सानन्दं सीतया साकमास्ते स्म जगदीश्वरः॥8॥ |
| एतस्मिन्नन्तरेपापासम्प्राप्ता रावणानुजा।<br>पतिमन्विष्य धावन्ती त्रिलोक्यां रावणाज्ञया॥9॥ |
| परचक्रेण खचितेनिहते निजभर्त्तरि।<br>प्रमादाद् राक्षसेन्द्रेण ततः सा व्यचिनोत् पतिम्॥10॥ |
| त्रैलोक्यसुन्दरं रामं प्राप्य त्रैलोक्यदुर्भगा।<br>शूर्प्पणख्यब्रवीदारादार्त्ता स्मरशराहता॥11॥ |
| कान्त कामयमानां मां कान्तां वहतवोचिताम्।<br>अल्पया सीतया किं ते नन्वहं रावणानुजा॥12॥ |
| इत्युक्त ऊचे भगवान् पश्यन् सीतामुखाम्बुजम्।<br>अस्यां सत्तोऽस्म्यहं भद्रे मद्भ्राता ते भवेदिति॥13॥ |
| राक्षसी लक्ष्मणं प्राप्यप्रोचेमन्मथमोहिता।<br>तरुण त्वमदारोऽसि मम भर्ता भवेरिति॥14॥ |
| अहं शुश्रूषुरार्य्यस्य गच्छाऽर्य्ये वरवर्ण्णिनि।<br>त्वां विना कमनीया का स्यादित्थं लक्ष्मणोऽब्रवीत्॥15॥ |
| तयोरिमां हास्यकथामजानन्ती स्मरार्द्दिता।<br>राक्षसी विकृताकारापुनाराममुपागमत्॥16॥ |
| त्वमेव मम कान्तोऽसि सपत्नीयं स्थिता मम।<br>अदान्येनामिति क्रूरा सीतामभ्यद्रवद् द्रुतम्॥17॥ |

| |
|---|
| राघवस्य मतं ज्ञात्वा लाघवाद् राघवानुजः।<br>चकर्त्त कर्णौ नासां च राक्षस्याः खड्गधारया॥18॥ |
| विस्वरं विरुदन्ती सा स्नाता रुधिरधारया।<br>जगाम शरणं घोरा भ्रातरौ खरदूषणौ॥19॥ |
| कस्य पास्यन्ति रुधिरं कङ्कपत्रा ममाधुना।<br>अजिता विजिता केन त्वमित्यूचे खरोऽथ ताम्॥20॥ |
| तरुणौ तरुणीयुक्तौ वैरिणौ मे वनान्तरे।<br>तयोः पिबेयं रक्तौघमिति राक्षस्यभाषत॥21॥ |
| खरः खरानादिदेश चतुर्द्दश निशाचरान्।<br>ते तया सार्द्धमाजग्मुर्य्यत्र रामो रमासखः॥22॥ |
| आदत्त दत्तारिभयं चापं चामीकरोज्ज्वलम्।<br>आलोक्य लोकनाथस्तान् वचनं चेदमब्रवीत्॥23॥ |
| ब्रह्मद्रुहो वो वत्स्यामि यदि मे तिष्ठताग्रतः।<br>इत्युक्ता आक्षिपन्ति स्म राक्षसा रुक्षलक्षणाः॥24॥ |
| शस्त्रास्त्रवृष्टिं दुर्द्धर्षां शरैश्छित्वाऽथ रक्षसाम्।<br>चतुर्द्दश शरांस्तीक्ष्णान् रुग्मपुङ्खानमुञ्चत॥25॥ |
| शरास्तेऽथ शरीराणि नृशरीराशिनां क्षणात्।<br>भित्त्वा धरातळेऽमज्जन् राक्षसा निरयेऽशुचौ॥26॥ |
| दुःखाच्छूर्प्पणखी गत्वा रुरोद खरसन्निधौ।<br>क्लीबोऽसि त्वं मनुष्याभ्यां भीतः शेषे गृहेष्विति॥27॥ |

अञ्जनाद्रिशरीराणां रक्षसां भीमकर्म्मणाम्।

चतुर्द्दशसहस्राणि प्रातिष्ठन्त खराज्ञया॥28॥

खरोऽद्रिशिखरप्रख्यं कार्त्तस्वरमयं रथम्।

आरुह्य रक्षसां मध्ये ययौ दूषणसंयुतः॥29॥

दिव्यान् भौमांश्च शारीरानुत्पातानभिवीक्ष्य च।

खरः प्रखरसंरम्भादनादृत्यैव तान् ययौ॥30॥

एतस्मिन्नन्तरे रामः सौमित्रिं प्रत्यभाषत।

निमित्तैर्विद्धि युद्धं नः सौमित्रे प्रत्युपस्थितम्॥31॥

एष बाहुः स्फुरति मे चापं चेदं विचेष्टते।

बिलेऽस्मिन् तिष्ठ वैदेह्या सार्द्धं शरधनुर्द्धरः॥32॥

एवमुक्तो भगवता तथा चक्रे स लक्ष्मणः।

रामोऽप्यनाकुलस्तस्थौ सवर्म्मा धृतकार्म्मुकः॥33॥

रक्षोगणः प्रक्षुभितो गत्वा भग्नजवोऽभवत्।

आलोकसीमां रामस्य वेलामिव महोदधिः॥34॥

अमर्षितः खरः प्रागात् परितस्तमथापरे।

श्येनगामी पृथुग्रीवो यज्ञशत्रुर्म्महाविषः॥35॥

दुर्ज्जयः करवीराक्षः परुषः कालकार्म्मुकः।

मेघमाली महाबाहुर्म्महास्यो लोहिताम्बरः॥36॥

द्वादशैते महावीर्य्याः प्रेरयन्तश्चमूं ययुः।

अहं पूर्वमहं पूर्वमिति मत्ताः ससाहसाः॥37॥

| |
|---|
| महाकपालः स्थूलाक्षः प्रमाथी त्रिशिरास्तथा।<br>चत्वार एते सेनाग्रे वीरा दूषणमन्वगुः॥38॥ |
| धनुर्विष्फारयामास दृष्ट्वा तान् दुष्टसूदनः।<br>इषुध्योरिषवस्तस्य जाज्वल्यन्ते स्म वह्निवत्॥39॥ |
| देवोपदेवा मुनयो रामराक्षससङ्गरम्।<br>दिदृक्षमाणा गगनं विमानाग्र्यैरपूरयन्॥40॥ |
| रामोऽयमृजुरेकाकी बहवो मायिनः परे।<br>कथं नु स्वस्ति तस्येति केचिदत्राऽचचक्षिरे॥41॥ |
| यद्भ्रूविभ्रममात्रेण विभ्रश्येद् भुवनत्रयम्।<br>तस्य किं राक्षसकुलं रामस्येत्यपरेऽवदन्॥42॥ |
| स रक्षसां शस्त्रवृष्टिं निरस्य निशितैः शरैः।<br>तान्यथ द्रावयामास क्षणेन कमलेक्षणः॥43॥ |
| दूषणोज्झितमापाथ दूषणो विश्वभूषणम्।<br>सा च सेना जगन्नाथमसेनं प्रत्यपद्यत॥44॥ |
| सालशैलशिलावर्षान् राक्षसान् विमुखां व्यधात्।<br>दूषणं चापि युद्ध्यन्तं सायकैर्ल्लोकनायकः॥45॥ |
| पुनरुद्यच्छतस्तस्य दूषणस्यारिभीषणः।<br>ध्वजं वाहांस्त्रिवेणूंश्च सारथिं चाक्षिणोच्छरैः॥46॥ |
| अच्छकीर्त्तिरथ च्छित्वा सर्वाण्यस्याऽऽयुधानि च।<br>तेन मुक्तां गदां गुर्वीं लीलयाऽऽदारयच्छरैः॥47॥ |

| |
|---|
| रामेणाष्टेषुभिर्विद्धः परिघं परिगृह्य सः।<br>हतोऽसीत्यभ्ययाच्छण्डो दण्डपाणिरिवान्तकः॥48॥ |
| आपतन्तं तमालोक्य पत्रिभ्यां पत्रिकेतनः।<br>राघवो लाघवात् तस्यच्छित्वा बाहू न्यपातयत्॥49॥ |
| दिवोऽभवन्निपतिते दूषणे विश्वभीषणे।<br>जयशब्दो नमः शब्दः पुष्पवर्षश्च राघवे॥50॥ |
| जघान राघवो बाणैर्व्याकुलं रक्षसां कुलम्।<br>अवशिष्टं ततोऽशिष्टं परितः स्म पलायते॥51॥ |
| महाकपालः स्थूलाक्षः प्रमाथीचोद्यतायुधाः।<br>अभ्ययू राक्षसा रामं तान् जघान जगद्गुरुः॥52॥ |
| तुल्यं शरशतेनेशः शतं हन्ति स्म राक्षसान्।<br>सहस्रेण सहस्रं च लीलया लोकवल्लभः॥63॥ |
| एवं चतुर्दशसहस्रपलाशिराशिं |
| रामानलो विशिखनामशिखी प्रदह्य।<br>मुख्यं खराख्यपशुमप्युपयातमारात् |
| प्रत्यैक्षत प्रमदयन् निखिलान् मखान्नान्॥64॥ |
| इति श्रीमन्नारायणपण्डिताचार्य विरचिते रामाङ्के सङ्ग्रहरामायणे अरण्यकाण्डे तृतीयः सर्गः॥3-3-64॥<br>[आदितः श्लोकाः1227+64=1281] |

## चतुर्थः सर्गः ॥3-4-44॥

निवार्य्य त्रिशिरा वीरो राघवाभिमुखं स्वरम्।

ननाद स्वयमभ्येत्य रामो धनुरघोषयत्॥1॥

त्रिशिरास्त्रीञ्छरांस्तीक्ष्णान् मुमोच मधुघातिने।

त्रिशरोवक्षसि क्रुद्धो सामोऽमुञ्चचतुर्दश॥2॥

सूताश्वध्वजविध्वंसं कृत्वा त्रिशिरसः प्रभुः।

हृदये चाष्टभिर्विध्वा शरैर्म्मूर्द्धोऽच्छिनत् त्रिभिः॥3॥

राक्षसक्षयमालाक्ष्य राक्षसाधिपतिः खरः।

रामं सम्प्राप्य नाराचैर्न्नभश्चक्रे निरन्तरम्॥4॥

नभो निर्विवरं चक्रे रामोऽपि परितः खरम्।

शरैरेवं विशश्छन्नास्तदद्भुतमभून्महत्॥5॥

धनुश्छित्वाऽच्छिनद् वर्म्म भूम्नः सप्तशरैः खरः।

रामो विकवचो रेजे विधूम इव पावकः॥6॥

शत्रुघ्नं दिव्यमच्छेद्यं शार्ङ्गं शार्ङ्गी प्रगृह्य सः।

ध्वजं खरस्य चिच्छेद खरोऽमुञ्चचतुःशरान्॥7॥

एकेन मूर्द्ध्नि विव्याध खरं रामोऽत पत्रिणा।

द्वाभ्यां भुजौ त्रिभिर्द्देहं लीलया प्रहसन्निव॥8॥

युगश्वसूताक्षधनुस्त्रिवेणूनक्षिणोच्छरैः।

खरं चैकेन विव्याध देवो देवान् प्रहर्षयन्॥9॥

| |
|---|
| मुनीनां न्यस्तदण्डानां दण्डकारण्यवासिनाम्।<br>इदं ते भक्षणफलं पश्येत्यूचे खरं हरिः॥10॥ |
| विकत्थनं न शूराणां रक्षोहत्याप्रतिक्रियाम्। |
| अनया गदया कुर्य्यामिति रामं खरोऽब्रवीत्॥11॥ |
| तेन मुक्तां गदां रामः शरैर्भित्त्वाऽब्यभाषत।<br>भग्नं ते बलसर्वस्वं क्लीबोऽसि ब्रह्महन्निति॥12॥ |
| आद्रवत् सालमुत्पाट्य खरवन्मुखरः खरः।<br>विव्याधेषुसहस्रेण सालं सञ्चूर्ण्य राघवः॥13॥ |
| गौरिकार्द्रमिवाद्रिं तं रुधिराद्रमभिद्रुतम्।<br>शरेणापातयच्छार्ङ्गी वज्रेणेवाथ वज्रभृत्॥14॥ |
| खरो नरकमापेदे रागवो धवळं यशः।<br>देवसङ्घो मनःस्वास्थ्यमृषिसङ्घः स्वमाश्रमम्॥15॥ |
| पूजितो देवदेवीनां नेत्रैः पुष्पैश्च शोभनैः।<br>ऋषीणां परमाशीर्भिः प्रविवेशाऽऽश्रमं प्रभुः॥16॥ |
| गिरिदुर्ग्गाद् विनिष्क्रम्य सौमित्रिः सह सीतया।<br>ववन्दे परमानन्दं मुनिभिः परिवारितम्॥17॥ |
| आर्य्यपुत्र जगन्नाथ पर्य्याप्तं ते महद् यशः।<br>मुनीनां रक्षयेत्युक्त्वा परिरेभे पतिं सती॥18॥ |
| पराक्रन्दपरा दृष्ट्वा राक्षसी रक्षसां क्षयम्।<br>लङ्कामभ्यद्रवत् क्रुद्धा कृत्तिकेव भयङ्करी॥19॥ |

| |
|---|
| ददर्श सा दशमुखं विमुखं धर्म्ममार्गतः।<br>मानोन्नतं विमानस्थमक्षयं च क्षये रतम्॥20॥ |
| दीना पदे निपतिता रावणं रावणानुजा।<br>उवाच वाचं पुरुषां राक्षसं कोपयन्त्यलम्॥21॥ |
| मत्तः प्रमत्तः कामी त्वं विजित्यापि जगत्त्रयम्।<br>राजलक्षणहीनोऽसि भयं प्राप्तं न बुध्यसे॥22॥ |
| जनस्थानेऽवधीद् रामस्त्रिशिरःखरदूषणान्।<br>स विरूपितवान् मां च त्वं शेषे मृतकोपमः॥23॥ |
| स्वसुरित्थं वचः श्रुत्वा दण्डाहत इवोरगः।<br>क्रुद्धो  दशास्यः पप्रच्छ कोऽयं रामो वदेरिति॥24॥ |
| करौ भयेन धुन्वाना प्रोचे शूर्पणखी वचः।<br>रूपेणाप्रतिमो रामो राजा  दाशरथिः किल॥25॥ |
| चतुर्द्दशसहस्राणि रक्षसां यो न्यपातयत्।<br>धनुर्द्वितीयो यामेन तद्वीर्य्यं केन बुध्यते॥26॥ |
| लक्ष्मणाख्योऽनुजस्तस्य येनाङ्गाहं विरूपिता।<br>रामस्य रामा सीताख्या मन्ये तामुचितां तव॥27॥ |
| यं सम्पृशति सा कान्ता सीता सर्वाङ्गशोभना।<br>सुधाधारेव नैवास्य देहधर्म्मा जरादयः॥28॥ |
| उत्तिष्ठ पुरुषश्रेष्ठ व्याकुलं पाहि नः कुलम्।<br>रामान्तकादुपासन्नादित्युक्त्वा विरराम सा॥29॥ |

| |
|---|
| रामवीर्य्यमनुस्मृत्य कम्पितश्चाविकम्पनः।<br>रावणाय प्रणम्याऽथ तमेवोदन्तमब्रवीत्॥30॥ |
| चिरं सञ्चिन्त्य निश्चित्य रावणोऽधिष्ठितो रथम्।<br>तीरे नदीनदपतेर्ग्गोकर्ण्णं क्षेत्रमाप्तवान्॥31॥ |
| तपस्यन्तं तमस्यन्तं मारिचं तत्रदृष्टवान्।<br>विधिना पूजितस्तेन रावणो वाक्यमब्रवीत्॥32॥ |
| मानवेनैव रामेण खराद्याः स्वजना हताः।<br>तस्य भार्य्यां हरिष्यामि तत्र मित्रं भवाङ्ग मे॥33॥ |
| त्वं सुवर्ण्णमृगो भूत्वा तत्र सीतां विलोभय।<br>अनुधावति रामे त्वां सीतां नेष्याम्यहं सुखम्॥34॥ |
| इत्युक्त ऊचे मारीचो न रामं वेत्थ रावण।<br>यस्यैकः सायको हन्तुमलं सासुरराक्षसान्॥35॥ |
| ऊनषोडशवर्षस्य विश्वामित्रात्र्थमीयुषः।<br>सिद्धाश्रमेऽन्वभूवं हि तैक्ष्ण्यं रामस्य पत्रिणः॥36॥ |
| पुनश्चाहं गतो वैराद् राक्षसाभ्यां मृगाकृतिः।<br>दण्डके तौ हतौ तस्य शरैर्भग्नोऽहमागतः॥37॥ |
| स्वपक्षक्षयकोपाच्च सीताकामाच्च मा स्म गाः।<br>रामं त्वं जीवनात्र्थी चेत् प्रोच्येति विरराम सः॥38॥ |
| विपक्षपक्षं हन्यां त्वामाज्ञां मे न करोषि चेत्।<br>इति ब्रुवन् निश्चकर्ष कोशात् खड्गं दशाननः॥39॥ |

मारीचो मरणाद् भीतः पापात्मा च तिसर्ग्गतः।
रावणेन सहाऽरुह्य तं रथं दण्डकान् ययौ॥40॥

अवरुह्य रथात् तस्माद् रावणेनाभिनन्दितः।
मायामृगात्मा मारीचो रम्ये रामाश्रमेऽचरत्॥41॥

मुक्ताप्रवाळप्रच्छन्नो हेमबिन्दुशतान्वितः।
श्रृङ्गारितश्चतुःश्रुङ्ग्या रौग्म्या मन्दं चचार सः॥42॥

मायामृगं प्रेक्ष्य देवी मायामानुषधर्म्मिणी।
मायामनुष्यस्य विभोर्म्मायास्मितमवैक्षत॥43॥

रक्षोलक्षकुलाभिचारमखिलत्रैलोक्यसौख्याकरं
भ्राम्यन्मन्दमनीषमण्डलमनोमोहार्णवोद्घूर्णनम्।
तत्वज्ञानजुषां विडम्बनमहानाट्याग्ररङ्गं वचो
रामाणां परमा रमा स्वरमणं रामं बभाषे तदा॥44॥

इति श्रीनारायणपण्डिताचार्यविरचिते रामाङ्के सङ्ग्रहरामायणे अरण्यकाण्डे चतुर्थः सर्ग्गः॥3-4-44॥

[आदितः श्लोकाः 1281+44=1325]

## पञ्चमः सर्ग्गः॥3-5-48॥

क्रीडार्त्थं चित्रसारङ्गं देहिमं देवदेव मे।
बृस्या आस्तरणायात्र विचित्रामस्य वा त्वचम्॥1॥

इत्युक्तो देव आदाय चापं चारु कलापवान्।
रक्ष लक्ष्मण सीतां त्वमित्युक्त्वा मृगमन्वगात्॥2॥

दूरं दुद्राव दुष्टात्मा मारीचो वीक्ष्य राघवम्।
रामोऽपि तमनुद्रुत्य मुमोचान्तकरं शरम्॥3॥

हा लक्ष्मणेति विक्रुश्य रावणस्यात्र्थसिद्धये।

विद्धः स्वरूपवान् पापोभुवमार ममार च॥4॥

सर्वज्ञाऽप्यथ सर्वेशी कर्त्तुं रक्षः परिक्षयम्।

आर्त्तनादं तमाकर्ण्य लक्ष्मणं प्रत्यवोचत॥5॥

हा लक्ष्मणेत्यार्त्तनादो नूनं रामस्य लक्ष्मण।

गच्छ तूर्णं विजानीया इत्युक्तो लक्ष्मणोऽब्रवीत्॥6॥

यद्भ्रूविभ्रममात्रेण सुरासुरनरादिकम्।

विश्वं स्थितिलयोत्पत्तीर्य्याति तस्याम्ब किं भयम्॥7॥

नाथो नारायणात्मा नो न शोच्यो देवी राघवः।

माया मायाविनामेषा स्यान्नूनं पिशिताशिनाम्॥8॥

इत्युक्ता भगवत्यूचे सौहार्द्दं नास्ति ते कथम्।

इच्छस्युपरते देवे त्वं क्रूर शठ मामिति॥9॥

श्रुत्वेति दुश्रवं वाक्यं रुदन्नाचष्ट लक्ष्मणः।

दिग्धिङ् महापातकिनं मामेवंवचनास्पदम्॥10॥

आर्य्यस्याऽज्ञाविमोक्षोऽयमार्य्याया लङ्घनाल्लघुः।

स्वस्ति तेऽस्तु गमिष्यामि मातस्त्वां पातु शार्ङ्गभृत्॥11॥

इत्युक्त्वाऽन्वद्रवत् तूर्णं राघवं राघवानुजः।

देवी च देवकार्य्यं तत् कुर्वाणाऽत्राऽऽश्रमेऽवसत्॥12॥

राक्षसो भिक्षुवेषेण प्राप्तवान् राघवाश्रमम्।

अकामयत तां देवीं श्रुतिं शूद्रइवावरः॥13॥

| |
|---|
| का त्वं कान्तेऽनवद्याङ्गी व्यक्तं देवी न मानवी।<br>कस्मात् कान्तारमापन्नाऽसीति तां रावणोऽब्रवीत्॥14॥ |
| राजा दाशरथी रामो वनं पित्राज्ञयाऽऽव्रजत्।<br>तस्याहं दयिता पत्नी सीतेति प्रत्यभाषत॥15॥ |
| श्रुत्वा दृष्ट्वा च रम्यां त्वां कामार्त्तो रावणोऽस्म्यहम्।<br>त्रैलोक्येशस्य मे प्रेष्ठा भवेति स्माऽऽह रावणः॥16॥ |
| अप्रमेयप्रभावं त्वं न रामं वेत्थ राक्षस।<br>मत्कामाल्लप्स्यसे मृत्युमिति सीता तमब्रवीत्॥17॥ |
| सेन्द्रदेवविजिष्णोर्म्मे किं रामान्मानवाद् भयम्।<br>इति स्वं घोरमाकारं गृहीत्वा रावणोऽभ्ययात्॥18॥ |
| अधृष्यशक्तिः शक्ताऽपि विक्षेप्तुं राक्षसेश्वरम्।<br>विश्वेश्वरी तिरोऽभूत् सा सृष्ट्वा प्रतिकृतिं निजाम्॥19॥ |
| विज्ञाय रामस्य मतं सीता कैलासमाययौ।<br>वन्द्यमानाऽवसत् तत्र शिवया च शिवेन च॥20॥ |
| तां जानकीप्रतिकृतिं मन्वानो जानकीं खलः।<br>तूर्णं स्यन्दनमारोप्य गगने गतवानथ॥21॥ |
| करुणं विललापाऽथ च्छलसीता पुनः पुनः।<br>हा राम रावणात् पाहि मां हा लक्ष्मण लक्षय॥22॥ |
| इमामवस्थां रामाय त्वं ब्रूहि वनदेवते।<br>हाहा जटायो पक्षीन्द्र क्षिप्रं रामाय वेद्यताम्॥23॥ |

| |
|---|
| इत्थं जटायुशब्दं तं जटायुरभिशुश्रुवान्।<br>पर्वतादुत्पपाताऽथ पर्वताग्र्यइवापरः ॥24॥ |
| नय मा राममहिषीं मयि जीवति राक्षस।<br>शयिष्यसे रामबाणैरिति गृध्रोऽभ्यधादिमम्॥25॥ |
| ततः प्रववृते युद्धं पक्षिराक्षसराजयोः।<br>नखतुण्डैश्च बाणैश्च परस्परवधैषिणोः॥26॥ |
| राक्षसः क्षतगात्रोऽथ नखतुण्डैर्जटायुषः।<br>मुमोच गृध्रराजाय दशाऽशु निशिताञ्छरान्27॥ |
| पक्षाभ्यामक्षिणोच्चापं सारथिं नखरैः खरैः।<br>रथं छत्रं च वाहांश्च विहङ्गो भङ्गमानयत्॥28॥ |
| खेचरैः स्तूयमानोऽसौ खेचरं वीक्ष्य रावणम्।<br>आक्षिप्य परुषैर्वाक्यैरारुरोहाथ पृष्ठतः॥29॥ |
| पृष्ठपीठं चखानाथ नखैः पक्षी तु रक्षसः।<br>विमोचनाय तन्वङ्ग्याः केशांश्चास्योदपाटयत्॥30॥ |
| विमुच्य मृगशाबाक्षीं राक्षसः पक्षिविक्षतः।<br>अभ्यापतत् पतत्रीन्द्रं तौ मुहूर्त्तं न्ययुध्यताम्॥31॥ |
| तस्य श्रान्तस्य बुद्धस्य षष्टिवर्षसहस्रिणः।<br>पक्षौ पादौ च पार्श्वे च खड्गेनाखण्डयत् खलः॥32॥ |
| मन्दचेष्टं निपतितं राममित्रं पतत्रिणम्।<br>मायासीता तमाश्लिष्य विललाप शुकालपा॥33॥ |

हठेन कठिनात्मा सा तामाकृष्य निशाचरः।
गृहीत्वाऽऽकाशमाक्रम्य प्रययौ वायुवेगवान्॥34॥

हृतायां रक्षसा तस्यां चुक्षोभेदं चराचरम्।
हिरण्याक्षेण दैत्येन क्षोण्यामिव गरीयसा॥35॥

लोकनाथस्य कान्तां मां कालपाशायितां तव।
मुञ्चमुञ्चेति सा तन्वी रुरोद करुणं मुहुः॥36॥

पन्नगीमिव लोठन्तीं दीप्तां वह्निशिखामिव।
अङ्के लङ्केश्वरो बिभ्रत् स्वमृत्यै तां निनाय सः॥37॥

वानरान् गिरिश्रृङ्गे सा पञ्चपञ्चास्यविक्रमान्।
अवलोक्याक्षिपन्मध्ये तेषामात्मोत्तरीयकम्॥38॥

अग्निवर्णान् निजाकल्पान् पातयामास तत्र सा।
आत्मपूर्णस्य कोपाग्नेः शेषानिव सुमध्यमा॥39॥

हनुमान् वानरश्रेष्ठस्तत्र भागवताग्रणीः।
जिघांसू रावणं गच्छन् वारितो रविसूनुना॥40॥

नगान् नदीरतिव्रज्य नदीभर्त्तारमप्यथ।
लङ्कां लङ्केश्वर प्राप्य चिन्तयामास पापधीः॥41॥

रक्षोवरान् वरोत्सिक्तानष्टौ दुष्टः समादिशत्।
जनस्थाने हतस्थाने रामो विज्ञायतामिति॥42॥

प्रविश्यान्तःपुरं तन्व्यै दर्शयामास रावणः।
सर्वसम्पत्समृद्धं तद् वचनं चेदमब्रवीत्॥43॥

आगन्तेदं कथं दुर्गं रामः किं वाऽत्र साधयेत्।
निराशा भव रामे त्वं भार्य्या मे श्रीमतो भव॥44॥

इत्युक्ता साश्रुनेत्रोचे कुत्र रामो न यास्यति।
गुप्तं सुरसुरैश्च त्वां सूदयेध् भगवानिति॥45॥

ततो निर्भत्सयन् क्रुद्धो राक्षसीभिश्च तर्ज्जयन्।
तन्वीमशोकवनिकां यापयामास राक्षसः॥46॥

हंसीव टिट्टिभीभिः सा काकैरिव च कोकिला।
उवास शिंशपामूले राक्षसीभिर्वितर्ज्जिता॥27॥

लक्ष्मीलक्ष्मीपती तावमितगुणगणौ सर्वदा सर्वदेशे
व्याप्तौ निर्द्दोषलेशौ सकलतनुभृतां प्रेरको लीलयैव।
सीतारामाभिधानौ कथमथ विरहः स्यात् तयोः शोकलेशः
कुत्र स्याच्छद्मनेदं प्रकटितमसुखं नाट्यवन्नाऽऽत्मरूपम्॥48॥

इति श्रीनारायणपण्डिताचार्यविरचिते रामाङ्के सङ्ग्रहरामायणे अरण्यकाण्डे पञ्चमः सर्गः॥3-5-48॥
[आदितः श्लोकाः 1325+48=1373]

## अथ षष्ठः सर्गः॥3-6-43॥

मारयित्वाऽथ  मारीचं स्वाश्रमाभिमुखं व्रजन्।
ऊचे दृष्ट्वाऽभिधावन्तं लक्ष्मणं लक्ष्मणाग्रजः॥1॥

मायिनां रक्षसां स्थाने मुक्त्वा सीतां त्वमागतः।
निमित्तान्यप्यभद्राणि पश्येत्युक्त्वा ययौ प्रभुः॥2॥

| |
|---|
| अश्रमः स्वाश्रमं प्राप्य सोऽपश्यन्निव मैथिलीम्।<br>शोकाद् विचिन्वन्निव वा नाटयामास केवलम्॥3॥ |
| शुद्धां मान्यां सदा रक्ष्यां सीतामाज्ञां च मे समम्।<br>त्यक्तवान् मित्र सौमित्रे त्वमित्थं राघवोऽब्रवीत्॥4॥ |
| शोकनिष्पन्नबाष्पाम्बुर्लक्ष्मणोऽप्यब्रवीच्छनैः।<br>हालक्ष्मणेतिशब्दान्मां देवी गच्छेत्यचोदयत्॥5॥ |
| पालकस्त्रिदशानां च देवि देवो न संशयः।<br>न तस्य व्यसनं शङ्क्यं मयेत्युक्तेऽप्युवाच सा॥6॥ |
| पाप ते पापरूपत्वान्मानसं मयि सङ्गतम्।<br>तस्मादुपेक्षसे राममित्युक्तोऽहं विमोहितः॥7॥ |
| तेन वाक्यशरेणाऽहं विद्धो मृगइवाऽऽद्रुतः।<br>इत्युक्त्वा विरुरोदोच्चैर्मुक्तकण्ठोऽथ लक्ष्मणः॥8॥ |
| सर्वभूतानि पप्रच्छ सर्वत्र विचिकाय च।<br>सर्वभूतान्तरः सीतां सर्वविच्चापि मूढवत्॥9॥ |
| विरुरोद विचुक्रोश विललाप पुनःपुनः।<br>हा सीते क्वासि हन्तेति धूतदुःखोऽपि दुःखिवत्॥10॥ |
| श्रान्तवत् कामविदपि स जिघत्सुपिपासुवत्।<br>निर्द्वन्द्वदुःखोऽप्यद्वन्द्वश्चेष्टते स्मातिरुष्टवत्॥11॥ |
| रजस्तमोमयैर्भावैः शोकाद्यैःप्रकृतेः परः।<br>अस्पृष्टस्तत्र विस्पष्टं नैकं मानं विचक्षते॥12॥ |

| |
|---|
| सान्त्वयामास किल तं लक्ष्मणः शोककोपयोः।<br>यत्पादपांसुं संस्मृत्य द्वन्द्वं च्छिन्दन्ति योगिनः॥13॥ |
| एतैर्दोषैः समं रामं मन्वाना  मन्दचेतसः।<br>आपदं स्म प्रपद्यन्ते सगरक्षीरपायिवत्॥14॥ |
| स्वच्छं येऽनुभवन्तीमं रामं दोषान् विहाय तान्।<br>त्यक्त्वा नीरं यथा क्षीरं हंसास्ते सम्पदां पदम्॥15॥ |
| एवं बभौ सदसतां विवेकाय स राघवः।<br>रजतानां च शुक्तीनां विवेकायेव पावकः॥16॥ |
| सञ्चरन्नञ्चनीयाङ्घ्रिर्विचिन्वानिव प्रियाम्।<br>जनस्थानवनप्रान्ते जटायुषमवैक्षत॥17॥ |
| छिन्नपक्षपदं दृष्ट्वा पतितं पर्वतोपमम्।<br>सीताऽर्थेऽथ ययौ तस्मिन् करुणां करुणाकरः॥18॥ |
| आर्त्तो वार्त्तां विशालाक्ष्या निवेद्य जगदीशितुः।<br>चरणाम्बुरुहं दृष्ट्वा मरणं प्राप पक्षिराट्॥19॥ |
| भक्ताय स्वगतिं दत्वा तस्मै तस्य कळेबरम्।<br>संस्कारयामास विभुर्लक्ष्मणेन यथाविधि॥20॥ |
| गत्वा गोदावरीं वारि दत्वा तस्मै पतत्रिणे।<br>जनस्थाने निशां नीत्वा पश्चिमां जग्मतुर्दिशम्॥21॥ |
| तावतीत्याथ गच्छन्तौ गहनानि बहून्यपि।<br>अपश्यतां कुक्षिगास्यं कबन्धं नाम राक्षसम्॥22॥ |

| |
|---|
| योजनायातबाहुभ्यां सिंहव्याळमृगान् बहून्।<br>आकृष्य निक्षिपन्नास्ये राघवौ चाग्रहीदयम्॥23॥ |
| दक्षिणो दक्षिणं बाहुमक्षिणोत् खड्गधारया।<br>रामो रामानुजश्चास्य वामो वाममखण्डयत्॥24॥ |
| आ मूलतः कृत्तहस्तो रक्तो रुधिधारया।<br>पतितः परिपप्रच्छ वीराग्र्यो कौ युवामिति॥25॥ |
| सौमित्रिस्तमुवाचात्र रामो दाशरथिर्हरिः।<br>अयमस्यानुजश्चाहं को वा त्वं कत्थ्यतामिति॥26॥ |
| कबन्धः प्रत्युवाचाथ धन्योऽस्मि भवदीक्षया।<br>नमो राम जगन्नाथ शापमोक्षोऽयमागतः॥27॥ |
| दनुर्न्नामास्मि गन्धर्वः शापाद् रक्षस्त्वमागतः।<br>अवध्यो ब्रह्मवरतो वज्रपातेन कुञ्चितः॥28॥ |
| नारायण प्रसीदेति स्वां तनुं विमुमोच सः।<br>रामाज्ञयाऽथ सौमित्रिस्तद्देहमदहद् बिले॥29॥ |
| दनुः स्वरूपी प्रोवाच राम त्वद्भक्तिमान् कपिः।<br>सुग्रीवो हनुमद्युक्तः सीतान्वेष्टा भवेदिति॥30॥ |
| परिक्रम्य प्रणम्याथ दनुर्द्दनुजसूदनम्।<br>स्वर्ग्गं ययौ ययौ चेशो दनुनोक्तेन वर्त्मना॥31॥ |
| तौ पम्पाभिमुखौ यान्तौ पश्चां प्राचीं दिशं तदा।<br>नीत्वा निशां शैलपृष्ठे प्रभाते जग्मतुः पुनः॥32॥ |

| |
|---|
| मतङ्गस्याऽऽश्रमं चित्रं मत्तमातङ्गगामिनौ।<br>पम्पायाः पश्चिमे तीरे वीरौ विविशतुः सुखम्॥33॥ |
| आलोक्य लोकनाथं तं सानुजं स्वाश्रमागतम्।<br>शबरी पूजयामास फलमूलैस्तपस्विनी॥34॥ |
| अपि ते कुशलं भद्रे नियमेषु यमेषु च।<br>इति पृष्टा भगवता तुष्टा योगिन्यभाषत॥35॥ |
| पद्मनाभ भवत्पादपद्मसद्मनोळिनाम्।<br>मुनीन्द्राणां प्रसादान्मे कुशलं कृपया तव॥36॥ |
| मतङ्गवाक्यमुकुरे मतं रूपमिदं तव।<br>अपरोक्षमवेक्षेऽहं परं ब्रह्म गुणार्णवम्॥37॥ |
| अनुज्ञां देहि यज्ञेश प्रसीदेत्यभिधाय सा।<br>पश्यन्तीशं विवेशाथ ज्वलितं ज्वलनं सती॥38॥ |
| अवैदिक्यै शबर्य्यै च दयालुः स्वगतिं ददौ।<br>तस्या भक्त्या भृशं प्रीतो भक्तिर्हि भवमोचिनी॥39॥ |
| सौमित्रिणा सङ्कथयन् गच्छन्नच्छां स ऐक्षत।<br>दासीमिवाच्छाम्बुवहां पम्पां पङ्कजमालिनीम्॥40॥ |
| स्त्रीसङ्गीनामित्थममङ्गलावलिं प्रकाशयन् साधुषु मोहयन् परान्।<br>नित्यं निजानन्दरसानुभूतिमान् निर्दुःखलेशोऽपि बभौ स दुःखिवत्॥42॥ |
| सह निजसहजेन स्वैरमानन्दमूर्तिर्व्यलसदनलसोऽसौ तत्र पम्पातटान्ते।<br>अनुपममनुरागं बिभ्रतीं भक्तमुख्ये हनुमति मतिदूतीं प्रेषयन् रामदेवः॥43॥ |

इति श्रीनारायणपण्डिताचार्य्यविरचिते रामाङ्के सङ्ग्रहरामायणे अरण्यकाण्डे षष्ठः सर्गः॥3-6-43॥

[आदितः श्लोकाः 1373+43=1416] [अरण्यकाण्डे श्लोकाः 291]

# किष्किन्धा काण्डम्॥4-8-॥

## प्रथमः सर्गः ॥4-1-36॥

प्लवङ्गमानां गत आधिराज्यं प्लवङ्गमः केसरिनामधेयः।
मेरावुवासाञ्जनया सुगात्र्या शच्या शचिकान्तइव द्युलोके॥1॥

हन्तुं भरद्वाजमभिद्रवन्तं सिन्धोस्तटे सिन्धुरमुन्मदान्धम्।
अवेक्ष्य दूरादपि तस्य कुम्भे स केसरी केसरिवत् पपात॥2॥

तं शङ्खपूर्वं शबलं स हत्वा तीर्थं मुनिनामभयं चकार।
महर्षिसङ्घः समवाप हर्षं वरं वृणीष्वेति च तं जगाद॥3॥

यदि प्रसन्ना भगवत्तमा मे सुतं वृणे सर्वगुणाभिरामम्।
तस्मान्न मुख्योऽस्तु विना मुकुन्दमेवं स वव्रेऽथ वरं द्विजेभ्यः॥4॥

ततः कदाचित् कमलायताक्षी स्नाता सुवस्त्राभरणाऽञ्जना सा।
रम्यान्तमाराममुपश्रयन्ती प्राणं प्रधानं ललितं ददर्श॥5॥

संस्पर्शनं नस्तव देवि भूत्यै प्रोच्येति बालामतिमात्रलज्जाम्।
श्रीमद्भुजाभ्यां परिरभ्य देवो व्यधत्त गर्भं भुवनप्रगल्भम्॥6॥

असूत सूनुं तमसां विनाशं तमञ्जना सज्जनकञ्जबन्धुम्।
अनर्घमाणिक्यमणिप्रकाशं प्राचीव देवं जगदेकदीपम्॥7॥

प्राणात्मके प्राणसुते प्रजाते चूडामणौ भगवतोत्तमानाम्।
ननन्द चेतः सुरसुन्दरीणां गर्भः पपातासुरसुन्दरीणाम्॥8॥

| |
|---|
| सञ्जातमात्रं शिशुमद्भुताङ्गं बुभुक्षितं तं बलिनं विलोक्य।<br>यावत् फलार्थं जननी जगाम तावत् स बालः सहसोत्पपात॥9॥ |
| उद्यद्दिनेशं ग्रसितुं प्रयान्तं तत्तेजसा लोहितमाशु राहुम्।<br>प्रत्युद्ययौ नाम फलं विचिन्वन् निसर्गतो दुष्टजनासहोऽसौ॥10॥ |
| तमुत्पतन्तं हरिचक्रकल्पं विलोक्य लोकः सकुतूहलोऽभूत्।<br>सद्योऽस्य जातस्य सुतेज ईधृग् यूनोऽप्रमेयं हि भविष्यतीति॥11॥ |
| राहुस्तु शक्रं शरणं जगाम शक्रोऽपि वज्रं शिशवे मुमोच।<br>अन्याभिसक्ताय नधर्म्मबुद्धिर्म्मोद्यन् प्रमाद्येत् सुजनोऽपि नूनम्॥ |
| निस्ताडितोऽसौ निशितेन तेन शैलेन्द्रशृङ्गेऽथ शिशुः पपात।<br>प्राणाधिनाथः प्रणयात् स्वपोतं जग्राह कुप्यन् कुलिशायुधाय॥13॥ |
| तेनाऽगसा प्राणपतौ सकोपे चेलुर्न्न लोकाः शिवशक्रमुख्याः।<br>प्राणं विना प्राणिषु नास्ति चेष्टा श्रेष्ठापराधा हि फलन्ति सद्यः॥14॥ |
| यज्ञो न नैवाध्ययनं न धर्म्मो नोच्छ्वासनिश्वासविधिः कुतोऽन्यः।<br>लोकप्रणेतुः कुपितेन लोके प्रजाः प्रजापं शरणं प्रजग्मुः॥15॥ |
| ब्रह्माऽथ किञ्चित् कुपितो बभाषे कः स्वामिने द्रुह्यति जीवितेप्सुः।<br>ऐश्वर्य्यमत्तस्त्रिदशेश्वरोऽयं स्वस्य प्रजानां च चकार दुःखम्॥16॥ |
| श्रेष्ठं श्रुतिर्ज्येष्ठमिमं पपाठ प्राणं तथोक्थं जगतां च सूत्रम्।<br>न मद्वशोऽयं न शिवादिकानां नाथोऽस्ति नारायण एव तस्य॥17॥ |
| वाणीमुदाहृत्य तदेत्युदारां शम्भुः सशर्वः प्रययौ प्रजाभिः।<br>आहूय देवानुपदेवयुक्तान् सपुत्रको यत्र स जीवदेवः॥18॥ |

| |
|---|
| भ्रूभङ्गमात्रेण जगन्ति हन्तुं क्षमं क्षमायां क्षमया निषण्णम्।<br>ध्यायन्तमङ्कार्प्पितपुत्ररत्नं प्रियं सखायं भगवान् ददर्श॥19॥ |
| स वेदगर्भः करुणाकुलात्मा तूर्णं कराग्रेण सुधामयेन।<br>व्यचीकसद् बालमथाभिमृश्य विशुद्धरूपं कुमुदं यथेन्दुः॥20॥ |
| नास्तीश्वराणां जगतीशितव्ये मन्युः पितॄणामिव पुत्त्रवर्ग्गे।<br>उक्त्वेत्युदस्थापयदाशु वायुं हस्तेन हस्तं प्रतिगृह्य वेधाः॥21॥ |
| प्राणे प्रसन्ने वितते जगाम प्राणिव्रजोऽयं प्रकृतिं विपन्नः।<br>निदाघसन्तप्त इवातिमात्रं जलागमे गाधजलेचरौघः॥22॥ |
| भङ्गे प्रसक्तेऽपि  न भङ्गमाप हनुः शिशोर्य्यद्धनुमानतोऽयम्।<br>उक्त्वेत्थमम्लानसरोजमालां दिव्यां महेन्द्रो निदधे तदंसे॥23॥ |
| प्राणाङ्कगं प्राणमिव द्वितीयं बालं च बालेतरसद्गुणाब्धिम्।<br>सभा सुराणामथ भासुरं तं सभाजयामास सभाजनीयम्॥24॥ |
| शस्त्रास्त्रसोढाऽखिलशत्रुहन्ता शास्त्रेषु सर्वेषु विगद्धबुद्धिः।<br>ततो हनूमान् भवत्प्रियाणां श्रेष्ठोऽयमित्यभ्यधिताब्जयोनिः॥25॥ |
| सूर्य्यान्तिके व्याकरणाभियोगी सूर्य्याभिमुख्येन पतंश्च पश्चात्।<br>प्राच्याद् गिरेरस्तगिरिं जगाम ग्रन्थं महान्तं हनुमान् दधानः॥26॥ |
| आनन्दभाजो हरिभक्तिराज्ये प्रवृद्धनानागुणरत्नराशेः।<br>तस्येन्द्रियारातिजयध्वजोऽभूत् सद्ब्रह्मचर्य्यं भुवनाभिपूज्यम्॥27॥ |
| चातुर्य्यमाधुर्य्यसुवीर्य्यशौर्य्यैरौधार्यधैर्य्यप्रवरैर्ग्गुणैः स्वैः।<br>सर्वज्ञतासर्वसमर्थताद्यैर्हनूमतः कोऽस्ति समस्त्रिलोक्याम्॥28॥ |

| |
|---|
| असावसङ्गो विविधेऽपि लोके सर्वत्र सर्वेश्वरमेव पश्यन्।<br>चचार योगानुगतान्तरात्मा मरुत्समानो मरुतस्तनूजः॥29॥ |
| सौख्याय सख्यं स्वयमाप तेन सुग्रीवनामा प्लवगप्रबर्हः।<br>श्रीमाननेकैः सचिवैर्य्युतोऽपि शतक्रतुर्य्यद्वदुरुक्रमेण॥30॥ |
| पम्पातटे फुल्लवने प्रकाश्य वियोगिनां शोकदशामशोकः।<br>सलक्ष्मणोऽसौ गत ऋश्यमूकं तौ वानरेन्द्रौ भगवान् ददर्श॥31॥ |
| सिंहप्रभं पूरुषसिंहमेनं निरीक्ष्य रक्तायतनेत्रमत्र।<br>सबाणबाणासनपाणिमारात् स पुप्लुवे सूर्य्यसुतः सहान्यैः॥32॥ |
| अन्याद्रिसंस्थान् भयकम्पिताङ्गान् प्रकम्पितागान् प्लवगानवेक्ष्य।<br>अप्राकृतात्मा पुरुषोत्तमोऽयं न वो भयायेत्यवदद्धनूमान्॥33 |
| सगद्गदं सूर्य्यसुतस्तमूचे नूनं सखे वालिहिताय वीरौ।<br>इमौ जिघांसू मम पार्श्वमाप्तावेतौ परिक्षस्व विचक्षणेति॥34॥ |
| स भिक्षुवेषो हनुमान् स्ववेषं विहाय विश्वेश्वरपार्श्वमाप्य।<br>प्रणाममष्टाङ्गविशिष्टमस्मै चकार विभ्रद् विनयं नयं च॥35॥ |
| चरणतरुणपद्मापातिनं तं रघुतिलको हनुमन्तमात्मदासम्।<br>उदहरदथ चक्रलक्ष्मभाजा करकमलेन सुकोमलेन रामः॥36॥ |
| इति श्रीनारायणपण्डिताचर्यविरचिते रामाङ्के सङ्ग्रहरामायणे किष्किन्धाकाण्डे प्रथमः सर्गः॥4-1-36॥<br>[आदितः श्लोकाः 1415+36=1451] |

| द्वितीयः सर्गः ॥4-2-51॥ |
|---|
| आञ्जनेयोऽञ्जलिं बध्वा कञ्जलोचनसन्निधौ।<br>अञ्जसा वाक्यमादत्त मञ्जुलं चित्तरञ्जनम्॥1॥ |
| चोद्यस्यास्योत्तरं वीर प्रतिभा प्रतिभाषते।<br>तथाऽपि चोद्यतेऽस्माभिर्भवदालापनोलुपैः॥2॥ |
| को भवान् भुवनाश्चर्य्यं रूपमीदृशमुद्वहन्।<br>नन्दने नन्दितुं योग्यः क्षुद्रं वनमिदं गतः॥3॥ |
| जटाचीराक्षमालानां त्वत्सङ्गममहोत्वे।<br>मौलिकौशेयवलयैः कुत्र यातं समत्सरैः॥4॥ |
| बाणपूर्ण्णे इमे तूणी पाणिः कोदण्डमण्डितः।<br>अहो परिघबाहो त्वां शंसन्ति खलखण्डनम्॥5॥ |
| एषा खड्गलता श्यामा चण्डिकेवातिचण्डिका।<br>केषां प्राणानहार्षीत् ते केषां प्राणान् हरिष्यति॥6॥ |
| अन्वेष्टुमिव सन्त्यक्तं कृतकृत्यो भवन् कुतः।<br>अम्भुजाभेप्रतिस्तम्भं व्यापारयसि लोचने॥7॥ |
| अनुगन्ताऽनुरूपात्मा कोऽयं ते पुरुषर्षभ।<br>चतुरङ्गं बलं त्यक्त्वा परिवारं यमग्रहीः॥8॥ |
| इदानीमन्यलोकेभ्यो मन्ये धन्यामिमां धराम्।<br>पदपद्मभराक्रान्तां युवयोःपद्मलोचन॥9॥ |

| |
|---|
| नरलोकानुरागेण नरनारायणावुभौ।<br>अवतीर्य्य महीपृष्ठे चरतःप्रतिभाति मे॥10॥ |
| वालिनो वानरेन्द्रस्य भ्राता भ्रातृव्यतां गतः।<br>सुग्रीवो नाम तस्याहं सुसखा वायुनन्दनः॥11॥ |
| अपूर्वपुरुषं दृष्ट्वा भवन्तं तेन बिभ्यता।<br>जिज्ञासुना प्रेषितोऽहं भिक्षुरूप उपागमम्॥12॥ |
| श्रुत्वा वाक्यं हनुमतो रामो लक्ष्मणमब्रवीत्।<br>अमित्राणाममित्रोऽयं सौमित्रे मित्रमेष नः॥13॥ |
| व्यक्तं व्याकरणं कृत्समनेन बहुधा मतम्।<br>बहु व्याहरताऽनेन न किञ्चिदपशब्दितम्॥14॥ |
| काकुत्स्थेनेति कथिते चित्तवित् तस्य लक्ष्मणः।<br>उदाहरदुदारात्मा मधुरं मारुतिं प्रति॥15॥ |
| राज्ञो दशरथस्याङ्ग पुत्रोऽयं पुरुषर्षभः।<br>रामो नाम रमाकान्तादन्यो नास्य समो गुणैः॥16॥ |
| किरीटं कीटवत् त्यक्त्वा महाराज्यैकलक्षणम्।<br>गुरोर्निर्योगं शिरसा वहन् वनमुपाययौ॥17॥ |
| राकाचन्द्रं चन्द्रिकेव पतिमेनं पतिव्रता।<br>अन्वयासीदनायासा जानकी जगतां पतिम्॥18॥ |
| अस्य पादरजोदास्यं वरिष्ठं सर्वसम्पदः।<br>वाञ्छन्नन्वागतो ज्येष्ठं नामतो लक्ष्मणोऽस्म्यहम्॥19॥ |

| |
|---|
| दुराचारेण चोरेण चोरिता रक्षसा वने।<br>अस्य भार्य्या सती सीता शूद्रेणेव शुभा श्रुतिः॥20॥ |
| सुग्रीवः किल साहाय्यं सीतां द्रष्टुं करिष्यति।<br>प्रतीक्षते प्रभुर्य्युष्मान् सज्जनान् सज्जनप्रियः॥21॥ |
| इत्युक्त ऊचे हनुमान् देव दैवोपपादितम्। |
| सुग्रीवो वालिसन्त्रस्तस्त्वां राम शरणं गतः॥22॥ |
| पुरुषोत्तम ते सख्यं सौख्याय कपिरिच्छति।<br>स्वामिनस्तव कार्य्यं नः स्वकृत्यं साधयामहे॥23॥ |
| इत्युक्त्वा मारुती रामं सुस्मितास्यं सलक्षणमणम्।<br>आरोपयामास तदानिजांसयुगलं द्रुतम्॥24॥ |
| ऋश्यमूकवनोद्देशान्मलयाद्रिं व्रजन् हरिः।<br>सरामलक्ष्मणो रेजे ससूर्य्येन्दुरिवाम्बुदः॥25॥ |
| सूर्य्यवंशध्वजे प्राप्ते सूर्य्यकोटिप्रभे प्रभौ।<br>सूर्यसूनुरभूत् फुल्लः सूर्य्य आप्त इवाम्बुजम्॥26॥ |
| उवाच वाचं हनुमान् सुग्रीवमवलोकयन्।<br>तात दाशरथिं रामं सानुजं पश्य नः पतिम्॥27॥ |
| कोटिजन्मार्ज्जितैः पुण्यैर्दुर्ल्लभं स्वयमागतम्।<br>रामस्य दर्शनं नोऽद्य कैवल्यमिव केवलम्॥28॥ |
| अनन्यशरणस्त्वं हि शरण्यं शरणं व्रज।<br>रामं राजीवनयनमेष शोकाब्धिशोषणः॥29॥ |

| |
|---|
| भार्य्यामार्य्यस्य वैदेहीं द्रक्ष्यामो रक्षसा हृताम्।<br>तत्र विश्वस्य मां वीर विश्वभर्त्तुः सखा भव॥30॥ |
| मारुतेर्वाक्यमाकर्ण्य राघवस्य पदान्तिके।<br>धन्योऽस्म्यनुगृहीतोऽस्मि दासोऽस्मीत्यपतत् कपिः॥31॥ |
| नरेन्द्रो वानरेन्द्रं तमुत्थाप्याकथयन्मिथः।<br>त्वत्कार्य्यं मित्र मत्कार्य्यं मत्कार्य्यं तावकं त्विति॥32॥ |
| ज्वलनं ज्वलयामास हनूमान् सख्यसाक्षिणम्।<br>स्खलति क्वचिदापत्सु नहि नीतिमतां मतम्॥33॥ |
| सुग्रीव मा विलम्बस्व स्वामिन्नवसरोऽधुना।<br>इत्युक्तौ तौ हनुमता वह्नेरन्तिकमीयतुः॥34॥ |
| हरीन्द्रहस्तं हस्तेन चक्राङ्केन स चक्रभृत्।<br>गृह्णन् साप्तपदीनार्त्थं वह्निं चक्रे प्रदक्षिणम्॥35॥ |
| सचिवैः संवृतो राजा सम्मतेन हनूमतः।<br>उपासितं लक्ष्मणेन सुग्रीवो राममब्रवीत्॥36॥ |
| निवेदितं हनुमता कार्य्यं नन्वार्य्य तावकम्।<br>तत्र किञ्चिदभिज्ञानं वक्ष्ये दैवोपपादितम्॥37॥ |
| चतुर्भिः सचिवैः सार्द्धमहं शैलतटे स्थितः।<br>अद्राक्षं राक्षसं रूक्षं दशग्रीवं वियद्गतम्॥38॥ |
| क्रन्दन्तीं रामरामेति लक्ष्मणेति च सुस्वरम्।<br>स्फुरन्तीं रावणोपान्ते प्रापश्यं लोकसुन्दरीम्॥39॥ |

| |
|---|
| त्वां विना न हि कान्तोऽस्या न ते कान्ताऽस्ति तां विना।<br>सम्बन्धस्त्वनुमेयोऽयं चन्द्रिकाचन्द्रयोरिव॥40॥ |
| सोत्तरीयाणि रम्याण निजान्याभरणानि सा।<br>राक्षसक्षयबीजानि मध्येऽस्माकममुञ्चत॥41॥ |
| तानि प्रत्यभिजानीहि न्यस्तान्यस्मासु सीतया।<br>इत्युक्त्वा स गुहागेहात् तान्यादायाभ्यदर्शयत्॥42॥ |
| आकल्पानुपगृह्याथ सीतायाः सोत्तरीयकान्।<br>शोकं सन्दर्शयामास निःशोको जगतां पतिः॥43॥ |
| अमन्दानन्दसन्दोहे रामे शोको भवेत् कथम्।<br>मन्दाकिनीपयःपूरे ज्वलनः प्रज्वलेत् कथम्॥44॥ |
| प्रवगेन्द्रः विलोपेन्द्रः सान्त्वायामास सामभिः।<br>राक्षसानपनेष्यामस्तामानेष्याम इत्यपि॥45॥ |
| देवो विज्ञाय सुग्रीवं स्वभक्तं भक्तवत्सलः।<br>दोर्भ्यामाश्लिष्य दीर्घाभ्यामाह स्म हसिताननः॥46॥ |
| भक्तिमानसि वत्स त्वं देवैस्तदनुमोदितम्।<br>येन सङ्गतिमात्रेण शुश्रूषेयं कृता मम॥47॥ |
| यतस्वाऽऽयतनेत्राया दर्शने प्रवगोत्तम।<br>ब्रूहि कार्य्यं च ते धृष्टं सत्यं तत् साधयामहे॥48॥ |
| इति ब्रुवाणं तिष्ठन्तं दृष्ट्वा रामं सलक्ष्मणम्।<br>हरीन्द्रहनुमन्तौ तौ शाखे चिच्छिदतुस्तरोः॥49॥ |

ते पुष्पपर्णबहुले शाखे ताभ्यां समास्तृते।
अध्यासामासतुस्तत्र सुस्मितौ राजनन्दनौ॥50॥

रेजाते रघुकुलकेतनौ गिरीन्द्रे सञ्जाते हनुमदिनात्मजानुषङ्गे।
धाम्नि स्वे विसरति रामलक्ष्मणौ तावर्केन्दू गुरुबुधसंयुतौ यथा खे॥51॥

इति श्रीनारायणपण्डिताचार्य्यविरचिते रामाङ्के सङ्ग्रहरामायणे किष्किन्दाकाण्डे द्वितीयः सर्गः॥4-2-51॥ [आदितः श्लोकाः 1451+51=1502]

## तृतीयः सर्गः ॥4-3-51॥

सहाऽसिनो हनुमता हरी राघवसन्निधौ।
प्राञ्जलिर्निष्पतद्बाष्पः करुणं वाक्यमब्रवीत्॥1॥

वाली ज्येष्ठो मम भ्राता बलज्येष्ठो जगत्त्रये।
राज्यं मित्राणि वित्तं च ममापहृतवान् बलात्॥2॥

हतोऽपि दुःसहं किञ्चित् कथं वक्ष्ये तवाग्रतः।
प्रियां मम प्रणयिनीं बलाद् भुङ्क्तेऽपकृष्य सः॥3॥

प्रेषितास्तेन हरयो बहवो निहता मया।
ममैको हनुमान् बन्धुर्म्मज्जातो नौरिवाम्भसि॥4॥

शरण्यानन्यशरणं दीनं दासमवाऽऽशु माम्।
त्राता किल त्रिलोक्यास्त्वमवतीर्ण्णोऽवनीतळे॥5॥

अद्रयः कन्दुकायन्ते सिन्धवस्तस्य चान्धवः।
देवासुरास्तृणायन्ते वालिनो बलिमीदृशम्॥6॥

| |
|---|
| अल्पमागो मया चीर्णं चित्तपूर्वं न चैव तत्।<br>चण्डो दण्डः कृतस्तेन साक्षी तत्रैष मारुतिः॥7॥ |
| ताते नावृक्षशिरसि राज्ञि लोकान्तरं गते।<br>वाली वानरराजोऽभूद् यौवराज्ये च मां व्यधात्॥8॥ |
| मायावी नाम बलवान् दुन्दुभेः पूर्वजोऽसुरः।<br>स्त्रीनिमित्तेन वैरेण किष्किन्धां निश्युपागमत्॥9॥ |
| गुहाद्वारी महाबाहुर्म्मम भ्रातरमाह्वयत्।<br>वाली विवारितोऽस्माभिर्न्निष्पपात् गृहागृहात्॥10॥ |
| अन्वगां प्रणयादेनं द्रावयन्तं महासुरम्।<br>मायावी च पराद्रुत्य पाताळतळमाविशत्॥11॥ |
| गुहाद्वारी प्रतीक्षस्व यावदागमनं मम।<br>मामित्युक्त्वाऽऽविशद् वीरस्तरसा स रसातळम्॥12॥ |
| संवत्सरमहं ज्येष्ठं प्रतीक्ष्य बिलसम्मुखे।<br>सफेनं रुधिरापूरं दृष्ट्वाऽश्रौषं महास्वनम्॥13॥ |
| अथ चामङ्गलाशङ्की शोकशङ्कुविदारितः।<br>किञ्चिद् विलप्य शैलेन गहाद्वारं प्यधामहम्॥14॥ |
| अनिच्छन्तं च साम्राज्यं भ्रातृशोकेन मन्त्रिणः।<br>यावदत्राभ्यषिञ्चन् मां तावद् वाली समागमत्॥15॥ |
| वत्सरं मृगयित्वोग्रं यथैव मृगयुर्म्मृगम्।<br>हत्वा मायाविनं प्राप्तो बिलं पिहितमैक्षत॥16॥ |

| |
|---|
| सुग्रीवेत्याह्वयन्नुच्चैरलब्ध्वा च प्रतिस्वरम्।<br>बिलात् कृच्छ्रेण निर्गत्य किष्किन्धायामदृश्यत॥17॥ |
| क्रुधा जाज्वल्यमानं तं पदेऽहं पतितोऽवदम्।<br>रक्ष राज्यं क्षमस्वाऽऽर्य्य बालिशत्वं ममेत्यलम्॥18॥ |
| उक्त्वा बहुविधं वैरात् पुरुषं पुरुषोत्तम।<br>मामेकवाससं दीनं नगरान्निरयापयत्॥19॥ |
| ऋश्यमूके वसाम्यस्य दुर्ग्गमे कारणान्तरात्।<br>सहजं तं निहन्यास्त्वं महामयिमिवाहितम्॥20॥ |
| परिदेवनमित्यस्य देवः श्रुत्वाऽब्रवीद् वचः।<br>एकेषुणा हनिष्यामि तव दारापहारिणम्॥21॥ |
| इति प्रतिज्ञां रामस्य श्रुत्वा रविसुतोऽब्रवीत्।<br>कथमेकेषुणा नाथ वद्ध्यो वाली बलोद्धतः॥22॥ |
| यस्य चर्म्मापि नाभिन्दन् महेन्द्राहितहेतयः।<br>तमसाधारणं मन्ये प्रतिज्ञाविषयं तव॥23॥ |
| एवं ब्रुवाणं सुग्रीवमाचचक्षे स लक्ष्मणः।<br>सखे कथं ते विश्वासो वालिनः सूदने भवेत्॥24॥ |
| इत्युक्त ऊचे सुग्रीवो देवेदमवधारय।<br>इन्द्रारिर्दुन्दुभिर्न्नाम दृप्तोऽब्धिं योद्धुमभ्ययात्॥25॥ |
| वरुणो मरणाद् भीतः प्रतिवीरं सुरद्विषः।<br>हिमवन्तमुवाचाथ हिमवानपि वालिनम्॥26॥ |

| |
|---|
| समुद्रमर्द्रिं चाऽऽक्षिप्य दुन्दुभिर्दुन्दुभिस्वनः।<br>किष्किन्धाद्वारमासाद्य योद्धुं वालिनमाह्वयत्॥27॥ |
| महिषाकारमसुरं प्रतिद्दत्य महाकपिः।<br>निजघान घनप्रख्यं मातङ्गमिव केसरी॥28॥ |
| वीर उत्तोलयन् देहं तस्य योजनमाक्षिपत्।<br>तस्माद् देहादपासर्प्पन् सान्द्रा रुधिरबिन्दवः॥29॥ |
| ऋश्यमूकाश्रयो दृष्ट्वा स्वाश्रमं रुधिरोक्षितम्।<br>अमर्षितो महर्षिस्तं मतङ्गो नाम शप्तवान्॥30॥ |
| यदेमं देशमायासि तदावध्यो भवेरिति।<br>वालिनो मुनिशापोऽयं वरोऽभून्मम तद्रिपोः॥31॥ |
| वालिना कालितस्येश त्रिलोक्यां नास्ति मे पदम्।<br>इममाश्रममाश्रित्य स्वामिन् जीवामि दीनधीः॥32॥ |
| यदि दैतेयदेहं तं दूरं क्षिपसि राघव।<br>तर्हि यास्यापि विश्वासमित्युक्त्वा विरराम सः॥33॥ |
| पूर्वदेवस्य देहं तं पर्वतोपममीश्वरः।<br>अङ्गुष्ठलीलयैवाऽराच्छतयोजनमाक्षिपत्॥34॥ |
| विदार्य्यभूमिं पाताळे देहोऽचूर्णयदासुरान्।<br>गर्वोद्धतान् शर्ववराद् रामस्य बलवेगतः॥35॥ |
| अत्यायशङ्की कपिः प्रोचे पुनश्च पुरुषोत्तमम्।<br>स्वत्वाद् देवाथ वक्ष्यामि क्षम्यतां नाथ चापलम् ॥36॥ |

जेतुं चतुर्ग्गुणबलो हन्तुं शतगुणाधिकः।

वीरो वीरं समर्त्थः स्यान्नान्यत्र नियमो भवेत्॥37॥

वालिना योजनं क्षिप्तस्त्वया तु शतयोजनम्।

कुणपः किन्तु गरिमा प्रागार्द्रस्य विशिष्यते॥38॥

कुलिशाच्चातिकठिनाः सप्त साला इहोद्गताः।

चालयेत् तान् बलाद् वाली च्छेत्तुं पत्राणि न प्रभुः॥39॥

विष्वञ्चस्ते विभिद्यन्ते त्वया यद्येकपत्रिणा।

शङ्काशङ्कुर्म्मम हृदस्तर्हि साधूद्धृतो भवेत्॥40॥

पूष्णः पुत्रे वदत्येवं रामः कार्म्मुकमाददे।

लक्ष्मणास्येन्दुमालोक्य सायकं चैकमाददे॥41॥

विरिञ्चवरतोऽभेद्यान् विरिञ्चपदमिच्छतः।

असुरांस्तरुतां यातान् ज्ञात्वा तानमुच्छरम्॥43॥

राममुक्तशरो भित्त्वा सप्त सालांश्च सत्त्वरः।

धराधरं धरां चाधः सप्तलोकानदारयत्॥43॥

सोऽसुरेन्द्रान् कुमुदिनः पाताळान्ते न्यपातयत्।

बृंहितान् ब्रह्मवरतो रम्भास्तम्भानिव क्षणात्॥44॥

पद्मापतेः पाणिपद्मं सहसा हंसरूपवान्।

प्रायाद् वायुमयो बाण एवं कृतपराक्रमः॥45॥

लोके यथैक आलोको बहूनर्त्थान् प्रकाशयेत्।

एवमेकं हरेः कर्म्म बहूनर्त्थान् हि साधयेत्॥46॥

निष्कग्रीवोऽस्य सुग्रीवो निपत्याङ्घावभाषत।

अनन्तवीर्य्यानुपम प्रसीद पुरुषोत्तम॥47॥

तृणैरिवाऽवृतं कूपं भस्मनेवाग्निमावृतम्।

त्वां स्वच्छं मायया च्छन्नं नायं वेद जळो जनः॥48॥

इदानीमेव मे मृत्युं वालिव्याजं निपातय।

इमामेव निशामीश शये मरणनिर्भयः॥49॥

इत्थमर्त्थयता साकमाञ्जनेयेन सौरिणा।

रामः सलक्ष्मणः प्रायात् किष्किन्धां वालिपालिताम्॥50॥

रामः कपीनां नगरान्तिकेऽथ कान्तारकान्ते हरिभिः परीतः।

तस्थौ हसन् कार्म्मुकबाणपाणिः प्रतीक्ष्य कालं किल वालिकालः॥51॥

इति श्रीनारायणपण्डिताचार्य्यविरचिते रामाङ्के सङ्ग्रहरामायणे किष्किन्दाकाण्डे तृतीयः सर्ग्गः॥4-3-51॥ [आदितः श्लोकाः 1502+51=1553]

## चतुर्थः सर्ग्गः ॥4-4-76॥

अवलोक्य जगन्नाथः कपिनाथमभाषत।

भ्रातृव्यं भ्रातरं ते त्वमाहवायाऽऽह्वयेत्यथ॥1॥

निर्ग्गम्य गहनात् तस्मान्नगरद्वारमागतः।

सिंहग्रीवोथ सुग्रीवो भ्राता भ्रातरमाह्वयत्॥2॥

आहूतमात्रो रिपुणा दण्डाहत इवोरगः।

निष्पपात गुहागेहाद् वाली बलवतां वरः॥3॥

| |
|---|
| मुष्टिभिश्च तळैश्चोभौ निघ्नन्तावितरेतरम्।<br>अयुद्ध्यतां क्रमात् क्षीणः सूर्य्यसूनुः पराद्रवत्॥4॥ |
| ऋश्यमूकं प्रतिद्रुत्य यावद् भास्करिणा स्थितम्।<br>तावदायातमत्रेव परेशेनापरैः सह॥5॥ |
| रक्तद्ववैरार्द्रवपुः कपीन्द्रोऽस्यापतत् पदे।<br>करुणां वीर कस्मात् त्वं मयि नाऽऽयातवानिति॥6॥ |
| भ्रातरौ समरूपौ स्थः समवेषौ समस्वनौ।<br>अविवेकान्न मुक्तेषुरिति रामोऽब्रवीदिदम्॥7॥ |
| भ्रात्रर्थे भ्रातरं रामः सहसा हतवानिति।<br>परिहर्त्तुं परीवादं तदेशो न जघान तम्॥8॥ |
| कराग्रे कन्दुकमिव योऽनन्तं जगदीक्षते।<br>यश्च कर्त्ताखिलस्यास्य तस्य कुत्राविवेकिता॥9॥ |
| रजताभां सवर्ण्णाभे गजपुष्पमयीं स्रजम्।<br>आमुमोचाथ सुग्रीवे हनुमान् रामशासनात्॥10॥ |
| आलयं वालिनः प्रायात् सहितो हरिभिर्हरिः।<br>मण्डितं कदळीषण्डैर्द्दष्ट्वा सप्तजनाश्रमम्॥11॥ |
| पश्येच्चेत् प्रणमेन्मह्यं वाली वध्यो न सन्नतः।<br>प्रत्यज्ञायि वधश्चास्य प्रपन्नायार्क्कसूनवे॥12॥ |
| अनन्त इति सञ्चिन्त्य सालजाले निलीनवत्।<br>स्थित्वा प्रास्थापयत् तूष्णः पुत्रं वासविना युधे॥13॥ |

| |
|---|
| सिंहनादं स विदधे सिंहसंहननो हरिः। किष्किन्धावासिनो येन सम्भ्रान्ता वालिना विना॥14॥ |
| पुरादुदपतद् वाली सुन्दरीवृन्दसङ्कुलात्। विद्युल्लतापरिवृतान्मेघानीकादिवाशनिः॥15॥ |
| उत्पतन्तं पतिं वीक्ष्य तारा ताराधिपानना। शिरीषमालामञ्जुभ्यां दोर्भ्यां बध्वेदमब्रवीत्॥16॥ |
| वदामि वाणीं नाथेमां न कार्प्पण्यान्न चापलात्। भ्रातुस्ते प्रत्यवस्थानं विद्रुतस्य सकारणम्॥17॥ |
| सुग्रीवस्याभवन्मित्रं रामो राक्षससूदनः। इत्यङ्गदेन कथितं कुमारेण श्रुतं मया॥18॥ |
| न तेनोपकृतं तस्य न त्वयाऽपकृतं पते। लोकानां किल मित्रं स किं नो मित्रं न राघवः॥19॥ |
| अङ्गदो यातु सङ्गृह्य रमणीयतरान् मणीन्। रामं सलक्ष्मणं नेतुमेवं सन्धिर्विधीयताम्॥20॥ |
| पराजितत्वाद् भ्रातृत्वाल्लोकनाथाश्रयत्वतः। भागार्हत्वाच्च सुग्रीवो यौवराज्येऽभिषिच्यताम्॥21॥ |
| एमुक्तोऽवदद् वीरः प्रिये नाहं नपुंसकः। आहूतो वैरिणा वाली न नमेन्न पराद्रवेत्॥22॥ |
| अनृशंसो जगन्नाथो न नृशंसत्वमेष्यति। अथवा रामबाणेन पूतो यास्यामि सद्गतिम्॥23॥ |

| |
|---|
| सौहृदं दर्शितं देवि युक्तमेतत् त्वयोदितम्।<br>निवर्तस्व सह स्त्रीभिः सत्यमेवाऽऽत्मना शपे॥24॥ |
| तमुत्पन्तमित्युक्त्वा पतिं कृत्वा प्रदक्षिणम्।<br>स्वस्तीत्युक्त्वा सती द्रष्टुं नाशक्नोद् बाष्पबाधिता॥25॥ |
| निर्ग्गम्य परितः पश्यन् दृष्ट्वा तत्राग्रजोऽनुजम्।<br>परिधाय दृढं वास आपतन्तं समापतत्॥26॥ |
| निर्घाताविव निर्घोषौ सत्वरौ तौ शराविव।<br>बलीन्द्राविव विक्रान्तौ कपीन्द्रौ प्रत्ययुद्ध्यताम्॥27॥ |
| मष्टिमुद्यम्य कुपितो वाली सुग्रीवमब्रवीत्।<br>एष मुष्टिप्रहारस्ते प्राणानपहरेदिति॥28॥ |
| तवैव प्राणहृन्मुष्टिरित्युक्त्वा रविनन्दनः।<br>मष्टिमुद्यम्य तन्मूर्ध्नि ताडयामास लाघवात्॥29॥ |
| रुधिरोद्गारिणं दृष्ट्वा वासविं भास्करिर्द्दतम्।<br>सालमुक्तालमुत्पाठ्यतेन तं प्रजहार च॥30॥ |
| राघवेण समिद्धोजोलाघवेनार्क्कसूनुना।<br>ताडितो भूतळे वाली निपपातातिविह्वलः॥31॥ |
| आर्त्तो मुहूर्त्तमाश्वास्यजज्वालक्रोधवह्निना।<br>शतमन्युसुतो भूयस्तयोर्य्युद्धमवर्त्तत॥32॥ |
| ग्रस्तमालोक्य लोकेशः कनिष्ठं ज्येष्ठतेजसा।<br>बाधिपं भानुभासेव शरमेकममुञ्चत॥33॥ |

| |
|---|
| वालिनो मरणं कुर्वन्नमृतं च प्रभोः शरः।<br>शरीरं दारयन्नेव शिरोमद्यमदारयत्॥34॥ |
| मन्दचेष्टो महीं यातो वन्दमानोऽपि चेतसा।<br>इन्द्रसूनुरुवाचेदमिन्दिरेशं पुरोगतम्॥35॥ |
| राम राजर्षिवर्य्यस्त्वमन्यासक्तमनागसम्।<br>वनौकसं पशुसमं कथं सूदितवानसि॥36॥ |
| पञ्च पञ्चनखा भक्ष्याः प्रशस्ताः शास्त्रवेदिभिः।<br>शशकः शल्यको गोधा श्वावित् कूर्मश्च पञ्चमः॥37॥ |
| न चर्म्म नास्थि नो मांसं संस्पृशन्ति मनीषिणः।<br>यस्य सोऽहं कपिः कस्मात् त्वया पञ्चनखो हतः॥38॥ |
| वालिनैवमुपालब्धो धर्म्मसूक्ष्ममपश्यता।<br>दत्तवान् भगवांस्तस्मै हसन्नुतरमुत्तमम्॥39॥ |
| वागुरोपशयः पाशाः पूर्वक्लृप्ता मृगद्रुहाम्।<br>हतो मयोपशयिना सौम्य शाखामृगो ह्यसि॥40॥ |
| मृगं चामृगमात्मानं वेत्थ चेद् धार्म्मिकत्वतः।<br>कथं त्यक्तोऽनुजो भुक्ता तद्भार्य्या च स्नुषासमा॥41॥ |
| अहं शास्ताऽस्मि दुष्टानां सतां चोत्पथगामिनाम्।<br>तस्माद्धतोऽसि कामं त्वां जीवयामि यदीच्छसि॥42॥ |
| रामवाणीसुधां प्राप्य रमणीयां प्रसन्नधीः।<br>वाक्यमश्रुमुखो वाली भक्तिगद्गदमुक्तवान्॥43॥ |

क्षमस्वाऽऽर्त्तगिरं स्वामिन् न मेऽसूयितुमर्हसि।
पालयस्व शिशुं दासमङ्गदं कनकाङ्गदम्॥44॥

मृतौ यत्कीर्त्तनं कर्त्तुं तपोदानादि कुर्वते।
तं त्वामवेक्ष्य मे मृत्युं मन्ये साक्षादनुग्रहम्॥45॥

उक्त्वेति मोहमापेदेवाली प्राणान् न मुक्तवान्।
इन्द्रदत्तां दधन्मालां काञ्चनीं मृतिनाशनीम्॥46॥

धावन्तीं राजमहिषीं मुञ्चन्तीमश्रुसन्ततिम्।
दीर्घं श्वसन्तीं सम्प्रेक्ष्य प्रोचिरे वालिसेवकाः॥47॥

वीरसूर्वीरपत्नी त्वं कुत्रयास्यसि निर्भया।
सुग्रीवराक्षसाद् बालं पालयामः प्रवासिनः॥48॥

इत्युक्त्वोत्पततो वीक्ष्य क्षुभ्यतो बिभ्यतः कपीन्।
उवाच वचनं साध्वी देशकालबलोचितम्॥49॥

अवधीद्भ्रातरं भ्राता राजानं राज्यकामुकः।
भजताद्य तमात्मेशं कपयः कुत्र यास्यथ॥50॥

कुणपस्याङ्गदेनेव कृत्यं मेऽस्त्यङ्गदेन किम्।
तं देवः पालयेदेव मन्नाथमनुयाम्यहम्॥51॥

बदन्तीत्थं प्रसर्प्पन्ती पतिं पतितमैक्षत।
रक्तैराक्तं रजोमिश्रं वीरशय्याशयं शुभा॥52॥

पपात पत्युः पादान्ते हा नाथेति वीराविणी।
करीन्द्रेणेव कदळी शोकेनाभिहता सती॥53॥

| |
|---|
| अङ्गदं चाग्रदः कृत्वा वानर्य्यो वालिवल्लभाः।<br>विलेपुस्तं मृतं प्राप्य ताडयन्त्योऽङ्गमात्मनः॥54॥ |
| विकीर्णकेशाः क्रोशन्त्यो विकीर्णाभरणस्त्रजः।<br>साश्रुधाराः कृपां कस्य वालिवध्वो न चक्रिरे॥55॥ |
| क्रियासमभिहारेण ताडयन्ती निजां तनुम्।<br>विललापाऽकुला बाला तारा पतिपरायणा॥56॥ |
| आर्य्यपुत्र प्रबुध्यस्व ताराऽस्मि तव वल्लभा।<br>साध्वीमनागसं नाथ कस्मान्मां नाभिनन्दसि॥57॥ |
| प्राणप्रख्यः सुतस्तेऽयमङ्गदः समुपस्थितः।<br>गाढं रोदिति दीनस्त्वमुत्तिष्ठ परिसान्त्वय॥58॥ |
| लोकमन्यं गतोऽसि त्वं लोकपालपराक्रम।<br>कृपां नैसर्ग्गिकीं त्यक्त्वा मां च सन्त्यक्तवानसि॥59॥ |
| एकान्तेऽकथयः कान्त सर्वाभ्यः प्रेयसीं हि माम्।<br>कथं कितव तत् सत्यं प्राप्तोऽसि सुरसुन्दरीः॥60॥ |
| विरहानलसन्तप्तां लोठन्तीं विधवायिताम्।<br>नय मामपि ते लोकं गृहदासी भवानि ते॥61॥ |
| हा नाथ कपिनाथ त्वं वैरिकक्षाशुशुक्षणिः।<br>रामवारिनिधिं प्राप्य निर्वाणं गतवानसि॥62॥ |
| रामं व्रजाम शरणं नाथमित्यर्थितं मया।<br>अभिमानज्वरात् तस्मिन् पथ्ये नाभूद् रुचिस्तव॥63॥ |

| |
|---|
| चारु चाटु च तेऽपाङ्गं मङ्गलं हसितं सितम्।<br>भवान्तरेऽप्यहं वीक्षै शुभं किञ्चिद्यदीश मे॥64॥ |
| भुङ्क्ष्व सुग्रीव साम्राज्यं ज्येष्ठस्य रुधिरोक्षितम्।<br>समं नो राममाश्रित्य न हि सन्धिः कृतस्त्वया॥65॥ |
| अयि नाथ विधे कुर्य्याः करुणां करुणाकर।<br>अर्द्धमेतद् वृथा क्लिष्टं कान्तेनार्द्धेन योज्यताम्॥66॥ |
| विलपन्तीति करुणं सुस्वरा वालिवल्लभा।<br>पत्युरङ्के शिरः कृत्वा मरणाय मनो दधे॥67॥ |
| तस्या रुदितशब्देन कुमारस्याङ्गदस्य च।<br>उद्बुद्धः किञ्चिदुन्मील्य वाली मन्दं वचोऽब्रवीत्॥68॥ |
| वत्स सुग्रीव मा वैरमनुसन्धत्स्व मूढवत्।<br>कृतापकारोऽपि पुरा मया दिष्टानुवर्त्तिना॥69॥ |
| अङ्गदं विद्धि ते पुत्रं शत्रुपुत्रं न जात्वपि।<br>भ्रातृणामेकजातानामन्यपुत्रः स्वपुत्रकः॥70॥ |
| भुङ्क्ष्व साम्राज्यमेतत् त्वं यौवराज्येऽङ्गदं कुरु।<br>सुषेणतनयां तारां माऽवमंस्था महामतिम्॥71॥ |
| सदा रामस्य दासः स्याः सम्पदेऽत्र परत्र च।<br>एष प्राणभृतां नाथः पुरुषः प्रकृतेः परः॥72॥ |
| रामकार्य्येषु वर्य्येषु न प्रमादी क्वचिद् भव।<br>त्वमङ्गदानुवर्त्तस्व सुग्रीवं रामसम्मतम्॥73॥ |

अयि नाथ जगन्नाथ पुत्रोऽयं तेऽर्प्पितो मया।
इयं च माला भवता सुग्रीवाय प्रदीयताम्॥74॥

प्रोच्येति मालामुन्मुच्य रामपादारविन्दयोः।
सम्यगर्प्पितवान् वाली स्वात्मानं चाऽत्मवित्तमः॥75॥

स इत्थमुक्त्वा परिमुक्तसङ्गो रामस्य रूपामृतमीक्षणाभ्याम्।
तदाऽऽत्मचेतःकलशे प्रगृह्य महेन्द्रजः प्राप महेन्द्रभावम्॥76॥

इति श्रीनारायणपण्डिताचार्य्यविरचिते रामाङ्के सङ्ग्रहरामायणे किष्किन्धाकाण्डे चतुर्थः सर्गः॥ ॥4-4-76॥ [आदितः श्लोकाः 1553+76=1629]

## पञ्चमः सर्गः॥4-5-46॥

मरणं रमणस्याथ विलपन्ती विलोक्य सा।
परिरम्भपरा देहं सशरं चाभ्यपद्यत॥1॥

पश्यन्नश्रुमुखो देव्याः साहसं सहसा ततः।
नील उत्पाटयामास शरं वालिशरीरतः॥2॥

कान्ता कान्ताङ्गमालिङ्ग्य रुधिरौघाभिषेकिणी।
अभिवादय तातं ते यान्तं पुत्रेत्यभाषत॥3॥

उत्थाय तूर्णं पितरमभ्यवादयदङ्गदः।
आलोक्य तं सास्रधारा तारा पुनरभाषत॥4॥

आयुष्मान् भव वत्सेति वत्समुक्त्वा पते व्रज।
सचिवान् किङ्करांश्चैताननुज्ञाप्य च सन्नतान्॥5॥

| |
|---|
| उत्तिष्ठ भूप भूपृष्ठाद् वल्लभा चेदहं तव।<br>वीरलक्षणसम्पन्ना न पृथिव्यां हि शेरते॥6॥ |
| सङ्ग्रामयज्ञावभृथे रामबाणाम्बुना तव।<br>पत्नी मामपि संयुङ्क्ष्व नापत्नीको भवान् व्रजेत्॥7॥ |
| विषमालोड्य पास्यामि प्रवेक्ष्याम्यथवाऽनलम्।<br>यावद् वीरधवां तां मां न स्पृशेद् विधवापदम्॥8॥ |
| कर्म्मणा मनसा वाचा यदागस्ते कृतं मया।<br>क्षमानाथ क्षमस्व त्वं कान्ता ते स्यां भवान्तरे॥9॥ |
| विलपन्तीं तथा बालां प्रजिहासुमसूनपि।<br>वानर्य्यः सान्त्वयन्त्योऽपि प्रकृतिं नेतुमक्षमाः॥10॥ |
| अन्तःपुरचरो वृद्धः प्राज्ञस्तत्रेदमब्रवीत्।<br>का कस्य कान्ता कः कान्तः कः पुत्रः कः पिता भवेत्॥11॥ |
| अस्थिरः सङ्गमो ह्येषां कान्तादीनां भवेभवे।<br>ईश्वरेच्छानुवृत्तानां स्रवन्त्यामेधसामिव॥12॥ |
| त्वं तु नीतिमती तारे कथमेवं विषीदसि।<br>तस्याऽऽत्मानं सुतं रक्ष प्रियं चेद् भर्त्तुरिच्छसि॥13॥ |
| तस्मिन्नेवं प्रवदति विलपन्तीषु तासु च।<br>धृष्टमाचष्ट वचनं लक्ष्मणः शुभलक्षणः॥14॥ |
| सुग्रीव किमिदं दैन्यं तारां सान्त्वय सुव्रताम्।<br>आरोप्य शिबिकां शीघ्रं देहो निर्ह्रियतामिति॥15॥ |

हरयो हनुमन्नुन्ना घृतगन्धाद्युपानयन्।

राज्ञो निर्हरणायाऽऽशु तारेण शिबिकाऽऽहृता॥16॥

देहमङ्गदसुग्रीवावारोप्य शिबिकां शुभाम्।

शिबिकावाहिभिर्भृत्यैर्निन्यत् राजभूतिभिः॥17॥

संवृतं विलपन्तीभिर्वानरीभिः प्रणीय तम्।

द्वीपे नद्या अदहतां नानालङ्कारभूषितम्॥18॥

संस्कृत्य तं यथाशास्त्रं वालिनं वानरोत्तमाः।

पम्पायामुदकं दत्वा रामपादान्तिकं ययुः॥19॥

सुग्रीवाङ्गदपूर्वेषु कपिषु प्रणतेष्वथ।

हनुमान् प्राञ्जलिर्वाक्यं वाक्यज्ञो राममब्रवीत्॥20॥

अयमिच्छति सुग्रीवो निवासं स्वपुरे तव।

त्वं हि नाथस्त्रिजगतामस्माकं तु विशेषतः॥21॥

इत्युक्तो भगवानूचे किञ्चित् स्मित्वा मितं वचः।

पुरग्रामेषु नो वासः पित्राज्ञां मे चिकीर्षतः॥22॥

सुग्रीव भुङ्क्ष्व साम्राज्यं यौवराज्येऽङ्गदं कुरु।

कार्य्यं नः कार्तिके मासि चिन्त्यतां श्रावणो ह्ययम्॥23॥

इत्थमङ्गदसुग्रीवौ रामस्याज्ञां प्रगृह्य ताम्।

दशाहं दीक्षितौ राज्ञः पितृमेधं प्रचक्रतुः॥24॥

अथ प्रविश्य नगरीं गरीयोविभवां प्रभुः।

विवेशान्तःपुरं भ्रातुर्वीक्षमाणः स्वसम्पदः॥25॥

| |
|---|
| सुग्रीवं हारवद्ग्रीवं निर्य्यान्तमवरोधतः।<br>सर्वे ते वानरा नेमुर्ज्जयशब्दपुरःसरम्॥26॥ |
| मतेनायं हनुमतः प्रकृतीरनुमान्य च।<br>प्रासादमारुरोहोच्चमभिषेकाय कल्पितम्॥27॥ |
| आभिषेचनिकैर्द्रव्यैर्वानस्पत्यौषधादिभिः।<br>नानानदनदीतोयैर्ववृतेऽथाभिषेचनम्॥28॥ |
| वाद्यमानेषु वाद्येषु तृप्ते ब्रह्मकुले धनैः।<br>कन्याषोडशकेप्राप्ते गीते सति मृगीदृशाम्॥29॥ |
| दीपलाजाक्षताद्येषु मङ्गलेष्वाहृतेष्विह।<br>वरासनस्थे सुग्रीवे नियोजयति मारुतौ॥30॥ |
| गजो गवाक्षो गवयो वृषभो गन्धमादनः।<br>नळोमैन्दश्च विविदः सुषेणो जाम्बवानपि॥31॥ |
| अभ्यषिञ्चन् रविसुतं ब्रह्मज्ञैर्ब्राह्मणैर्य्युताः।<br>शातकुम्भमयैः कुम्भैर्वसवो वासवं यथा॥32॥ |
| प्रक्रोशत्स्वथ वीरेषु पारमेष्ठ्यान्युपाहरन्।<br>पनसश्छत्रमादत्त नळतारौ च चामरे॥33॥ |
| रेजे राजाऽभिषेकान्ते सर्वाभरणभूषितः।<br>आप्यायितो हनुमता ब्रह्मणेव शतक्रतुः॥34॥ |
| रामाज्ञां संस्मरन् प्राज्ञो यौवराज्येऽभ्यषेचयत्।<br>अङ्गदं कर्म्म तत् तस्य सर्वे साध्वित्यपूजयन्॥35॥ |

| |
|---|
| निवेद्य रामदेवाय तत् साम्राज्याभिषेचनम्।<br>सर्वसम्पत्समृद्धां तां किष्किन्धामविशत् कपिः॥36॥ |
| तारयाचारुरूपिण्या रुमया च स्वभार्य्यया।<br>रामदासः पुरे रेमे बुद्ध्या मत्या यथा पुमान्॥37॥ |
| अनुजग्राह सुग्रीवं रामो हत्वेति वालिनम्।<br>रूपान्तरेऽनुरूपं स करिष्यन् वाल्यनुग्रहम्॥38॥ |
| माल्यवत्कन्दरे देवो दिव्यकन्दफलाशनः।<br>अकूलजलाधारेसानन्दं सानुजोऽवसत्॥39॥ |
| आर्त्तवा विविधा भावा मन्दवायुधनं वनम्।<br>चन्द्रश्च नाप्यरामस्यरामस्यक्षोभमादधुः॥40॥ |
| तथाऽप्यतुल्यवैक्लब्यं दर्शयामास दर्शयन्।<br>स्त्रीसङ्गिनाममाङ्गल्यं मोहयन्नसुरानपि॥41॥ |
| मुनीनां सनकादीनां विषया हि तृणायिताः।<br>यत्पादपांसुसंस्मृत्या सोऽजितः स्त्रीजितः कथम्॥42॥ |
| सुन्दरे वसतोरस्मिन् कन्दरच्छलमन्दिरे।<br>सङ्कथा विविधाश्चाऽऽसन् रामरामानुजन्मनोः॥43॥ |
| आनयन्त्यो नवं वारि चलत्पीनपयोधराः।<br>समित्कुशादीन् कुर्वाणा वर्षाः पर्य्यचरन् विभुम्॥44॥ |
| स्वच्छाम्बरा स्मिताब्जास्या विशुद्धाशावती शरत्।<br>लक्ष्मणं बोधयामास जानकी मृग्यतामिति॥45॥ |

कर्प्पूरगौरी वितता जगत्यां सत्पद्मषण्डेषु पदं दधाना।
अवाप लक्ष्मीमथ हंसमाला रामस्य जिष्णोरिव कीर्त्तिमाला॥46॥

इति श्रीनारायणपण्डिताचार्य्यविरचिते रामाङ्के सङ्ग्रहरामायणे किष्किन्धाकाण्डे पञ्चमः सर्ग्गः॥4-5-46॥

[आदितः श्लोकाः 1629+46=1675]

## षष्ठः सर्ग्गः ॥4-6-55॥

अथ विज्ञाय सुग्रीवं सङ्क्लिश्य प्राप्तसम्पदम्।
व्यक्तं स्त्रीभोगसंसक्तं हनुमानिदमब्रवीत्॥1॥

प्राप्तरामप्रसादेन राज्यं कोशः स्त्रियस्त्वया।
इदानीं भोगसंसक्तो नाथं नो व्यस्मरः कथम्॥2॥

सर्प्पवद् दर्प्पवन्तो ये विस्मरन्त्युपकारकम्।
त्वादृशा मादृशैस्तेषां राजन् कार्य्यं हि शिक्षणम्॥3॥

रामो नाम जगन्नाथस्तत्कार्य्यं नो विशेषतः।
स्वकीयमेव कर्त्तव्यं तस्मात् प्रेषय वानरान्॥4॥

हनुमद्वाक्यमाकर्ण्य हनुमन्तं प्रपूज्य सः।
आहूय नीलप्रभृतीन् सुग्रीवो वाक्यमब्रवीत्॥5॥

आनीयन्तां त्वया नील सर्ववानरयूथपाः।
पूज्यान् वानरवृद्धांस्त्वं साङ्गदः समुपानय॥6॥

पौर्णमास्यामिहाऽऽयातु सेना सेनापतेऽखिला।
प्राक् सप्तरात्रानाऽऽगच्छन् वानरो दण्ड्य एव मे॥7॥

सुग्रीवेणेति सन्दिष्टान् नीलादीन् वानरोत्तमान्।
प्रेषयामास हनुमान् राजाऽन्तःपुरमाविशत्॥8॥

प्राप्तां शरदमालक्ष्य रामो लक्ष्मणमब्रवीत्।
याहि लक्ष्मण किष्किन्धां ब्रूहि तं वानराधिपम्॥9॥

कार्य्यं नो विस्मरसि चेत् कार्य्यं स्वं प्राप्य वानर।
वालिघ्नमार्ग्गणेनैव वालिमार्ग्गं व्रजेरिति॥10॥

रामस्य तद्वचः श्रुत्वा रामं रामानुजोऽभ्यधात्।
आर्य्याधुनाऽतिमर्य्यादं निहनिष्यामि तं कपिम्॥11॥

अतिसक्ते दुराचारे कृतघ्ने रविजे हते।
विचिनोत्वङ्गदो राजा सीतां हनुमता सह॥12॥

अथवा वानरैः किं ते निजकार्य्यस्य साधने।
त्वद्भ्रूभङ्गेन नियतं ननु नाथ जगत्त्रयम्॥13॥

इति ब्रुवाणं तं दृष्ट्वा क्रुद्धं कोदण्डधारिणम्।
मा तात साहसं कार्षीरिति रामोऽब्रवीद्धसन्॥14॥

गच्छन् पुरीं स सौमित्रिः स्मरन् सुग्रीवमन्दताम्।
क्रुद्धः शिलाश्च सालांश्च पादपातैरचूर्णयत्॥15॥

किष्किन्धां प्रविशन्तं तं कोपेनान्तकसन्निभम्।
गजलक्षबलाः प्रेक्ष्य कपयोऽथ पराद्रवन्॥16॥

सुरतोत्सवसंसक्तः कपिभिश्च निवेदितः।
राघवप्रतिघं घोरं सुग्रीवो न विवेद तम्॥17॥

| |
|---|
| लक्ष्मणप्रेषितो भीतः प्राप्यान्तःपुरमङ्गदः।<br>तांवार्त्तामब्रवीत् पित्रे सोऽपि त्रस्तोऽन्वचिन्तयत्॥18॥ |
| रामंप्रति मयाकिञ्चिन्न दुरुक्तं न दुष्कृतम्।<br>तथाऽपि लक्ष्मणः क्रुद्धो विपरीतो हि मे विधिः॥19॥ |
| सुग्रीवमिति सन्तप्तं धीरो मारुतिरब्रवीत्।<br>अशुश्रूषापराधी त्वं लक्ष्मणं क्षमयेरिति॥20॥ |
| दौवारिकाननादृत्य प्राविशल्लक्ष्मणः पुरीम्।<br>मणिहेममयीं दिव्यां सप्तवप्रामवैक्षत॥21॥ |
| वानरीवानरगणैर्देवदेवीसमैर्युताम्।<br>सर्वाभरणसम्पन्नैः सर्वैः सर्वाङ्गसुन्दरैः॥22॥ |
| आरामगृहवापीभिः प्रासादायतनादिभिः।<br>विश्वकर्म्मकृतैर्विश्वैर्विशेषैरुपशोभिताम्॥23॥ |
| मध्ये कपीन्द्रगेहानां सौमित्रिश्चित्रमैक्षत।<br>महेन्द्रमन्दिरमिव महेन्द्रसुतमन्दिरम्॥24॥ |
| तारारुमाभ्यामाश्लिष्टं दिव्ये सिंहासने स्थितम्।<br>रविजं रविसङ्काशं तत्र प्रैक्षत लक्ष्मणः॥25॥ |
| दोर्दण्डार्प्पितकोदण्डो दष्टोष्ठो भ्रुकुटीकटुः।<br>रक्ताक्षस्त्र्यक्षवत् क्रुद्धः सोऽदर्शि रविसूनुना॥26॥ |
| आसनात् तूर्णमुत्पत्य पत्नीभ्यां सहितः कपिः।<br>प्राञ्जलिर्भयसम्भ्रान्तः स्वगृहं समवेशयत्॥27॥ |

| |
|---|
| असहिष्णुः कृतघ्नस्य दर्प्पं तस्य श्रियोन्नतम्।<br>क्रोधरूक्षाक्षरां प्रोचे लक्ष्मणो गां कपीश्वरम्॥28॥ |
| नन्वग्निसाक्षिकं प्रोक्तस्त्वया वानर राघवः।<br>मह्यं राज्ये त्वया दत्ते सीतां विचिनुयामिति॥29॥ |
| मदान्धः प्रमादसक्तः प्रमादं प्राप्तवानसि।<br>रामकार्य्ये सुरैः पूज्ये यथा प्राकृतपूरुषः॥30॥ |
| अतीता बहवो मासा राज्यं प्राप्तवति त्वयि।<br>सीता नाद्यापि विचिता सख्यं खण्डितवानसि॥31॥ |
| देवा यद्दास्यमिच्छन्ति ब्रह्मरुद्रेन्द्रपूर्वकाः।<br>देवदेवस्य तस्यास्य किं सख्यं  कपिना त्वया॥32॥ |
| ऋतेऽपि तव साहाय्यं सीतां प्राप्स्यति राघवः।<br>ऋतेऽपि पल्वलपयः परिपूर्णो महार्ण्णवः॥33॥ |
| चराचरगुरौ वक्रं यदेतद्धृदयं तव।<br>अनार्य्य तद् विदार्य्यायं शरः पास्यति शोणितम्॥34॥ |
| एवं निर्भर्त्सयुत्युच्चैः कपीन्द्रं राघवानुजे।<br>वानरेषु विषण्णेषु तारा सौमित्रिमब्रवीत्॥35॥ |
| नरदेवकुमार त्वं धार्म्मिकः क्षन्तुमर्हसि।<br>चिरं क्लिष्टः सुखं प्राप्यसत्यं सक्तः कपीश्वरः॥36॥ |
| किन्तु कार्य्याणि रामस्य न विस्मरति जात्वपि।<br>वानरान् मुक्तवान् क्षिप्रमानेतुं सर्ववानरान्॥37॥ |

| |
|---|
| रावणो राममहिषीं बहुकोटिबलोऽहरत्।<br>तद्धात्यर्थं चमूर्न्नेया वालिनोक्तं श्रुतं मया॥38॥ |
| ज्येष्ठवत् पूज्य एवाङ्ग सुग्रीवोऽस्य सखा तव।<br>सख्यं कथं खण्डनीयं हनूमति हि जीवति॥39॥ |
| रामानुज प्रसीद त्वं पश्य दासीस्तवात्र नः।<br>पौरस्त्यं भयमाशङ्क्य दीना बाष्पमुखीः स्त्रियः॥40॥ |
| इति तारागिरा शान्तं लक्ष्मणं रविजोऽब्रवीत्।<br>सखे ममाऽऽगः क्षन्तव्यं जनन्येव शिशोस्त्वया॥41॥ |
| शरो यस्यैक एवैतत् त्रैलोक्यमपि संहरेत्।<br>नास्मात् कृत्यं प्रभोस्तस्य वयं स्वार्थ्यं यतामहे॥42॥ |
| प्रसादितः सौरिणेति प्रसन्नो लक्ष्मणोऽब्रवीत्।<br>कार्याग्रहात् सम्भ्रमोऽयं मित्र मे क्षम्यतामिति॥43॥ |
| हरीन्द्रवचनात् प्रोचे हरींस्तु हनुमान् पुनः।<br>विदिक्षु दिक्षु प्लवगानानेतुं गच्छत द्रुतम्॥44॥ |
| महेन्द्रमलयादिभ्यो द्वीपेभ्यश्च प्लवङ्गमाः।<br>आयान्तु दशमाहात् प्राङ्ग नो चेद् दण्डो भविष्यति॥45॥ |
| इति वायुसुतेनोक्ता वायुवेगाः प्लवङ्गमाः।<br>मार्ग्गज्ञाः प्लवगान् सर्वानुर्वीगानानयन् द्रुतम्॥46॥ |
| तैश्चोदितास्ततोऽस्ताद्रेः कोट्यो हाटकसन्निभाः।<br>दशागच्छन् प्लवङ्गानां तिस्रः कोट्योऽञ्जनप्रभाः॥47॥ |

कैलासशिखरेभ्यश्च सिंहकेसरवर्चसाम्।

सप्तकोटिसहस्राणि कपीनां राममाययुः॥48॥

फलमूलरसज्ञानां हिमालयनिवासिनाम्।

कपिकोटिसहस्राणां सहस्रं राममाययौ॥49॥

अङ्गारसप्रभाङ्गानां बिन्ध्याच्चावन्ध्यरंहसाम्।

बहुकोटिसहस्राणि कपीनां रामायुः॥50॥

पयोब्धिवेलानिलयास्तमालवनगन्धिनः।

वानरा नारिकेळाशा असङ्ख्या आपतन् विभुम्॥51॥

नदीभ्यश्च नदेभ्यश्च नानादिग्भ्यस्ततस्ततः।

देवांशा वानराः सर्वे रामनाम्नि श्रुतेऽभ्यगुः॥52॥

महेश्वरमखान्नेभ्यो जातमूलफलादिकम्।

हिमाद्रवाप्य चापूर्वं दूता राज्ञे न्यवेदयन्॥53॥

मणिमय्या शिबिकया स सुग्रीवः सलक्ष्मणः।

गत्वा रामान्तिके तूर्णमवतीर्णोऽपतत् पदे॥54॥

प्रसीद मे नाथ कृतागसस्त्वं कृपाकरेत्याशु तमर्थयन्तम्।

रामोऽभिरामस्मितचन्द्रचारुरुत्थाप्य सुग्रीवमथाऽऽलिलिङ्गे॥55॥

इति श्रीनारायणपण्डिताचार्यविरचिते रामाङ्के सङ्ग्रहरामायणे किष्किन्धाकाण्डे षष्ठः सर्गः॥4-6-55॥ [आदितः श्लोकाः 1675+55=1730]

| सप्तमः सर्गः ॥4-7-105॥ |
|---|
| सिंहलक्षार्बुदबलाः सिंहसंहनना अथ।<br>प्लवङ्गा आप्लुता दिग्भ्यः पर्वताभा विभोः पुरः॥1॥ |
| तरुणार्कारुणाः केचिच्चन्द्रगौराश्च वानराः।<br>सरोजकेसराभाश्च प्रापुः श्यामाः सितासिताः॥2॥ |
| कपिपद्मसहस्रेण कपिशङ्कुशतेन च।<br>वृतोऽङ्गदो राममाप्य जयेति प्राञ्जलिः स्थितः॥3॥ |
| ततो नीलच्छविर्नीलो दशकोटिशतैर्वृतः।<br>उग्राणां हरिवीराणामग्रतः प्रत्यदृश्यत॥4॥ |
| बहुलक्षैः कपीनां तु कोटिभिश्च समन्वितः।<br>तारातातः सुषेणोऽथ काञ्चनाद्रिरिवैक्ष्यत॥5॥ |
| दशकोटिसहस्रैस्तु वृतः शतवलिर्बली।<br>कोसलेन्द्रं ववन्देऽथ पनसो दशकोटिभिः॥6॥ |
| पिता हनुमतः श्रीमान् सर्ववानरसत्तमः।<br>केसरी सूर्य्यदीप्तास्यः प्रायाद् बहुबलैर्वृतः॥7॥ |
| गोलाङ्गूलो गवाक्षोऽथ प्राप्तः कोटिसहस्रवान्।<br>धूम्रोऽदृश्यत धूम्राक्षा ऋक्षकोटिसहस्रवान्॥8॥ |
| गवयो गतवान् रामं वृतो द्वादशकोटिभिः।<br>षष्टीकोटिवृतः प्राप रघवं गन्धमादनः॥9॥ |

| |
|---|
| गजश्च वृषभाख्यश्च शलभः शरमस्तथा।<br>पृथक् पृथक् कोटियुताः रामपादमुपासत॥10॥ |
| महान्तौ मैन्दविविदौ कोटीः सप्त दशाष्ट च।<br>प्रकर्षन्तौ गतौ रामं रुमण्वान् कोटिसंवृतः॥11॥ |
| बृहस्पतिसमो नीत्या तारस्ताराधिपद्युतिः।<br>वृतः कोटिसहस्रेण रामोपान्तमुपेयिवान्॥12॥ |
| उपेन्द्रमापेन्द्रजानुः कपीनां पद्मकोटिभिः।<br>वृतो दधिमुखः प्राप  देवं द्वादशकोटिभिः॥13॥ |
| कपिखर्वसहस्रेण कुमुदस्तममोदयत्।<br>एकविंशतिकोटीभिरुदारश्च दरीमुखः॥14॥ |
| जाम्बवान् विनतो रम्भो भीमः सम्पातिनामकः।<br>विजयश्च हरिस्तत्र वेगदर्शी महाहनुः॥15॥ |
| शरार्चिः शरगुल्मश्च सुहोत्रोल्कामुखौ तथा।<br>ससङ्घाः  सङ्गताः सर्वे पुनरन्ये च वानराः॥16॥ |
| एतैः सर्वैः परिवृतौ हनुमन्मिहिरात्मजौ।<br>विश्वेश्वरमसेवेतां शम्भुशक्राविवामरैः॥17॥ |
| आस्यतामिति तानुक्त्वा वन्दारुन् वानरानथ।<br>उवाच वाचं सुग्रीवः प्राञ्जलिः कञ्जलोचनम्॥18॥ |
| नियुज्यन्तां निजे कार्य्ये नाथ दासा अमी तव।<br>इत्युक्तो भगवानूचे त्वं नियुङ्क्ष्व हरीनिति॥19॥ |

| |
|---|
| चतसृष्वप्यथो दिक्षु वानरान् वानराधिपः। |
| विचेतुं तां सरोजाक्षीं वीरान् सन्दिदिशे क्रमात्॥20॥ |
| विनत त्वं हरिगणैः साकमैन्द्रीं दिशं व्रज।<br>मृग्यतां तत्र वैदेही त्वं हि मे सचिवः सदा॥21॥ |
| यमुनोपवनं गत्वा यामुनं च महागिरिम्।<br>सीता विचीयतां गङ्गां सरयूं कौशिखीं तथा॥22॥ |
| नर्म्मदां च नदं शोणं कावेरीं गोमतीमपि।<br>पूर्वां सरस्वतीं भूयो मागधान् काशिकोसलान्॥23॥ |
| विदेहानथ पुण्ड्राद्यांस्तिमिं च रजताकरम्।<br>मन्दरं तदधिष्ठानं किरातानां च मन्दिरम्॥24॥ |
| स्वर्णाकरं स्वर्णरूप्यं गत्वा सीता विमृग्यताम्।<br>जम्बूद्वीपमतिक्रम्य शिशिरं गिरिपुङ्गवम्॥25॥ |
| द्वीपानन्यानपि प्राप्य देवदेवी विमृग्यताम्।<br>आगम्यतां च मासान्ते सर्वैर्द्दण्डोऽन्यथा भवेत्॥26॥ |
| दक्षिणां हनूमन् गत्वा दक्षस्त्वं पश्य जानकीम्।<br>गुरुः सखा च सचिवः शरणं च भवान् हि मे॥27॥ |
| अङ्गदाद्या इमे वीरास्त्वामन्वायान्तु नायकम्।<br>मुख्यप्राणमिवाक्षाणि त्वयि भारः समाहितः॥28॥ |
| यदि मे प्राणगोप्ताऽसि रामदासाग्रणीर्य्यदि।<br>रावणस्याऽऽलयं ज्ञात्वा सीतां चाऽऽगच्छ राघवम्॥29॥ |

| |
|---|
| चतुर्द्दशसु लोकेषु दशस्वपि हि दिक्षु ते।<br>गतिर्न्न विहता क्वापि वायुनन्दन वायुवत्॥30॥ |
| सहस्रशिखरं विन्ध्यमतिदुर्ग्गं जगत्त्रये।<br>नर्म्मदाद्या नदीर्ग्गत्वा तत्र सीता विमृग्यताम्॥31॥ |
| कलिङ्गाद्यांश्च विषयान् दण्डकारण्यमुद्घणम्।<br>गोदावरीं च कावेरीं सागस्त्यं मलयाचलम्॥32॥ |
| अगस्त्यमाश्रमगतं नत्वा तस्याभ्यनुज्ञया।<br>अतीत्य सिन्धून् द्वीपांश्च गत्वा सीता विमृग्यताम्॥33॥ |
| भवता श्वशुरेदानीं सुषेण वरुणोपम।<br>कर्त्तव्यं बन्धुकृत्यं नः पश्चिमा गम्यतां हरित्॥34॥ |
| युक्तेन कपिलक्षाभ्यां गत्वागत्वा विचीयताम्।<br>सीता रावणगेहं च सम्यगेवाधुना त्वया॥35॥ |
| बाह्लीकादीन् केकयादीन् विषयान् पट्टनानि च।<br>नानावनानि सरितः समुद्रोपान्तपर्वतान्॥36॥ |
| अपि पञ्चनदं तीर्थं काश्मीरं प्राप्य मृग्यताम्।<br>गान्धार विषयं गत्वा पारियात्रं च पर्वतम्॥37॥ |
| चक्रवन्तं गिरिं यत्र चक्रं विष्णोर्विनिर्म्मितम्।<br>तं च देशं समुद्रान्ते पाञ्चजन्यो यतोऽभवत्॥38॥ |
| परीतं बहुभिर्दुर्ग्गैः प्राप्य प्राग्ज्योतिषं पुरम्।<br>सुमेघादीन् गिरीन् गत्वा द्वीपानन्यांश्च मृग्यताम्॥39॥ |

| |
|---|
| त्वया शतवले सार्द्धं त्रिभिर्वैवस्वतात्मजैः।<br>देवी मृग्योत्तराशायां गत्वाऽन्यैरपि वानरैः॥40॥ |
| मत्स्यादीन्छूरसेनादीन् विषयाग्र्यान् कुरूनपि।<br>मद्रकादीन् हिमाद्रिं च गत्वा सीता विमृग्यताम्॥41॥ |
| भृगुतुण्डम् काळगिरिं तथा ताम्राकरं गिरिम्।<br>सुदर्शनं देवसखं कैलासमलकापुरीम्॥42॥ |
| अद्रिं त्रिशिखरं क्रौञ्चं मैनाकं गन्धमादनम्।<br>द्वीपानन्यानपि प्राप्य रामरामा विमृग्यताम्॥43॥ |
| आगम्यतां च मासात् प्राक् सर्वैर्दण्डोऽन्यथा भवेत्।<br>सीतां वीक्षेत यो दक्षः स मे राज्यार्द्धमर्हति॥44॥ |
| क्षेत्रेषु तत्रतत्रापि मुनीन् नमत पृच्छत।<br>सीतायाः पदवीमन्यानपि जन्तून् पदेपदे॥45॥ |
| दिशिदिश्येवमादिश्य प्रेषयामास शीघ्रगान्।<br>बाढमित्युद्धतान् वीरान् वानरान् वानराधिपः॥46॥ |
| विनते गतवत्यैन्द्रीं सुषेणे पश्चिमामपि।<br>उत्तराशां शतबलौ रामो मारुतिमब्रवीत्॥47॥ |
| तात कार्य्यमिदं कर्तुं त्वं प्रभुर्न्नापरे क्वचित्।<br>विहाय के श्रीवराहमुद्धरेयुर्वसुन्धराम्॥48॥ |
| तस्मादेतैरुपेतस्त्वं गच्छ दक्षिण दक्षिणाम्।<br>देहि देव्यै मदीयं त्वं प्रत्यययाङ्गुलीयकम्॥49॥ |

इत्युक्त्वा स ददौ दीप्तं रत्नभासाऽङ्गुलीयकम्।
मानितं मानसस्येव मण्डलं बालभानुना॥50॥

अञ्जलिभ्यां तदादाय प्राञ्जलिः सोऽञ्जनासुतः।
ओमित्युक्त्वा ययौ याम्यां तारजाम्बवदादिभिः॥51॥

विनतश्च सुषेणश्च वीरः शतवलिस्तथा।
मासान्ते सगणाः प्राप्य प्रोचुः प्राञ्जलयः पतिम्॥52॥

देशांस्त्वयोक्तानन्यांश्च विचित्यातिप्रयत्नतः।
सीतागतिर्न्न विदिता तिसृष्वाशासु मानद॥53॥

अनूनविक्रमो नूनं हनूमंस्तामवेक्षते।
दयितां देवदेवस्य हयग्रीवस्त्रयीमिव॥54॥

इत्थमामन्त्रयद्भिस्तैर्म्मन्त्रिभिः सह सूर्य्यजः।
प्रत्यैक्षत हनूमन्तं तितीर्षुरिव तारकम्॥55॥

हनूमान् हरिभिः सार्द्धं विचिन्वस्तां सुमद्ध्यमाम्।
चचार विन्ध्ये गहने गुहासु विपिनेषु च॥56॥

महर्षेर्म्मृतपुत्रस्य कण्डोश्चण्डस्य शापतः।
निःसत्वेनिस्तरौ देशे विचिक्युर्न्निर्ज्जलेऽथ ते॥57॥

गिरिगह्वरमाप्यान्यद् ददृशुः कञ्चनासुरम्।
मारीचपुत्रमत्रस्तं रावणं तं शशङ्किरे॥58॥

अङ्गदस्तमभिद्रुत्य तिष्ठतिष्ठेति निष्ठुरम्।
मुष्टिघातेन घोरेण जघानामरवरिणम्॥59॥

| |
|---|
| सन्नदन्तो रिपौ सन्ने तत्रतत्र विचित्य ते।<br>सीतामदृष्ट्वा सीदन्तः सालमूलमुपाविशन्॥60॥ |
| श्रीमानुवाच हनुमान् तत्रेदं वानरान् प्रति।<br>अविक्लबोऽक्लीबधीश्च परीक्षात्थं विचक्षणः॥61॥ |
| सुचिरं विचिता देवी न दृष्टा किं नु कुर्म्महे।<br>इत्याकर्ण्याङ्गदः प्रोचे सर्वानाभाष्य वानरान्॥62॥ |
| कार्य्यत्वाद् रामसेवायाः राजदण्डस्य गौरवात्।<br>यत्नस्य च फलान्तत्वात् पुनर्द्देवीं विचिन्महे॥63॥ |
| अङ्गदेनेति गदिते गन्धमादनपूर्वकाः।<br>उत्तस्थुः क्षुत्तृडार्त्ताश्च साधुसाध्विति वानराः॥64॥ |
| विचिच्युरीरेऽथ रुप्याद्रौ रामकीर्त्तिशशिप्रभे।<br>सप्तपर्ण्णैश्च लोध्रैश्च पुष्पितैरतिपाण्डुरे॥65॥ |
| विन्ध्याटव्यामटन्ति स्म कपयस्ते पुनःपुनः।<br>समागमात्थं सङ्केतं कृत्वा तत्राथ सत्वराः॥66॥ |
| सम्प्राप्य गिरिदुर्ग्गाणि गह्वराणि महागुहाः।<br>रामभक्त्या व्यचिन्वंस्ते कपिराजभयादपि॥67॥ |
| सुधार्थमिव दुग्धाब्धिं सुरासुरवराः पुरा।<br>अक्षोभयन् भूवलयं सीतात्थं वानरेश्वराः॥68॥ |
| शैलानुदहरन् वीरा गण्डशैलानलोठयन्।<br>वनान्यधून्वन्नपरे गुहाः केचिज्जगाहिरे॥69॥ |

मत्तान् मतङ्गजान् सिंहान् तरक्षून् राक्षसानपि।
आद्रुत्य रावणोऽसीति जघ्नुः केचन कोपिनः॥70॥

कपीन् यूथपरिभ्रष्टानन्विष्यान्विष्य धावतः।
मेघगम्भीरनादेन हनुमानाह्वयत् सुखम्॥71॥

क्षुत्पिपासापरिश्रान्ताः शुष्ककण्ठाः श्रमातुराः।
पानीयापानं वाञ्छान्तो ददृशुस्ते महागुहाम्॥72॥

मिश्रैः पद्मपरागेण हंसाद्यैरर्द्रपक्षिभिः।
गुहोत्थितैस्ते कपयो नीरं तत्रानुमेनिरे॥73॥

अस्त्यधो वारिमान् देशः प्रविशाम पिबाम कम्।
अन्विष्याम च वैदेहीमिति ते प्राविशन् गुहाम्॥74॥

अन्योन्यहस्तग्राहेण भ्राम्यन्तो विन्ध्यकन्दरे।
नाविन्दन् निर्ग्गतेर्म्मार्ग्गं तमसा योजनायते॥75॥

निराशा जीवने दीनाः क्षुत्क्षामाः श्रमकर्शिताः।
क्रन्दन्तो रामरामेति ददृशुर्देशमद्भुतम्॥76॥

काञ्चन स्त्रीमवेक्ष्याऽथ काञ्चनश्रीमये वने।
मुदा हनूमान् वचनमुदाहरदविक्लमः॥77॥

का त्वं कञ्जपलाशाक्षि तपसा जिततापसा।
कस्येदं काञ्चनमयं सरोवनगुहादिकम्॥78॥

रामो नाम रमाकान्तः कान्तो दशरथात्मजः।
पितुर्न्नियोगादागच्छत् सभार्य्यः सानुजो वनम्॥79॥

| |
|---|
| तस्य सुग्रीवमित्रस्य वयं भृत्या वरानने।<br>नष्टां भार्य्यां विचिन्वाना दैवादेतां गुहां गताः ॥ 80 ॥ |
| मारुतेरिति गां श्रुत्वा योगिनीदमभाषत।<br>दुहिता मेरुसावर्ण्णेरहं नाम्ना स्वयम्प्रभा ॥ 81 ॥ |
| उवासात्र चिरं पूर्वं निर्म्मायेमां मयो गुहाम्।<br>अप्सरोवरया साकं हेमया हेमशोभया ॥ 82 ॥ |
| हेमाया हे महाबाहो सखीं मां विद्धि तापसीम्।<br>आमान्त्रयामि वः श्रान्तान् विश्रामायाऽऽश्रमागतान् ॥ 83 ॥ |
| इत्युक्त्वा फलमूलैस्तान् बहुलैरमृतोपमैः।<br>श्रान्तानाप्याययामास तर्प्पयित्वा तपस्विनी ॥ 84 ॥ |
| विश्रान्तानथ सन्तुष्टानात्मानमभिनन्दतः।<br>बिलान्निर्ग्गममार्ग्गाज्ञान् कपीनूचे स्वयम्प्रभा ॥ 85 ॥ |
| विरिञ्चस्य वरादत्र जन्तूनां नोद्गमागमौ।<br>योगाद् वो गमयिष्यामि निमीलयत लोचने ॥ 86 ॥ |
| तस्या इत्युपदेशेन निमीलितविलोचनाः।<br>क्षणेनाचक्षताऽऽत्मानं विन्ध्यपृष्ठे प्लवङ्गमाः ॥ 87 ॥ |
| हैमन्तिकैः प्रसूनैस्ते हेमन्तमृतुमागतम्।<br>ज्ञात्वा सर्वे भयं भूयो भेजुः सुग्रीवदण्डतः ॥ 88 ॥ |
| चिन्ताकुले कपिकुले निषेदुषि धरातळे।<br>अङ्गदो भङ्गदोऽरीणां दीरमेतद् वचोऽब्रवीत् ॥ 89 ॥ |

| |
|---|
| कालो गतो नश्वरतां मयमायामये बिले।<br>यस्तु सुग्रीवसङ्कृप्तः कृत्यमत्र विचिन्त्यताम्॥90॥ |
| हनिष्यति हरीन्द्रोऽस्मान् ध्रुवं लङ्घितशासनान्।<br>राजदण्डवधाच्छ्रेयो वृणे प्रायोपवेशनम्॥91॥ |
| युवराजवच श्रुत्वा सबाष्पेषु हरिष्वथ।<br>तारस्तारतरं वाक्यं वानरान् प्रत्यभाषत॥92॥ |
| अग्रजो येन तूग्रेण मारितो रामबन्धुना।<br>भुज्यते ज्येष्ठपत्नी च स कथं नः क्षमी भवेत्॥93॥ |
| न यास्यामोऽथ सुग्रीवं न हास्यामश्च नस्तनुम्।<br>प्रवेक्ष्यामो गुहामेनां प्रयास्यामश्चिरं सुखम्॥94॥ |
| वज्रिणाऽपि स्ववज्रेण किञ्चित् किल विदारिता।<br>गुहेयं नात्र रामस्य विक्रमः सङ्क्रमिष्यति॥95॥ |
| वाचमाकर्ण्य तारस्य जाम्बवद्वालिजादिषु।<br>वदत्सु बाढमित्येव वाचमाचष्ट मारुतिः॥96॥ |
| विदितेयं मया नीतिस्तारेण प्रतिपादिता।<br>स्वजामेयस्य साम्राज्यं साधयामीति वाञ्छता॥97॥ |
| असहाये रविसुते सीतां तां द्रष्टुमक्षमे।<br>खण्डितं रामसख्यं स्यादित्थमाशा विजृम्भते॥98॥ |
| प्राज्ञम्मन्यानिहाप्राज्ञान् रामकार्य्याभ्युपेक्षिणः।<br>चतुर्थेनाप्युपायेन शिक्षयिष्याम्यहं हरीन्॥99॥ |

शतक्रतोः शतगुणाः कुलिशाल्लक्ष्मणेषवः।
आनयेयुस्तिलतुलां बिलं वः शुष्कपर्ण्णवत्॥100॥

यस्य भ्रूभङ्गनियतं त्रैलोक्यं कोसलेशितुः।
तस्यागम्यं किल बिलं बालिशैः किं न कत्थ्यते॥101॥

यया नीत्या पुरा जज्ञे विरोधो रविजेन वः।
साम्प्रतं सम्प्रवृत्ता सा विपदे नैव सम्पदे॥102॥

नन्वङ्गद पितृव्यस्ते धर्म्मात्मा न तवाहितः।
त्वन्मातुर्म्मतमालम्ब्य वर्त्तमानस्तु किम्पुनः॥103॥

वदतीत्थं हनुमति वानरास्ते मुनिव्रताः।
तमन्ववर्त्तन्त यथा नद्योद्योघं नगनिम्नगाः॥104॥

अलङ्घ्यमल्पैरवलोक्य तेऽत्रसन् महार्ण्णवं स्वं च मनोरथार्ण्णवम्।
श्रमापनोदाय समाश्रयन्नमी वेलावनं रामपदं च पावनम्॥105॥

इति श्रीमन्नारायणपण्डिताचार्य्यविरचिते रामाङ्के सङ्ग्रहरामायणे किष्किन्दाकाण्डे सप्तमः सर्ग्गः॥4-7-105॥ [आदितः श्लोकाः 1730+105 = 1835]

## अष्टमः सर्ग्गः ॥4-8-74॥

अथ दीर्घं विनिःश्वस्य चिन्तातान्ताननोऽङ्गदः।
कुलवृद्धान् कपिवरान् प्रणिपत्येदमब्रवीत्॥1॥

समयः समतीतो नः सीता नाधिगता क्वचित्।
दुस्तरस्तोयराशिश्च मार्ग्गाः सर्वेऽपि सार्ग्गळाः॥2॥

| |
|---|
| रामदेवप्रसादेन यौवराज्यमभून्मम।<br>हततातस्य दीनस्य न सुग्रीवानुरागतः॥3॥ |
| रामस्याऽनृण्यमप्राप्य किं फलं जीवितेन मे।<br>सर्वे ममानुमोदध्वं वृद्धाः प्रायोपवेशनम्॥4॥ |
| दीनां मे मातरं तारां तां सान्त्वयत सामभिः।<br>नूनं सा भर्त्तुशोकार्त्ता पुत्रशोके मरिष्यति॥5॥ |
| उक्त्वेति युवराजं तं कृतप्रायोपवेशनम्।<br>अवलोक्यारुदन्नुच्चैः कपयः समसङ्कटाः॥6॥ |
| वानरा वार्य्युपस्पृश्य सर्वे प्रायमुपाविशन्।<br>दक्षिणाग्रेषु दर्भेषु कृत्वा चोत्तरतः शिरः॥7॥ |
| देहान् जिहासूंस्तान् दृष्ट्वा तुतोष पिशिताशनः।<br>सम्पातिनामा पक्षीन्द्रो दग्धपक्षो बुभुक्षितः॥8॥ |
| अजामिळोऽप्यजन्मत्वं यन्नामग्रहणाद् ययौ।<br>ते कथां तस्य देवस्य प्रोचुः संसारहारिणीम्॥9॥ |
| त्रिधामा रामनामाऽबूदवन्यां रघुनन्दनः।<br>अपीपलन्मुनेर्य्यज्ञं सीतां देवीमरीरमत्॥10॥ |
| कैकेय्या वाक्यमात्रेण त्यक्तराज्यो वनं ययौ।<br>चतुर्द्दशसहस्राणि रक्षांसि प्रभुरक्षिणोत्॥11॥ |
| विजनेऽथ जनस्थाने रागरोगादचूचुरत्।<br>रत्नमालामिव ध्वाङ्क्षो रावणो रामवल्लभाम्॥12॥ |

| |
|---|
| युयोध पक्षिराजस्तं जटायुः कूटयोधिनम्।<br>रामभक्त्या स तत्याज मूर्त्तिं कीर्त्तिमुपाददे॥13॥ |
| स हि धन्यतमः पक्षी रामार्त्थं जीवितं त्यजन्।<br>अकृतार्त्था वयं हन्त मन्दभाग्या म्रियामहे॥14॥ |
| सकामा खलु कैकेयी सख्या मन्थरया सह।<br>हत्वा पतिं शोकतप्तं वालिनं वानरांश्च नः॥15॥ |
| अपि सुग्रीवमित्रं नः सौमित्रेरग्रजो विभुः।<br>सीतान्वेषणसङ्क्लिन्नान् करुणः संस्मरिष्यति॥16॥ |
| इत्थं कथान्तरे श्रुत्वा देहत्यागं जटायुषः।<br>वृद्धो गृद्ध्रपतिः प्रोचे रुदन् ज्येष्ठो जटायुषः॥17॥ |
| मम प्राणसमो भ्रात रावणेन हतः कथम्।<br>के यूयं केन दुःखेन प्राप्ताः प्रायोपवेशनम्॥18॥ |
| सम्पातिनेत्यभिहिताः प्रत्यूचुस्ते प्लवङ्गमाः।<br>सौम्य दाशरथेर्भार्य्यां राक्षसो रावणोऽहरत्॥19॥ |
| पश्यंस्तं पथि गच्छन्तं पक्षीन्द्रो राघवप्रियः।<br>निवारयन् हतस्तेन रामेण किल संस्कृतः॥20॥ |
| रामसुग्रीवयोः सख्यमथाभूद् वालिनो वधात्।<br>वयं तयोर्न्नियोगेन तां देवीं मृगयामहे॥21॥ |
| समतीतः स समयः सीतां नोपलभामहे।<br>उत्कटात् सङ्कटात् तस्माद् वयं प्रायमुपास्महे॥22॥ |

पक्षिप्रवर कस्मात्ते पक्षयोः सङ्क्षोऽभवत्।

कच्चिज्जानासि सीतायाः पदवीं तात कुत्रचित्॥23॥

वर्ण्णितं तैस्तदाकर्ण्य द्विजः शोकाकुलः शनैः।

कनिष्ठायोदकं दत्वा कपीन्द्रानिदमब्रवीत्॥24॥

अरुणस्य सुतावावां तरुणत्वेऽतिगर्वितौ।

निजं राज्यं पणं कृत्वा पर्यैक्षावहि वेगिताम्॥25॥

कलिङ्गबलिभुक्क्रौञ्चश्येनगृद्ध्रसितच्छदान्।

सर्वानतीत्य नौ मार्ग्गो ङयनेनोत्तरोत्तरान्॥26॥

आवामनुगतौ सूर्य्यमुदयन्तमथोदये।

आ मध्याह्नगतेः शौर्य्यात् ततो मोहो महानभूत्॥27॥

भ्राता सन्तप्यमानो मे पक्षाभ्यां रक्षितो मया।

दग्धपक्षोऽपतं पश्चात् क्षीणपुण्यइवाम्बरात्॥28॥

सप्तमेऽह्नि गतः सङ्ज्ञां कथञ्चिद् देशकालवित्।

अपक्षो मरणाकाङ्क्षी निषिद्धोऽहं महर्षिणा॥29॥

भविष्यति त्वया कृत्यं रामकार्य्यं चिकीर्षताम्।

रापप्रसादात् पक्षी स्या देहो न त्यज्यतामिति॥30॥

निशाकरस्य मे सख्युर्म्मुनेर्वाचः स्मरन्नहम्।

निविष्टो गिरिरन्ध्रान्ते रामदूतप्रतीक्षया॥31॥

हन्त राजा दशरथः सखा मे प्राणसम्मितः।

ममापि पुत्रास्तत्पुत्राः स्नुषा तस्य मम स्नुषा॥32॥

| |
|---|
| मम स्नुषाहरं चोरं मम भ्रातृनिसूदनम्।<br>रावणं हन्तुकामोऽपि न समर्थोऽस्मि वानराः ॥33॥ |
| अपक्षस्यामिषाकाङ्क्षी सुपार्श्वो मम नन्दनः।<br>राक्षसं प्रैक्षत व्योम्नि हरन्तं रामवल्लभाम्॥34॥ |
| हा राम राम नाथेति लक्ष्मणेति च सुस्वरम्।<br>क्रन्दन्तीं सुन्दरीं तां च दृष्ट्वा तापमुपोयिवान्॥35॥ |
| रामकार्य्यं मया कार्य्यं मनसा वचसाऽथवा।<br>तस्माद् वक्ष्याम्यहं वीरा दूरदर्शी स्वभावतः॥36॥ |
| शतयोजन दूरस्था लङ्केयं लवणाम्भसि।<br>उद्याने शिंशपामूले तत्राऽस्ते जनकात्मजा॥37॥ |
| राक्षसीभिः प्रदत्तानि सुरामांसान्यपास्यति।<br>वासवेनोपनीतेन साऽमृतान्नेन वर्तते॥38॥ |
| इदं रामाय देवाय देवराय भवेदिदम्।<br>इत्यग्रभागौ विन्यस्य शेषमश्नाति शोभना॥39॥ |
| रामप्रसादमाहात्म्यमहो पश्यत वानराः।<br>रामस्य हि कथां श्रुत्वा तनुर्म्मे तरुणीकृता॥40॥ |
| दग्धौ पक्षाविमौ रूढौ जरा स्वयमजीर्य्यत।<br>बलवेगावनुद्वेगौ यथा यूनस्तथाऽद्य मे॥41॥ |
| शतयोजनमत्येतुं यः शक्तो विश्रमं विना।<br>स सीतां द्रक्ष्यति श्रीमानिति मे दिव्यनिश्चयः॥42॥ |

| |
|---|
| महेन्द्रमलयप्रान्तमारुह्य प्लवनं भवेत्।<br>स्वस्ति वोऽस्तु गमिष्यामि हिमवन्तं ममाऽऽलयम्॥43॥ |
| इत्युक्त्वा तं पतत्रीन्द्रं पतन्तमवलोक्य ते।<br>राघवाय नमश्चक्रुर्विस्मयोत्फुल्ललोचनाः॥44॥ |
| कथयन्तोऽथ रामस्य कथामाहात्म्यमद्भुतम्।<br>दक्षिणाम्भोनिधिं प्रापुर्म्मलयानिलशीतलम्॥45॥ |
| अम्भोनिधिं तं गम्भीरं वीक्षमाणान् विषादिनः।<br>वानरानङ्गदः प्रोचे विषादस्त्यज्यतामिति॥46॥ |
| यस्य या प्लवने शक्तिः स तां वदतु वानरः।<br>इति जाम्बवताऽऽदिष्टास्ते स्वशक्तिं न्यवेदयन्॥47॥ |
| योजनानि दश प्रोचे गजः प्लवनमात्मनः।<br>विशद्गवाक्षस्त्रिंशत्तु गवयो योजनान्यथा॥48॥ |
| चत्वारिंशच्च वृषभः पञ्चाशद्गन्धमादनः।<br>मैन्दः षष्टिं सप्ततिं च विविदो वदति स्म तम्॥49॥ |
| सुषेणसूनुश्चाशीतिं जाम्बवान् स्वयमब्रवीत्।<br>वृद्धं हसेयुस्तरुणा मां तथाऽपि ब्रवीम्यहम्॥50॥ |
| त्रिविक्रमस्य क्रमणे कुर्वतो नन्दिघोषणम्।<br>त्रैलोक्ये भ्राम्यतोमेऽभूज्जानु मेरुनिपीडितम्॥51॥ |
| नवतिप्लव एवाहं ततः षण्णवतिप्लवः।<br>पुरस्तादित्यभिहिते ब्रह्मजेनाङ्गदोऽब्रवीत्॥52॥ |

| |
|---|
| योजनानां शतं गन्तुं शक्तिं मे निश्चिनोम्यहम्।<br>न निश्चिनोमि विक्रम्य प्रत्यागन्तुं प्लवङ्गमाः॥53॥ |
| इत्युक्ते जाम्बवानूचे गन्तव्यं न तु संशये।<br>वत्स नः पालनीयेन किम्पुनर्भवता त्विति॥54॥ |
| अथ वालिसुतोऽवादीत् को नु नः पालयिष्यति।<br>कस्तरिष्यति सिन्धुं को रामप्रेष्ठो भविष्यति॥55॥ |
| प्लवनं कुर्वतोऽपि स्युरन्तरायाः किलान्तरे।<br>प्राप्तं नोऽकृतकृत्यत्वात् प्रायः प्रायोपवेशनम्॥56॥ |
| इति खिन्नतरं प्रोचे जाम्बवानङ्गदं प्रति।<br>कश्चिद् विपश्चिद् बलवान् कार्य्यं नः साधयेदिति॥57॥ |
| एकान्ते कान्तिमन्तं तं हनूमन्तमवस्थितम्।<br>आत्मरामं तदा रामप्रेष्ठं प्रोवाच जाम्बवान्॥58॥ |
| सर्वशास्त्ररसाभिज्ञ सर्ववीर्य्यरसार्णव।<br>सर्वसद्गुणसम्पन्न हनूमन् किं न भाषसे॥59॥ |
| इमानि कपिलक्षाणि भयशोकमहानले।<br>लोटन्ति चावलोक्य त्वं करुणां न करोषि किम्॥60॥ |
| अञ्जनात्वेन सञ्जाता मञ्जुला पुञ्जिकस्थला।<br>तस्यां हि भवतो जन्म प्राणात् प्राणिप्रणायकात्॥61॥ |
| भुवेव हैरण्यनिधिं भस्मनेवाग्निमावृतम्।<br>लोकानुवृत्त्या गूढं त्वां वेदाहं बलदेवताम्॥62॥ |

| |
|---|
| गरुडो नानुगन्तुं त्वां समर्थः किमुतापरे।<br>तात ते समतां यातुं तात एव प्रभुः स्वयम्॥63॥ |
| उत्तिष्ठ पुरुषश्रेष्ठ ज्ञातीनामथ सम्पदे।<br>तव त्रिविक्रमस्येव विक्रमावसरोऽधुना॥64॥ |
| ब्रह्मपुत्रे वदत्येवं वायुपुत्रोऽब्रवीद् वचः।<br>नन्दयञ्छोकसन्तप्तान् मन्दहासेन्दुना हरीन्॥65॥ |
| अत्येतुं योजनशतं ममाऽऽयासो न विद्यते।<br>सर्वत्राव्याहतगतेर्ग्गरुडस्येव गोष्पदम्॥66॥ |
| सहस्रवारं पर्य्यागां मेरुं प्रागेकपाततः।<br>आभिमुख्येन तीक्ष्णांशोरुदयादस्तमप्यगाम्॥67॥ |
| राघवस्य प्रसादेन लाघवं पौरुषं च मे।<br>मत्पितुश्च प्रसादेन भवेदेव विशेषतः॥68॥ |
| भवन्तोऽत्रैव तिष्ठन्तु भवन्तो वीतसम्भ्रमाः।<br>कृतकार्य्य उपेष्यामि कृतका विक्रमा न मे॥69॥ |
| मम निष्पततो वीर्य्यं न सहेत महीतळम्।<br>पङ्कवत् पतिदार्य्येत प्रवेयास्मान्महीधरात्॥70॥ |
| हनूमति ब्रुवत्येवं भूषयामासुरुद्धताः।<br>वनमालाङ्गदाद्यैस्तमङ्गदाद्याः प्लवङ्गमाः॥71॥ |
| पालयन् वानरकुलं कालयन् रक्षसां कुलम्।<br>जय वीर जयेत्युच्चैः चकुशुर्वानरेश्वराः॥72॥ |

स्मितं हरिणां वदनारविन्दं कुर्वन् हनूमानधिकं चकाशे।
माहेन्द्रमारुह्य महीधरेन्द्रं यथोदयं भानुरुदारभानुः॥73॥

क्रतुमिव हरितुष्ट्यै विक्रमं कर्त्तुकामः प्लवनमथ करिष्यन् दीक्षणीयामिवेष्टिम्।
रघुकुलतिलकं श्रीकान्तमेकान्तभक्तः समनमदसमानं राममेकाभिरामम्॥74॥

इति श्रीनारायणपण्डिताचार्य्यविरचिते रामाङ्के सङ्ग्रहरामायणे किष्किन्दाकाण्डेऽष्टमः सर्ग्गः॥4-8-74॥[ आदितः श्लोकाः 1835+74=1909]

॥इति किष्किन्दाकाण्डम् समाप्तम्॥4-8॥ [494]

# सुन्दरकाण्डम्॥5॥

## प्रथमः सर्ग्ग॥5-1-29॥

प्रणम्य सम्यक् पुरुषं पुराणमवर्धतोच्चैर्हनुमान् महाद्रौ।
लङ्कां दिधक्षन्निव धूमकेतुर्द्धूमोपमां तत्र ययौ घनौघः॥1॥

लाङ्गूलमाविध्य सरोमहर्षं विकुच्य कर्ण्णाववलोक्य लङ्काम्।
गिराववष्टभ्य करावुताङ्घ्री स उत्पतिष्यन् विरराज वीरः॥2॥

प्राणान् समायम्य समर्ज्जुकायो ध्यायन् स योगीव रघुप्रवीरम्।
व्यचीकसद् व्यक्तमथाऽऽत्मतेजः फणासहस्रं फणिनामिवेशः॥3॥

स्यान्नः पुनर्द्दर्शनमित्युदीर्य्य सगद्गदं सन्नगिरः कपीन्द्रान्।
आह्लादयन् स्माऽऽह स मेघघोषः समेरुसङ्काशतनुर्हनूमान्॥4॥

रामस्य भूम्नः शरवत् त्वरेय प्रेक्षेय सीतामधुनैव नो चेत्।
लङ्कामहं पद्मवदाहरेयं बध्वा दशास्यं पशुवद्धरेयम्॥5॥

| |
|---|
| सिन्धूनथान्दूनिव शोषयेयं गिरीन् गुरून् कन्दुकवत् क्षिपेयम्।<br>सुरासुरानप्यजवज्जयेयं तथाऽपि देवीं ध्रुवमानयेयम्॥6॥ |
| समीरवत् सर्वजगद् वलेयं पश्येयमार्य्यां पुनरानयेयम्।<br>सत्यं सखायः पुनरेव सत्यं रामैकदासोऽस्मि हि पावमानिः॥7॥ |
| इत्थं स गां कामदुघां प्रदाय स्वबन्धुतायै सुखजीवनाय।<br>निष्पीड्य माहेन्द्रमिमं पदाभ्यां विनिष्पतन्नम्बरमाललम्बे॥8॥ |
| तत्पीडितोऽद्रिर्भुवि मङ्क्षु मग्नो महाभराक्रान्त इव प्रवोऽप्सु।<br>असुस्रवंस्तत्र च धातुधारा विदारिते देह इवाऽस्रधाराः॥9॥ |
| पतत्यमुष्मिन् परिलोड्यमानाच्छैलाच्छिलाजालमधः पपात।<br>विद्याधराणां च तपस्विनां च स सुन्दरीकं कुलमुत्पपात॥10॥ |
| रामप्रियां रामचरो दिदृक्षुर्न्नन्वेकपातेन ततार सिन्धुम्।<br>तं विस्मयं वक्तुमिव त्रिलोक्यां पर्यानशे तस्य हि सिंहनादः॥11॥ |
| देवोपदेवर्षिगणा अगण्या वधूयुता विस्मयिनः खमाप्य।<br>विकासिभिश्चारुतरप्रसूनैरपूजयंस्तं नयनाम्बुजैश्च॥12॥ |
| कुतूहलात्यायतलोचनासु सर्वासु तास्वायतलोचनासु।<br>वदत्सु सर्वेष्वपि साधुसाध्वित्युच्चैर्म्मुनीन्द्रा मुदिता अवोचन्॥13॥ |
| गुणेन सन्धाय गुणार्ण्णवेन रामेण मुक्तो रणकोविदेन।<br>स्वपक्षदक्षः सफलो हनूमान् शरोपमोऽरींस्त्वरते निहन्तुम्॥14॥ |
| अस्योरुवेगैः परिकृष्यमाणा नानानगाश्चन्दनचम्पकाद्याः।<br>कृत्वाऽनुयात्रां सुमनोभिसारैर्न्नमन्ति भक्ताइव वारिपारे॥15॥ |

| |
|---|
| उपर्य्युपर्य्येनमथो अधोऽधो लसन्ति मेघास्तरसाऽभिकृष्टाः।<br>सितासिता रक्तरुचश्च यद्वद्धरिप्रवीरः परिवारभूताः॥16॥ |
| निपातवातैः परिलोड्यमानः फेनायमानः सकलोऽपि सिन्धुः।<br>आशङ्क्यते रामयशोम्बुधिर्वा पयोम्बुधिर्वेत्यपि हारगौरः॥17॥ |
| द्रोणीकरोत्येष समुद्रमध्यं वेगानिलेनानिलदेवसूनुः।<br>सेतुं विधातुं हरिवाहिनीनां पुरैव कुर्वन्निव लक्ष्मलेखाम्॥18॥ |
| इन्द्रध्वजाभं स्फुरति द्युसङ्गि लाङ्गूलमस्याखिलमङ्गलाय।<br>तद्वैजयन्तीमिव मेघपाळिं दोलायमानामवलोकयध्वम्॥19॥ |
| हस्तावुदस्तौ लसतोऽस्य दीर्घौ पीनौ सुवृत्तौ पवमानसूनोः।<br>अर्द्धोद्गतौ पर्वतपार्श्वयुग्मात् पञ्चास्यवन्ताविव पन्नगेन्द्रौ॥20॥ |
| शस्त्रं विना शत्रुपुरीमुपैति मत्तो हनूमानिति माऽस्तु शङ्का।<br>नन्वेकवज्रो रिपुमेति वज्री दशास्य घोरा नखनामवज्राः॥21॥ |
| सहोदयेतामुदयाद्रिशृङ्गे रवी यदि द्वौ नवधातुताम्रे।<br>तर्हीक्षणे ताम्रतरे सुवृत्ते ताम्राननास्यास्य विडम्बयेताम्॥22॥ |
| अर्द्धोद्गते इन्दुकलेइव द्वे दंष्ट्रे अमुष्य स्फटिकस्फुटाभे।<br>सद्भक्तिवध्वा स्थिरयोगभाजां सुखाय दुःखाय वियोगभाजाम्॥23॥ |
| मेरुः सुरेन्द्रेण सुराचलत्वादच्छिन्नपक्षो द्रवतीह नूनम्।<br>इति प्रतर्कं तनुते प्रजानां शरीरमस्यातनु हेमधाम॥24॥ |
| अलङ्करोत्यस्य विशालमूर्त्तेरुरो विशालं वनमालिकेयम्।<br>आकाशमाकाशसुरापगेव समुद्रसीमेव भुवोऽवकाशम्॥25॥ |

विस्तीर्णभावे दशयोजनाऽस्य च्छायाऽम्बुधौ तत्त्रिगुणायतेयम्।

लब्धा कवीन्द्रैरुपमानभूमिर्हनूमतो न ह्यपरा त्रिलोक्याम्॥26॥

सुराधिराजं पतगाधिराजः सुधां जिहीर्षुर्जितवान् जवेन।

प्लवङ्गराजो हि पतङ्गराजं सीतां जिहीर्षुर्जितवानवश्यम्॥27॥

को वानरेन्द्रस्य समानतायां वर्तेत यस्यानिल एव तुल्यः।

को वा नरेन्द्रस्य समानतायां रामस्य यो भाति कृपालुतायाम्॥28

जयति जगति दिव्यश्रीतनूमान् हनूमा नहितमवहितात्मा बाह्यमभ्यन्तरं च।

वसति वसतिभूते यस्य चित्ते विचित्रे भुवनभवनपूर्णो रामदेवः सदेति॥29॥

इति श्रीनारायणपण्डिताचार्य्यविरचिते रामाङ्के सङ्ग्रहरामायणे सुन्दरकाण्डे प्रथमः सर्ग्गः॥5-1-29॥[आदितः श्लोकाः 1909+29=1938]

## द्वितीयः सर्ग्गः॥ 5-2-59॥

पवमानसुतं वीक्ष्य प्लवमानं महार्णवः।

मग्नमात्मनि मैनाकं हिमाद्रेः सूनुमब्रवीत्॥1॥

उत्तिष्ठ पर्वतश्रेष्ठ विश्रमार्थं हनूमतः।

रामदेवस्य दूतोऽयं माननीयो हि मादृशैः॥2॥

इति वारिनिधेर्वाक्यादुत्तस्थौ कनकाचलः।

कलापश्यामले सिन्धावचिरांशुरिवाम्बुदे॥3॥

अनेकसानुमात्मानं नानावनमनोरमम्।

अनादृत्योत्पतन्तं तं हनूमन्तं धरोऽब्रवीत्॥4॥

वीर विश्रम्यतामत्र भुज्यतां स्वादु मत्फलम्।
बान्धवा वयमित्युक्तो मारुतिर्गिरिमब्रवीत्॥5॥

विश्रमः श्रमिणां सौम्य न श्रमो मम विद्यते।
अविश्रमे प्रतिज्ञा मे कृता वानरसन्निधौ॥6॥

अल्पशेषश्च दिवसस्त्वरेऽहं कार्य्यगौरवात्।
महीधर महीं मुक्त्वा कस्मान्मग्नोऽम्बुधौ भवान्॥7॥

मारुतेरीरितं श्रुत्वा स्यालः शम्भोरभाषत।
पक्षिणः पर्वताः पूर्वमक्षिण्वन् भुवनत्रयम्॥8॥

वज्रेण वज्री चिच्छेद पक्षान् निश्शेषभूभृताम्।
नीतोऽहं दयया सिन्धौ वायुना वायुनन्दन॥9॥

सर्वान्तरात्मा तातस्ते पक्षदो मे ततो भवान्।
पूज्यो मे प्रेषितश्चाहं रामभक्तेन सिन्धुना॥10॥

हिरण्यनाभस्य च गां श्रुत्वा प्राभञ्जनिः प्रभुः।
परिरभ्य ययौ दोर्भ्यामद्रिं पुरुषरूपिणम्॥11॥

स्थाने सत्यप्यविश्रान्तं तं शशंसुः सुरेश्वराः।
पुंसः प्रभावसामग्र्यान्नैरपेक्ष्यं हि लक्षणम्॥12॥

इन्द्रो गिरीन्द्रमाचष्ट तोषितस्तेन कर्म्मणा।
अभयं ते मया दत्तं रामशूश्रूषणादिति॥13॥

प्लवमानं तमालोक्य द्विगुणं वेगमागतम्।
न्यगदन् नागजननीं सुरसां सरसाः सुराः॥14॥

| |
|---|
| मारुतेः कुरु विघ्नं त्वं जिज्ञासामोऽस्य तद् बलम्।<br>यद्यदिच्छसि तत्त ते वक्त्रमेतु वरेण नः॥15॥ |
| दक्षा दाक्षायणीत्युक्ता भूत्वा सा रूक्षराक्षसी।<br>तस्थावास्यं विवृण्वाना मार्ग्गामावृत्य मारुतेः॥16॥ |
| तामवेक्ष्य कराळाक्षीं पिङ्गाक्षेन्द्रोऽभ्यभाषत।<br>मारुती रामदूतोऽस्मि मार्ग्गो मे दीयतामिति॥17॥ |
| यो वा को वा भवेदानीं वदनं प्रविशाऽशु मे।<br>इत्युक्त्वा साट्टहासां तां कपीन्द्रः कुपितोऽब्रवीत्॥18॥ |
| कथं मां ग्रससित्युक्त्वा विग्रहं जगृहे हरिः।<br>आयामेऽप्यथ विस्तारे समानं बहुयोजनम्॥19॥ |
| व्यादात् सा द्विगुणं वक्त्रं तद्देहपरिमाणतः।<br>सोऽङ्गुष्ठमात्रस्तद्वक्त्रं प्रविश्य निरगात् प्रभुः॥20॥ |
| तस्य प्रबावं सम्भाव्य सरसा सुरसाऽब्रवीत्।<br>जीवन्नैवामरवरं तात रक्षितवानसि॥21॥ |
| सत्यं लङ्कामुपेत्य त्वं जानीया जनकात्मजाम्।<br>तामेवंवादिनीं वीरः प्रतिपूज्य प्रपुप्लुवे॥22॥ |
| तमापतन्तमालोक्य सिंहिका सिंहविक्रमम्।<br>दैवान्मे भोजनं पूर्णं  प्राप्तमित्यन्वचिन्तयत्॥23॥ |
| विधेर्वरादवध्या सा लङ्कापालनतत्परा।<br>छायाग्रह इति ख्याता छायां जग्राह मारुतेः॥24॥ |

| |
|---|
| लोकघ्नीमवलोक्यायं दानवीं विवृताननाम्।<br>अबूदद्रिनिभः साऽपि वक्त्रेणाम्बरमावृणोत्॥25॥ |
| स्वतनुं तनुतां नीत्वा हनुमानाविवेश ताम्।<br>हृदयं निर्दयं तस्या बिभेद नखरैः खरैः॥26॥ |
| आन्त्रमालिनमुत्क्रान्तं तां निहत्य महाहरिम्।<br>नरसिंहमिवांसङ्घमस्तुवन् सुरकिन्नराः॥27॥ |
| हनूमन् भूरिमहिमन् हता सर्वाहिता त्वया।<br>खेचराः खे चरिष्यन्ति त्वां गायन्तो भयं विना॥28॥ |
| इति संस्तुवतः सर्वान् दिव्यपुष्पप्रवर्षिणः।<br>अपाङ्गेनोपसङ्गम्य प्लवगेन्द्रः प्रपुप्लुवे॥28॥ |
| उल्लोलमेघकल्लोलं लोलसत्वगणाकुलम्।<br>अम्बरं चाम्बुराशिं च स समं समलङ्घयत्॥30॥ |
| आलम्बशिखरे लम्बे लङ्काप्राकाररूपके।<br>निपपात कपिश्रेष्ठः स त्रिकूटोपशोभिते॥31॥ |
| आपाततोऽभ्यापततो वायुपुत्रस्य निस्वनात्।<br>खगा मृगा दश दिशो वित्रस्ता दुद्रुवुद्रुतम्॥32॥ |
| पुष्पाणि ववृषुर्वृक्षास्तस्मिन्नापतिते सति।<br>विक्रान्तिमति सम्भ्रान्ता बान्धवाइव बान्धवे॥33॥ |
| बलात्मनो हनुमतो न ग्लानिर्विक्रमेऽप्यभूत्।<br>नहि तेजस्विनो वह्नेर्निशीथेऽप्यन्धकारिता॥34॥ |

| |
|---|
| त्रिकूटशृङ्गमारुह्य प्रेक्षमाणो दिशो दश।<br>लङ्कामलङ्कारवतीं ददर्शेन्द्रपुरीमिव॥35॥ |
| गम्भीरपरिखां भीमां बहुप्राकारदुर्ग्गमाम्।<br>दृष्ट्वा लङ्कां गिरीन्द्रस्थो नानायन्त्रामचिन्तयत्॥36॥ |
| न नूनं वानराणां स्याल्लङ्घनं लवणोदधेः।<br>अथापि लङ्घितवतां पुरीयं सुगमा कथम्॥37॥ |
| चिन्तया तान्तिकर्य्या किं नास्ति रामस्य दुष्करम्।<br>रामदेवप्रसादेन किं ममाप्यस्ति दुष्करम्॥38॥ |
| अरुणीभवतीदानीं तरणिस्तरुणो यथा।<br>अस्तङ्गतेऽस्मिन् यास्यामि मा द्राक्षुर्म्मां हि राक्षसाः॥39॥ |
| मामम्मी राक्षसा वीक्ष्य शङ्केरन्नीदृशाकृतिम्।<br>अणुः पुरीं प्रवेक्ष्यामि ततोऽन्वेष्टुं नृपात्मजाम्॥40॥ |
| इति सञ्चिन्त्य शैलाभो बिलाळाभो बभूव सः।<br>योगैश्वर्य्यबलेनैव योगीश्वरवल्लभः॥41॥ |
| मत्तप्रमत्तस्त्रीपुंस्कं पुरं शुद्धिविवर्ज्जितम्।<br>आभिचारइव क्रूरः प्रदोषे प्राप्तवान् कपिः॥42॥ |
| अच्छिद्रवप्रवसनां मणिहेमविभूषणाम्।<br>स पुरीं स्त्रीमिवाद्राक्षीत् पीनोन्नतगृहस्तनीम्॥43॥ |
| इन्दुहासेन सन्दीप्तसौधगण्डेन पाण्डुना।<br>आह्वयत् सा हरिं नूनं पाणिकान्त्या पताकया॥44॥ |

| |
|---|
| पत्यौ धनपतौ याते भजन्त्युपपतिं खलम्।<br>लज्जितेवाऽऽवृणोल्लङ्का धूमपट्या निजं वपुः॥45॥ |
| कस्त्वं पुरप्रवेशीति भत्सयन्ती नदन्त्युत।<br>ताडयामास तं चण्डी स्त्रीरूपा पुरदेवता॥46॥ |
| अचिकीर्षुः कपिवरः स्त्रीवधं सुजुगुप्सितम्।<br>वामो वामकराग्रेण तां मनाक् प्रत्यताडयत्॥47॥ |
| पीडिता ताडितेनास्य विह्वला प्रह्वतां गता।<br>गद्गदाक्षरमूचेऽसावाञ्जनेयं कृताञ्जलिः॥48॥ |
| स्वागतं ते महाभागजाने त्वां ब्रह्मणो गिरा।<br>लङ्कासङ्कटकाले त्वां कपिर्जेता बलादिति॥49॥ |
| वीर वीरप्रणयिनीं मृग्ययस्व मृगीक्षणाम्।<br>व्याधैरप्यनुकम्प्यायाः क्षमस्वाऽऽगः स्त्रिया मम॥50॥ |
| तामेवंवादिनीं दीनां मा भीरिति विसृज्य सः।<br>अद्वारेण बलोदारः प्रविवेश रिपोः पुरीम्॥51॥ |
| द्विषां मूर्ध्नि पदंवामं चक्रे निद्रामुपेयुषाम्।<br>पश्चात् करिष्यन् स रणे दीर्घनिद्रामुपेयुषाम्॥52॥ |
| सुन्दरे मन्दराकारे मन्दिरमन्दिरे हरिः।<br>ददर्श राक्षसान् रूक्षान् नानावस्थानवस्थितान्॥53॥ |
| मत्तान् प्रमत्तानुन्मत्तान् नानापानरतानपि।<br>सुरतोत्सवसंसक्तान् रमणीभिरवैक्षत॥54॥ |

| |
|---|
| जुह्वतोऽग्नींश्च जपतोध्यायतो ब्रह्म राक्षसान्।<br>नानायुधधरांश्चान्यानपश्यत् पुररक्षिणः॥55॥ |
| राक्षसीरैक्षतानेका मानिनीः कामिनीरपि।<br>विलासिनीर्भोगिनीश्च योगिनीश्च वियोगिनीः॥56॥ |
| क्रीडितान् पीडितान् पोतान् मुदितान् रुदितानपि।<br>लाळितान् भत्सितान् कांश्चित् मातृभिर्दृष्टवानसौ॥57॥ |
| चतुरङ्गं तु कामं नो युद्धं स्यादिति गर्जितम्।<br>चतुरं गन्तुकामं नो निद्रां सैन्यमवैक्षत॥58॥ |
| रामाननाभं हनुमानयं तं खे वीक्ष्य पूर्णेन्दुममानयन्तम्।<br>नाथं ह सस्मार समा नयन्तं भक्तान् सुखेनैव स मानयन्तम्॥59॥ |
| इति श्रीनारायणपण्डिताचार्य्यविरचिते रामाङ्के सङ्ग्रहरामायणे सुन्दरकाण्डे द्वितीयः सर्ग्गः॥ 5-2-59॥<br>[आदितः श्लोकाः 1938+59=1997] |
| **तृतीयः सर्ग्गः ॥5-3-56॥** |
| प्रहस्तकुम्भकर्ण्णादिराक्षसानां गृहे गृहे।<br>स विमृग्य सरोजाक्षीं रावणान्तःपुरं ययौ॥1॥ |
| वाहरत्नैर्वधूरत्नै रत्नैर्वासोविभूषणैः।<br>आश्चर्य्यरत्नैः सर्वैश्च सम्पूर्ण्णं पुरमैक्षत॥2॥ |
| यानियानि वरीयांसि वस्तूनि भुवनत्रये।<br>तानितान्युपनीतानि रक्षसैक्षत मारुतिः॥3॥ |

| |
|---|
| अन्तःपुरान्तरेऽपश्यत् केवलं रावणालयम्।<br>अर्द्धयोजनविस्तारं सार्द्धयोजनमायतम्॥4॥ |
| मणिहेममये तस्मिन् भवेन भुवनाद्भुते।<br>दीप्तं विमानमाचष्ट स ज्योतिरिव तेजसि॥5॥ |
| मणिश्रेणिश्रिया गौरे पुष्पके पुरुषर्षभः।<br>अपश्यद् रावणं सुप्तं शशिबिम्बे शशं यथा॥6॥ |
| परिवार्य्य पतिं वीरं शयानं शयनोत्तमे।<br>सहस्रं वरनारीणां तत्र प्रैक्षत मारुतिः॥7॥ |
| विहृत्य सुचिरं पीत्वा मदिरां मदिरेक्षणाः।<br>कान्ता रतिपरिश्रान्ताः शेरते स्मादिनिद्रया॥8॥ |
| स्त्रीरत्नमालावलये तस्मिन् रुचिररोचिषि॥ |
| महानीलमणिश्यामो रावणो नायकायितः॥9॥ |
| हन्त सोऽयं खल इति प्रैक्षतैनं स मारुतिः।<br>विकस्वराभ्यां नेत्राभ्यामुपसृत्याकुतोभयः॥10॥ |
| वज्रपाताङ्कितौ तस्य भुजगेन्द्रोपमौ भुजौ।<br>रक्तचन्दसंसिक्तौ पर्य्यङ्के परिसारितौ॥11॥ |
| देदीप्यमानैराकल्पैस्तद्देहे माषमेचके।<br>नीलाम्बुदतटित्प्रख्यैर्द्दीपदीप्तिरजीयत॥12॥ |
| अतिप्रमाणप्राणस्य घ्राणोत्थाः श्वासवायवः।<br>दीपान् न शमयाचक्रुर्व्यक्तं मणिमयत्वतः॥13॥ |

| |
|---|
| विलोक्यैवंविधाकारं सुप्तं तं तदुपान्तिके।<br>मण्डोदरीमथापश्यत् कान्तामन्तःपुरेश्वरीम्॥14॥ |
| किं देवी दानवी किं वा का न्वेषा कामवल्लरी।<br>इत्याशङ्क्य न सीतेति तार्किकः समतर्कयत्॥15॥ |
| सहस्रशः सह प्रेष्ठैः पानभूमिमुपेयुषीः।<br>ददर्श दर्शनीयाङ्गीरङ्गनाः स प्लवङ्गमः॥16॥ |
| बभौ पानस्थलं रूप्यचषकाणां शतान्वितम्।<br>तस्योपमापदं स्याच्चेच्छतचन्द्रं नभस्तळम्॥17॥ |
| यत्रयत्र विलासिन्यो विलासं विपुलं दधुः।<br>हरिः स तत्रतत्रागाद् रामसेवैकभूषणः॥18॥ |
| गृहोर्ध्वगृहसौधेषु प्रकोष्ठवलभीषु च।<br>चैत्यचत्वरथ्यासु विचिक्ये च्छलजानकीम्॥19॥ |
| क्वचिद् द्वारं विवृण्वानः क्वचिच्च विवृतं विशन्।<br>क्वचिज्जालान्तरेणैव प्राविशत् प्राणनन्दनः॥20॥ |
| अवाप्य वापीरन्विष्यन् देवालयलतालयान्।<br>जलाशयांश्च विविधांश्चचारासङ्गमो हरिः॥21॥ |
| बहिरन्तश्च विचरन् वायुवद् वायुनन्दनः।<br>चतुरङ्गुलमात्रं च पुर्य्यां न व्यचिनोन्न हि॥22॥ |
| चिन्तयामास हनुमानदृष्ट्वा जानकीतनुम्।<br>मया न दृष्टा सा देवी कार्य्यं सकलमाकुलम्॥23॥ |

नागाङ्गना नाकनारीर्न्नगर्य्यां राक्षसीरपि।
अद्राक्षं यास्ववस्थासु ता न हन्त ममोचिताः॥24॥

नावस्त्राः स्त्रिय ईक्षेत ब्रह्मचारी विशेषतः।
इति शास्त्रगतिं नाहमद्राक्षं कार्य्यगौरवात्॥25॥

लवणाब्धिर्वृथा तीर्ण्णो न कार्य्याब्धिर्म्महानयम्।
नानानार्य्यो वृथा दृष्टा रामनारीन हा बत॥26॥

मम त्वसङ्गमनसो न दोषो विषयेक्षणात्।
विषयैर्न्नहि लेपोऽस्ति वह्निवायुविवस्वताम्॥27॥

यन्न देवी मया दृष्टा सङ्कटः स हि नापरः।
तामदृष्ट्वा कपीन् प्राप्य किं नु वक्ष्यामि षण्डवत्॥28॥

सीता न दृष्टेति कथं वक्ष्ये संवन्द्य राघवम्।
अवेक्षिष्ये कथं तस्य पूर्णचन्द्रोपमं मुखम्॥29॥

सीता क्वापि न दृष्टेति वचनं विषमं विषम्।
नरेन्द्रवानरेन्द्राणां कुलयोर्विलयप्रदम्॥30॥

सर्वं विक्रमजालं मे निष्फलं हीन्द्रजालवत्।
देवीमपश्यतो यद्वल्लालित्यं फेनसम्पदः॥31॥

मुष्टिघातैर्द्दुराचारं रावणं मारयामि वा।
अथवा पशुवद् बध्वा रामपार्श्वं नयामि तम्॥32॥

अशोकवनिकायां तामशोकवनितां वराम्।
अथाप्यहं विचेष्यामि स्याद् यत्नः सफलो यतः॥33॥

नमोऽस्तु रामरामायै रामायापि नमोनमः।

भूम्ने सर्वान्तरायापि सर्वसिद्धिप्रदायिने॥34॥

इत्यालोच्य विविच्यासौ कार्य्यं निर्द्धार्य्य वीर्य्यवान्।

अशोकवनिकां प्रायात् सर्वर्त्तुफलपुष्पिणीम्॥35॥

अशोकशोचिषा शोणं वनमैक्षत वानरः।

पद्मरागैरिवाऽऽकीर्ण्णं हरितोपलपवर्तम्॥36॥

नदी त्रिकूटात् पतिता वनमध्यं व्यराजयत्।

रम्यं सीमन्तसीमेव सीमन्तिन्याः शिरोरुहम्॥37॥

भवने पवनस्याथ वने पवननन्दनः।

विजहार यथाकामं प्लवमान इतस्ततः॥38॥

काञ्चनीनां च वल्लीनां काञ्चनानां च शाखिनाम्।

समभ्यनन्दत् संयोगं दम्पतीनामिव प्रभुः॥39॥

जैत्रं चैत्ररथस्येदं कान्त्या नन्दननिन्दनम्।

मणिहेममयं दिव्यमुध्यानं समवैक्षत॥40॥

वने तुच्छेतरच्छाये ददर्श पवनात्मजः।

शिंशपां काञ्चनमयीं मेघे सौदामिनीमिव॥41॥

तत्र प्रवाळसोपानं चैत्यप्रासादमद्भुतम्।

सहस्रस्तम्भमैक्षिष्ट श्रीमत्काञ्चनवेदिकम्॥42॥

इमां नदीं शिवजलां शिवच्छायां च शिंशपाम्।

सा तन्वी सेवते नूनमित्यमन्यत मारुतिः॥43॥

| |
|---|
| तस्या एकतमां शाखां शाखामृगपतिः शनैः।<br>आरुह्य संवृतः पर्णैर्ददर्श स दिशो दश॥44॥ |
| तत्र दीनामिवादीनां मलिनामिव चामलाम्।<br>कृशामिवोपवासेन नकृशां प्रकृतिश्रिया॥45॥ |
| फुल्लपद्मपलाशाक्षीं पूर्णचन्द्रनिभाननाम्।<br>निष्टप्तस्वर्णवर्णाङ्गीं साक्षात् सर्वाङ्गसुन्दरीम्॥46॥ |
| आलम्बिनीं केशवेणीं कृत्वा जघनमण्डले।<br>आसीनामवनीपृष्ठे सन्ततास्राम्बुसन्ततिम्॥47॥ |
| हन्तैकवसनां कैश्चिद् भूषितां भूषणैरपि।<br>मारुतिः शिंशपामूले मायासीतामवैक्षत॥48॥ |
| राक्षसारेः प्रियां जायां राक्षसीगणमध्यगाम्।<br>मृगीमिव श्वगणगां दृष्ट्वा चिन्तामवाप सः॥49॥ |
| रामदेवस्य देवीयं व्यक्तमायतलोचना।<br>ईदृशं लक्षणं तेन कीर्त्तितं पुण्यकीर्त्तिना॥50॥ |
| ह्रियमाणा मया दृष्टा सेयमेवेति भाति मे।<br>तस्योत्तरीयस्य सममुत्तरीयमिदं ध्रुवम्॥51॥ |
| कथं विश्वेश्वरी सीता स्वयं विश्वेश्वरप्रिया।<br>दुःखिनीति महच्चोद्यं प्रतिभा मे निरस्यति॥52॥ |
| अनुकुर्वाणयोर्ल्लोकं देवदेव्योरदीनयोः।<br>दुःखमोहादिकं मिथ्या नटनट्योरिव ध्रुवम्॥53॥ |

| |
|---|
| मायामयीमिमां सृष्ट्वा सीता प्रतिकृतिं निजाम्।<br>स्वयमन्तर्हिता व्यक्तमित्थं मे प्रतिभा शुभा॥54॥ |
| मनसा विमृशन्नेवं मरुतस्तनयो मुहुः।<br>आस्ते पर्णौर्विलीनात्मा कृशानुरिव भस्मनि॥55॥ |
| चित्तं बभौ स्फुरति रामपदारविन्दे |
| नेत्रं रमाप्रतिकृतेश्चरणारविन्दे।<br>कोपोदयो हनुमतो दशवक्त्रसैन्ये |
| प्रेमोदयः सपदि वानरराजसैन्ये॥56॥ |
| इति श्रीनारायणपण्डिताचार्य्यविरचिते रामाङ्के सङ्ग्रहरामायणे सुन्दरकाण्डे तृतीयः सर्ग्गः ॥5-3-56॥<br>[आदितः श्लोकाः 1997+56=2053] |
| **चतुर्त्थः सर्ग्गः ॥5-4-64॥** |
| परितः पद्मनयनां परिवारत्वमागताः।<br>राक्षसीरैक्षत हरिर्वरळामिव टिट्टिभीः॥1॥ |
| नानामृगपतङ्गानां सरूपवदनादिकाः।<br>एकहस्ताङ्घ्रिनेत्राद्या द्विनासाजठरादिकाः॥2॥ |
| पादादिस्थमुखीः काश्चिद् व्यत्यस्तावयवास्तथा।<br>दृष्ट्वा नैकान्तिकीं मेने स्रष्टुः सृष्टिं स पावनिः॥3॥ |
| सपद्यपररात्रोत्थैः पवनैस्त्रिगुणोत्कटैः।<br>उददीपि दशास्यस्य मायाश्रीमन्मथानलः॥4॥ |

| |
|---|
| तेन तातप्यमानोऽसौ तल्पतः सहसोत्थितः।<br>अशोकवनिकां प्रायान्मदान्धः प्रस्खलन्निव॥5॥ |
| चार्वाङ्ग्यश्चामरच्छत्रप्रदीपैः प्रतिदीपिताः।<br>अन्वीयुः किञ्चिदुन्निद्राः प्रमदास्तं मदालसाः॥6॥ |
| तमापतन्तमालोक्य विवर्णवदना सती।<br>ससर्जवेपथुमती श्वासान् दीर्घानशीतलान्॥7॥ |
| ऊरुभ्यां म्लानवासोभ्यां छादयन्ती तनूदरम्।<br>स्तनावप्यतनू दोर्भ्यां सा बभूव पराङ्मुखी॥8॥ |
| रावणो विद्धहृदयः पञ्चसायकसायकैः।<br>चापलं विपुलं प्राप्य तां सान्त्वेनेदमब्रवीत्॥9॥ |
| मन्ये त्वामिन्दिरेशोरोमन्दिरामिन्दिरामहम्।<br>लावण्यवल्लीपुष्पाणि तवाङ्गानि स्मरेषवः॥10॥ |
| विश्वैश्वर्य्यमिदं पश्य मम मानिनि मानिनः।<br>अस्मिन् मे यौवनवने लल त्वं ललनालते॥11॥ |
| कथं द्रक्ष्यति रामस्त्वां दृष्ट्वा वा नेष्यते कथम्।<br>तस्मात् त्वं तापसं त्यक्त्वा भज मां भुवनेश्वरम्॥12॥ |
| मां कृत्वा कृपया दासं लक्ष्मीमेनावमाप्नुहि।<br>दास्यामि राज्यं रत्नानि जनकायापि जानकि॥13॥ |
| एवं विलोभयन्तं तं कुपिता सा पतिव्रता।<br>तृणमन्तरतः कृत्वा युक्तमुक्तवती शनैः॥14॥ |

| |
|---|
| शूद्रेण ब्रह्मविद्येव खद्योतेनेव भानुभाः।<br>त्वया रावण दुष्प्रापा रामस्याहं प्रिया सती॥15॥ |
| पुलस्त्यस्य कुले जातो न धर्म्मान् वेद किं भवान्।<br>परदारप्रसङ्गोऽयमङ्ग मङ्गलभङ्गदः॥16॥ |
| तुभ्यं चेन्नाभ्यसूयामि हितं तथ्यं वदामि ते।<br>रामाय मां प्रदायाऽऽशु कृपालुं तं प्रसादय॥17॥ |
| यदीदानीं न मन्येथाः मन्येथास्त्वमथाचिरात्।<br>शरैर्विदीर्णहृदयो रामलक्ष्मणलक्षणैः॥18॥ |
| अथापि चेदनङ्गस्ते निद्राविघ्नं करिष्यति।<br>रामस्त्वामप्रमेयाङ्गो दीर्घनिद्रां प्रणेष्यति॥19॥ |
| राक्षसाधम ते वाचा जानकी न विलोभ्यते।<br>काकस्य काकुस्वानेन राजहंसीव मानसी॥20॥ |
| ग्रामसिंहं यथा सिंहो गरुढः पन्नगं यथा।<br>गजो यथाऽजं हन्ता त्वामप्रयत्नेन राघवः॥21॥ |
| न नाशयामि शक्ताऽपि त्वां नृशंसं दशानन।<br>विना रामाज्ञया किन्तु त्वां हत्वा स भजेद् यशः॥22॥ |
| इमां च वाचमत्युष्णामश्रुधारां च सन्तताम्।<br>विसृज्य सा सरोजाक्षी परिरेभे पतिं हृदा॥23॥ |
| इत्युक्तः कोपवान् क्रूरः क्रूरमाचष्ट राक्षसः।<br>एवं चेत् प्रातराशं त्वां कुर्य्यां सूदजनैरिति॥24॥ |

| |
|---|
| सान्त्वयन्ति स्म तन्वीं तामपाङ्गेन वराङ्गनाः। मयजा मैवमित्येनमाश्लिषत् कुपितं पतिम्॥25॥ |
| वशीकर्त्तुं समादिश्य राक्षसीर्विकृताकृतीः। सामादिभिरुपायैस्तां विवेशान्तःपुरं खलः॥26॥ |
| निशाचर्य्योऽथ तामेकजटाहरिजटादिकाः। पृथक्पृथक् सामपूर्वं दण्डगर्भं वचोऽब्रुवन्॥27॥ |
| पुलस्त्यस्य मुनेः पौत्रो वेदवेदाङ्गपारगः। प्रजापतिसमः सीते विश्वेश्वर्य्येण रावणः॥28॥ |
| सन्त्यज्य निर्ग्गुणं रामं भज भद्रे दशाननम्। स्वयं कामयमानं तं न  त्वं कामयसे कथम्॥29॥ |
| इतिश्रुत्वाऽब्रवीद् बाला निर्ग्गुणः सगुणोऽपि वा। राम एव पतिः स्यान्मे कामं खादत मामिति॥30॥ |
| विनता विकटा चाश्वमुखी चण्डोदरी तथा। विघसाऽयोमुखी शूर्प्पणख्याद्या राक्षसस्त्रियः॥31॥ |
| विवृत्य नेत्रवक्त्राणि समुद्यम्याऽऽयुधानि च। तां शिंशपामुपायन्तीं परिद्रुत्याभ्यभत्सयन्॥32॥ |
| न चेद् रावणभार्य्या स्या विदार्य्याङ्गानि तेऽधुना। खादद्भादं प्रनृत्यामः पायम्पायं सुरामिति॥33॥ |
| इत्यादि राक्षसीभिः सा मायासीता प्रभत्सिता। रुरोद सुस्वरं नाथ हा राम क्व भवानिति॥34॥ |

| |
|---|
| विलापं विदधे चित्रं सीताप्रतिकृतिर्हि सा।<br>यत्र सामग्र्यमगमत् त्रिलोक्यां करुणो रसः॥35॥ |
| श्रुत्वा विलापं तस्यास्तं रावणाय निवेद्य च।<br>राक्षस्यो भक्षयिष्यामस्त्वामित्यभ्यापतन्निमाम्॥36॥ |
| तत्रैव त्रिजटा नाम शुद्धभावा निशाचरी।<br>शयाना शयने वृद्धा गामुदारामुदाहरत्॥37॥ |
| आत्मानं खादतानार्या न सीतां साधुसम्मताम्।<br>नेयं शोच्या मम स्वप्नदर्शनं तन्निदर्शनम्॥38॥ |
| इत्थं वदन्तीं त्रिजटां राक्षस्यः पर्यवारयन्।<br>भीताः सन्त्यज्य तां तन्वीं स्वप्नं ब्रूहीति चाब्रुवन्॥39॥ |
| रामायाञ्जलिमाबध्य त्रिजटा वाक्यमब्रवीत्।<br>अदर्शि राघवः क्षोणीं सङ्ग्रसन् रुधिरं पिबन्॥40॥ |
| सोऽध्यास्त शिबिकां दान्तीं हन्त हंससहस्रिणीम्।<br>सानुजः सीतया देव्या मोदते पुष्पके पुनः॥41॥ |
| श्वेतमाल्याम्बरधरा श्वेताद्रौ भाति जानकी।<br>सागरेण परिक्षिप्ते चन्द्रलेखेव सुन्दरी॥42॥ |
| चतुर्दन्तिनि दन्तीन्द्रे चन्द्रवर्णे मया पुनः।<br>रामः सलक्ष्मणो दृष्टः शुक्लमाल्याम्बरो वरः॥43॥ |
| प्रकाशमानमाकाशे गजेन्द्रे गजविक्रमम्।<br>रामं दृष्ट्वाऽन्वगात् सीता हंसी हंसमिवोत्सुका॥44॥ |

| |
|---|
| कान्तस्याङ्कं ततः प्राप्ता सीतेयं प्रेक्षिता मया।<br>स्पृशन्ती पाणिपद्माभ्यां दिवाकरनिशाकरौ॥45॥ |
| उपर्य्युपरि नो लङ्कां रामस्ताभ्यां सह स्थितः।<br>याने श्वेतवृषैर्य्युक्ते श्वेताकल्पो न्यदर्शिसः॥46॥ |
| रावणः पतितो दृष्टः पुष्पकादधुना मया।<br>कृष्यमाणः स्त्रिया नीचैर्म्मुण्डः कृष्णाम्बरो हसन्॥47॥ |
| रथेन खरयुक्तेन रक्तमाल्यानुलेपनः।<br>याति याम्यां दिशं तत्र प्रविष्टः कर्द्दमं ह्रदम्॥48॥ |
| रावणोऽयं वराहेण शिंशुमारेण शक्रजित्।<br>उष्ट्रेण कुम्भकर्ण्णश्च याति याम्यामथो दिशम्॥49॥ |
| खरयुक्तरथेनापि याम्यां याति दशाननः।<br>राक्षस्यो राक्षसाश्चामी रक्तवस्त्रा हसन्त्यहो॥50॥ |
| तैलं पीत्वा प्रनृत्यन्ति गायन्त्यो राक्षसाङ्गनाः।<br>गोमयह्रदगाः सर्वे लङ्केयं भस्मसादभूत्॥51॥ |
| श्वेतातपत्रः श्वेताद्रावेकस्त्वास्ते विभीषणः।<br>चतुर्भिः सचिवैः सार्द्धमेवं स्वप्नो मम त्वभूत्॥52॥ |
| सम्पत्तिरस्ति सीताया विपत्तिर्न्निशिचारिणाम्।<br>व्यक्तमेवं विधे स्वप्ने मा भत्सयत मैथिलीम्॥53॥ |
| नाशोभनार्हा भद्रेयं सीता सर्वाङ्गशोभना।<br>प्रत्यागतं सूचयति काकोऽयं जानकीहितम्॥54॥ |

| |
|---|
| वदन्त्यामिति राक्षस्यां व्यलप्छलमैथिली।<br>हा राम राम नाथेति पालयेति पुनःपुनः॥55॥ |
| वामैः प्रियंवदैस्तस्या हर्तोरुनयनैरथ।<br>शिरीषमालाकदळीनळिनाभैरकम्प्यत॥56॥ |
| इमामवस्थामखिलां पश्यन् पवननन्दनः।<br>चिन्तयामास बहुधा कार्य्यागौरवयन्त्रितः॥57॥ |
| राक्षसीभिरविज्ञातः सीतां विश्वासयन्नहम्।<br>संवदिष्य इति ह्यासां निद्रां प्रत्यैक्षत प्रभुः॥58॥ |
| मानुषीमाशु मधुरां संस्कृतां श्रीतनुप्रियाम्।<br>नीतिमान् हनुमान् वाचमुवाच विटपाश्रयः॥59॥ |
| ईशो दाशरथिः श्रीमान् रामो राजीवलोचनः।<br>निधिः सर्वगुणानां हि वारीणामिव वारिधिः॥60॥ |
| कान्तास्यः पितृसन्देशात् कान्तारं स समाविशत्।<br>कान्तासक्तमनाः प्रायात् कान्ता तस्य च जानकी॥61॥ |
| विचिन्वानस्य रामस्य रावणेन हृतां  प्रियाम्।<br>सलक्ष्मणस्य दूतोऽहं दृष्टवानस्मि तामिमाम्॥62॥ |
| देवी त्वां देवदेवोऽसौ देवरश्च तवानघे।<br>कुशलं पृच्छतः प्रीतौ सत्यं दूतमुखेन हि॥63॥ |

एवंवक्तारमेनं विटपिविटपसंसङ्गिनं मङ्गलाङ्गं

पिङ्गं सौदामनीवद् धवळनिवसनं पद्मरागारुणास्यम्।

केशानुत्सार्य्य दोष्णा मुखविधुमशनैरुन्नमय्याऽकुलाक्षी

दृष्ट्या रामस्य दूतं सरणरणिकया सा मृगाक्षी ददर्श॥64॥

इति श्रीनारायणपण्डिताचार्य्य विरचिते रामाङ्के सङ्ग्रहरामायणे सुन्दरकाण्डे चतुर्थः सर्ग्गः ॥5-4-64॥

[आदितः श्लोकाः 2053+64=2117]

## पञ्चमः सर्ग्गः ॥5-5-53॥

एवं प्रियंवदं दृष्ट्वा द्रुमाग्रे विद्रुमाननम्।

तर्कयामास बहुधा तर्कज्ञा तनुमध्यमा॥1॥

हनुमानवतीर्य्याथ विनीतो नीतिमत्तमः।

प्रश्रयावनतः प्रोचे प्राञ्जलिः कञ्जलोचनाम्॥2॥

राक्षसीमध्यमापन्ना का त्वं त्रैलोक्यसुन्दरी।

कच्चिद् रामस्य पत्नी त्वं कच्चिन्नः सफलः श्रमः॥3॥

इत्युक्ता तरुणी सोचे विद्धि मां रामवल्लभाम्।

स्नुषां दशरथस्याङ्ग जनकस्य सुतामिति॥4॥

मातर्ल्लोकपिता रामः कुशलं त्वाऽनुपृच्छति।

प्राप्तो रामस्य दूतोऽहमिति मारुतिरब्रवीत्॥5॥

उपसृत्य ततस्तस्या हनुमान् भक्तिमत्तमः।

चरणावरुणाब्जाभौ धन्योऽस्मीत्यभ्यवन्दत॥6॥

किञ्चित् ततोऽपसर्प्पन्ती प्रोचे सा हरिणेक्षणा।

नूनं स रावणोऽसि त्वं हन्त रूपान्तरं गतः॥7॥

| |
|---|
| यदि रामस्य दूतोऽसि वद रामस्य लक्षणम्।<br>वार्त्तां चाऽर्त्तिच्छिदं तस्य पुण्यकीर्त्तेः प्रकीर्त्तय॥8॥ |
| आकर्ण्य जल्पितं तस्या वाक्यज्ञो वाक्यमब्रवीत्।<br>लक्षणं देवदेवस्य को वक्ताऽथापि सूच्यते॥9॥ |
| क्षमा क्षमां रविस्तेजः कामः कान्तिं वृषा यशः।<br>अन्ये चान्यान् गुणान् देवाः शिक्षन्ते प्रेक्ष्य राघवे॥10॥ |
| रामो हरिन्मणिश्यामः पद्माक्षः सिंहविक्रमः।<br>एवं लोकप्रवादोऽम्ब सत्यं तेऽनुपमः पतिः॥11॥ |
| एकरूपो द्विशुक्लोऽसौ त्रिसमस्त्रिषु चोन्नतः।<br>त्रिषु ताम्रस्त्रिषु स्निग्धस्त्रिवलीस्त्रिजगद्गुरुः॥12॥ |
| चतुष्कलश्चतुःकिष्कुश्चतूरेखश्चतुःसमः।<br>चतुर्ग्गतिश्चतुर्दंष्ट्रो चतुर्वेदोदितः प्रभुः॥13॥ |
| पञ्चस्निग्धोऽष्टवंशोऽसौ षड्गुणाढ्यः षडुन्नतः।<br>सप्तेशोऽष्टाक्षराख्यानो देवो नवनतो ध्रुवम्॥14॥ |
| बिम्बोष्ठः कम्बुकण्ठोऽयं सुन्दरो दुन्दुभिस्वनः।<br>गजराजगतिः स्वामी सोऽगण्यगुणवारिधिः॥15॥ |
| अनुरूपोऽनुजस्तस्य लक्ष्मणः शुभलक्षणः।<br>त्वां वनेषु विचिन्वानो देवरो देवि दूयते॥16॥ |
| ऋश्यमूकेऽभवत् ताभ्यां सङ्गमो मङ्गलाय नः।<br>मया सख्यं कृतं तत्र वानरेन्द्रनरेन्द्रयोः॥17॥ |

सुग्रीवाय ददौ राज्यं रामो हत्वाऽथ वालिनम्।
विचिन्वते चतुर्दिक्षु त्वां हरीन्द्रस्तदाज्ञया॥18॥

प्रभञ्जनादञ्जनायां जातोऽहं हनुमान् हरिः।
तीर्णार्णवो रामदूतः सत्यं प्राप्तोऽस्मि शोभने॥19॥

इत्युक्त्वा रामनामाङ्कं स प्रादादङ्गुलीयकम्।
जग्राह सानुरागं तद् रामा राममिवाऽऽगतम्॥20॥

प्रत्ययं प्राप्य सा प्रीता प्रत्यभाषत मारुतिम्।
वीरोऽसि रामदूतोऽसि प्राज्ञोऽसि त्वं हरीश्वर॥21॥

कच्चित् पालयते लोकान् रामः सौमित्रिणा सह।
कच्चिदेष्यति काकुत्स्थः कच्चिन्मां प्रतिनेष्यति॥22॥

द्वादशे किल मासे मां घ्नन्त्येते दशमो ह्ययम्।
विभीषणस्य कन्या मामनलेदं वचोऽब्रवीत्॥23॥

एवं ब्रुवन्ती करुणं विलपन्ती शुकालपा।
स्वामिन् राम प्रसीदेति प्ररुरोद पुनःपुनः॥24॥

हनुमान् प्राञ्जलिः प्रोचे पादयोर्देवि ते शपे।
क्षिप्रमेष्यति काकुत्स्थः सानुजः सकपिव्रजः॥25॥

दशाननो रामबाणैर्दशान्तं द्रुतमेष्यति।
निद्रावान् कुम्भकर्णोऽपि दीर्घनिद्रां गमिष्यति॥26॥

अपनेष्यत्यप्रियांस्ते रामस्त्वां नेष्यते द्रुतम्।
अथवाऽस्मिन् मुहूर्त्ते त्वां नयेयं रामसन्निधिम्॥27॥

इत्युक्तोवाच वामोरुः कथं मां नेष्यसे कपे।
अल्पस्त्वं राक्षसकुलाद् दुःसहादमरैरपि॥28॥

हसन् हनूमान् सङ्गृह्य रूपं हेमाद्रिसन्निभम्।
वज्रदंष्ट्रनखस्तां च ताम्रवक्त्रोऽभ्यभाषत॥29॥

उद्धरेयं धरामेनां क्षणेऽस्मिन्नब्धिमेखलाम्।
किमुताल्पीयसीं लङ्कां रामदासाग्रणीरहम्॥30॥

तिष्ठ मातर्म्मुहूर्तं मे पृष्ठे मन्दरसुन्दरे।
शतयोजनविस्तीर्णे रामं प्रेक्षिष्यसेऽधुना॥31॥

इत्युक्तोवाच तन्वङ्गी जाने ज्ञानं बलं च ते।
लङ्कां सपालां सञ्चूर्ण्य त्वं तु मां नेतुमीश्वरः॥32॥

किन्तु कान्तस्य मे कीर्त्तिः स्याद् दशास्यनिसूदनात्।
स्वयं ममाप्यहरणात् कथं वा मन्यते भवान्॥33॥

एकान्ते मम कान्तेन वायसस्याक्षितक्षणम्।
मद्दर्शने वदाभिज्ञां प्रणामं च निवेदय॥34॥

विश्वेश्वरो न चेदेनं रावणं मारयिष्यति।
मासात् पूर्वमिहाऽऽगत्य प्राणांस्त्यक्ष्यामि मारुते॥35॥

कुशलं कुशलाऽपृच्छ भ्रातरौ रामलक्ष्मणौ।
सुग्रीवमपि सामात्यं पन्थानः सन्तु ते शिवाः॥36॥

इत्युक्त्वा दिव्यमुद्दीप्रं ददौ चूडामणिं सती।
इमं देवाय देहीति चिह्नमैकान्तिकं निजम्॥37॥

| |
|---|
| चूडामणिं तं सङ्गृह्य प्रणम्योवाच पावनिः।<br>रावणारिं पतिं देवि त्वं द्रक्षस्यचिरादिति॥38॥ |
| पावनिः पर्वताकारः परिक्रम्य प्रणम्य ताम्।<br>ततः स्थलान्तरं प्राप्य कार्य्यशेषमचिन्तयत्॥39॥ |
| स्वदूतस्य निलीनत्वं न रामस्य यशस्करम्।<br>तस्मादाविर्भवन् शत्रून् हत्वा स्यां राघवार्चकः॥40॥ |
| इति सञ्चिन्त्य हनुमान् कोपयन् राक्षसेश्वरम्।<br>वनं विनाशयामास विना तं शिंशापतरुम्॥41॥ |
| निपात्योत्पत्य सञ्छिद्य विदार्य्योन्मूल्य च द्रुमान्।<br>मारुतिर्म्मारुतइव रावणोद्यानमक्षिणोत्॥42॥ |
| अघौघं रामनामेव पद्मषण्डमिव द्विपः।<br>तूलमग्निरिवाऽऽरामं रामदूतोऽक्षिणोत् क्षणात्॥43॥ |
| सिंहनादेन महता लङ्कामुत्कम्पयन् कपिः।<br>युद्धमद्भुतमन्विच्छन्नारुरोहाथ तोरणम्॥44॥ |
| उद्बुद्धास्तेन नादेन दृष्ट्वा तं पर्वतोपमम्।<br>राक्षस्यश्चकिताः साम्ना मायासीतामथाब्रुवन्॥45॥ |
| कान्ते कोऽयं कपिश्रेष्ठो यस्ते संवादगोचरः।<br>इत्युक्ता साऽवदत् तन्वी मायेयं रक्षसां ध्रुवम्॥46॥ |
| मयाविनां गतिं लोके जनन्त्येव हि मायिनः।<br>अहिरेव ह्यहेः पादान् विजानाति न चापरः॥47॥ |

इत्यस्या वचनं श्रुत्वा राक्षस्यो विद्रुता द्रुतम्।
न्यवेदयन्नुदन्तं तं लङ्कापालाय शङ्किताः॥48॥

तदाकर्ण्य भृशं क्रुद्धो रावणोऽथ समादिशत्।
अवध्यान् शङ्करवरात् किङ्करान् नाम राक्षसान्॥49॥

साशीतिकोटियूथेशं सपुरोगाष्टकायुतम्।
आववार हरिं वीरं तद् बलं लोकभीषणम्॥50॥

रक्षोजीमूतसङ्घानामूर्जितानां प्रगर्जताम्।
नानाहेतिमयैर्वर्षैर्नाचलद् वानराचलः॥51॥

आविध्य भुवि लाङ्गूलं तिर्य्यक् सम्प्रेक्ष्य राक्षसान्।
स्फुटमास्फोट्य हनुमानुच्चैरेवमुदाहरत्॥43॥

स्वामी रामो जयति जगति श्रीधरोऽनन्तवीर्य्य-
स्तं सौमित्रिः प्लवगवृषभश्चानुवृत्तौ सुवृत्तौ।
सीतां नत्वा रणमुखमितो नन्वहं रामदूतो
नालन्नालं मुहुरहह मे रावणानां सहस्रम्॥53॥

इति श्रीनारायणपण्डिताचार्य्यविरचिते रामाङ्के सङ्ग्रहरामायणे सुन्दरकाण्डे पञ्चमः सर्गः ॥5-5-53॥
[आदितः श्लोकाः 2117+53=2170]

## षष्ठः सर्गः ॥5-6-69॥

वाणीति वाणीपतिनन्दनस्य व्यक्तं चचारानुसभं सुराणाम्।
वियद् भजेयुः कथमन्यथा ते वैमानिका युद्धदिदृक्षयाऽत्र॥1॥

तळाप्रहारेण बहून् निहत्य स तोरणस्थं परिघं दधद् द्राक्।
शिष्टानशिष्टांश्च निहत्य तेन प्रासादमासाद्य मुहुर्ज्जगर्ज॥2॥

| |
|---|
| स्तम्भं च तत्रोदहरद्धनूमान् स चैत्यपालांश्च जघान तेन।<br>प्रासादमप्यम्बरगो ददाह स्तम्भानलेनायमुवाच चोच्चैः॥3॥ |
| यं मादृशानां भजते सहस्रं रामः स सुग्रीवगुरुः पतिर्म्मे।<br>कण्डूतिचण्डो मम बाहुदण्डो विजृम्भते वैरिणमाह्वयामि॥4॥ |
| प्रगर्ज्जतीत्थं हनुमत्युदारे प्रहस्तपुत्रप्रमुखान् प्रचण्डान्।<br>सप्ताऽऽदिशत् सप्तशिखोपमानान् स मन्त्रिपुत्रान् कुपितो दशास्यः॥5॥ |
| प्रहस्तपुत्रस्त्वथ जम्बुमाली प्राभाञ्जनिं प्राप्य सुवर्णमाली।<br>ववर्ष बाणान् खरयुक्तयानः शिलां विशालां हनुमान् मुमोच॥6॥ |
| शरैः शिलायां शकलीकृतायां साले च मुक्ते रिपुणा निकृत्ते।<br>तेनैव वीरः परिघेण पापं सञ्चूर्णयामास सयानमेनम्॥7॥ |
| रणोत्कटान् मन्त्रिसुतानवाप्तानन्यान् ससैन्यान् न्यहनद्धनूमान्।<br>तळेन कांश्चिच्चरणेन कांस्चिदन्यान् नखैः कांश्चन नादमात्रात्॥8॥ |
| सञ्चिन्त्य किञ्चित् स निशाचरेशो दुर्द्धर्षयूपाक्षविरूपपूर्वान्।<br>सभासकर्ण्णप्रघसानुवाच सेनाग्रनेतॄनिति पञ्च वीरान्॥9॥ |
| स्युर्वालिसुग्रीवमुखाः कपीन्द्रा लोकाधिका नेदृशविक्रमास्ते।<br>इदं महद् भूतमहो क्षयायप्राप्तं हि नः सम्प्रति गृह्यतां तत्॥10॥ |
| इतीरितास्ते चतुरङ्गिणीं स्वां चमूमुपानीय रणाय याताः।<br>परीत्य दीप्ते पवमानसूनौ शरान् निशातानकिरन् कराळाः॥11॥ |
| निर्घातवद् घोरतरोऽतिघोषः पतन् हनूमान् गगनाच्चकाशे।<br>दुर्द्धर्षदेहेऽथ महानगाभः स पिष्टफेनोपमतां जगाम॥12॥ |

| |
|---|
| क्रुद्धो विरूपाक्ष इमं युयोध यूपाक्षनामाऽप्यथ मुद्गरेण।<br>सालेन सञ्चूर्ण्णितवान् हनूमान् तौ पांसुपिण्डाविव पाण्डुकीर्त्तिः॥13॥ |
| तं भासकर्ण्णः शितशूलशाली सपट्टसश्च प्रघसोऽभियातौ।<br>तौ द्वौ च पञ्चत्वमहो निनाय महाद्रिश्रृङ्गेण महाबलौऽसौ॥14॥ |
| गजैर्ग्गजेन्द्रांस्तुरगैस्तुरङ्गान् रथै रथानेष भटैर्भटांश्च।<br>अपातयत् कर्म्मसु लाघवाज्ञो विना शिलासालनिमार्ग्गणेन॥15॥ |
| तृतीयमंशं स्वपताकिनीनां विज्ञाय भग्नं कपिपुङ्गवेन।<br>स विंशदक्षः सकलाक्षिभिश्च कुमारमक्षं स्थितमैक्षताथ॥16॥ |
| पितुर्न्नियोगं चतुरः स विद्वान् बालार्क्कभासं रथमारुरोह।<br>धनुर्द्धरं वीरवरं प्रयान्तं तमन्वगच्छन् पृतना असङ्ख्याः॥17॥ |
| क्रोधारुणाक्षः कपिमैक्षताक्षो विष्फारयन् कार्म्मुकमुग्रकर्म्मा।<br>स तोरणस्थस्तरुणार्क्कवक्रस्तूर्ण्णं नदन्नम्बरमाललम्बे॥18॥ |
| आकाशमार्ग्गानवकाशहीनांश्चक्रे शरै रावणिरद्भुतं तत्।<br>ततोऽद्भुतं तत्र चरन्नसङ्गः स वायुवद् युसुतोऽक्षतोऽपतत्॥19॥ |
| न रावणी रावणतोऽयमूनो हन्यामिमं मन्युबलप्रचण्डम्।<br>अलं हि लीलाभिरमूभिरित्थं विचिन्त्य वीरोऽभ्यपतद् विपक्षम्॥20॥ |
| रथं रिपोश्चक्रमिव भ्रमन्तं नभश्चरं प्राप्य नभश्चरोऽसौ।<br>सुरासुरोभेध्यमथो बिभेद् तळेन तुङ्गांश्च तुरङ्गमांस्तान्॥21॥ |
| विहाय यानं च विहायसीमं कृपाणपाणिं कृतिनं चरन्तम्।<br>निशाचरेन्द्रं जगृहे हरीन्द्रो विहङ्गभर्त्तेव भुजङ्गमेन्द्रम्॥22॥ |

| |
|---|
| पादाग्रयोस्तं परिगृह्य तूर्णं सहस्रकृत्वः परिवर्त्य चण्डः।<br>मुमोच भूमौ सहसा कुमारं मुमोच देहं सहसा कुमारः॥23॥ |
| अपूर्वमोदोऽजनि देवसङ्घे सत्पुष्पवर्षो हनुमत्यपूर्वः।<br>अपूर्वशोको दशकन्धरेऽलं लङ्कालयेऽपूर्वतरो विलापः॥24॥ |
| सशोककोपः पिशिताशनेशः समादिदेशेन्द्रजितं रणाय।<br>महेन्द्रशत्रो स महाप्लवङ्गो निगृह्यतामाशु सुत त्वयेति॥25॥ |
| स व्याळयुक्तेन रथोत्तमेन दिव्येन दिव्यास्त्रविदां प्रबर्हः।<br>सबाणबाणासनपाणिरुग्रस्तूर्णं महान्तं हनुमन्तमाप॥26॥ |
| तं मेघनादं स समुद्रनादो विलोक्य भूयो ववृधे हनूमान्।<br>शरानसङ्ख्यान् स ववर्ष यावत् तावद्धरिस्तोरणतः खमाप॥27॥ |
| न पक्षिपक्ष्मस्वपि यस्य बाणा लक्षच्युता जात्वपि शक्रशत्रोः।<br>तस्येषवः खं परिपूरयन्तः सर्वे हनूमत्यभवन् विलक्षाः॥28॥ |
| तं वञ्चयन्तं सकलांश्च बाणानभ्युत्पतन्तं च भुजौ प्रसार्य्य।<br>प्रक्रीडितं प्रेक्ष्य कपिप्रवीरं चिन्तामनन्तां प्रययौ सुरारिः॥29॥ |
| अवध्यमेनं भुवनेष्ववेद्यं पितामहास्त्रेण वशीकरोमि।<br>इत्थं स निर्धार्य्य महामनस्वी ब्रह्मास्त्रमस्मै सहसा मुमोच॥30॥ |
| विष्णोः प्रसादात् सकलास्त्रतेजो न मां स्पृशेदेवमपीह बद्धः।<br>द्रक्ष्यामि वक्ष्यामि च रावणं तमिति स्मरन्नस्त्रवशोऽभवत् सः॥31॥ |
| स राक्षसैस्तैः शणचीरबद्धः सभां प्रणीतः प्रतिभर्त्सितश्च।<br>राज्ञः पुरास्तान्निहितोऽखिलं च शक्तोऽपि सेहे निजकार्य्यसिद्ध्यै॥32॥ |

| |
|---|
| कस्त्वं कपे त्वं कुत आगतोऽसि कस्यासि दूतोऽपकृतं किमर्थम्।<br>इत्थं दशास्येन स पृच्छ्यमानः प्रणम्यरामं हनुमानुवाच॥33॥ |
| जातिस्वभावो वनलोपनं तत् क्षमस्व राजन् फलजीविनां नः।<br>जिघांसयाऽभ्यापततः क एव जिजीविषुर्न्न क्षपयेत् प्रभुश्चेत्॥34॥ |
| न ब्रह्ममस्त्रं मम बन्धकं स्यान्मा कौतुकं ते सुतविक्रमे स्यात्।<br>मां रामदूतं मरुतस्तनूजं विद्धि स्वयं त्रष्टुमुपागतं त्वाम्॥35॥ |
| कृपाकरः क्षाम्यति चौर्य्यमार्य्यः प्रणम्य देवी प्रतिदीयते चेत्।<br>न चेद् द्रुतं द्रक्ष्यसि राघवौ तौ तं चातिवीरं कपियूथनाथम्॥36॥ |
| रामोषुरेकः ससुरासुरादीन् संहर्त्तुमीष्टे सकलांश्च लोकान्।<br>त्वामल्पसारं किमुताल्पबुद्धे मा विग्रहो भूच्छरणं व्रजैनम्॥37॥ |
| शक्तोऽप्यहं त्वां सबलं न हन्यां भूम्नःस्वयं शत्रुवदे यशः स्यात्।<br>एवं ब्रुवाणे पवमानसूनावाज्ञापयत् तस्य वधं दशास्यः॥38॥ |
| राज्ञोन दूतस्य वधः प्रशस्तः पुच्छं कपेरस्य दहाम शीघ्रम्।<br>विभीषणेनेत्यभिभाषितोऽसौ तत्पुच्छमच्छं किल दग्धुमैच्छत्॥39॥ |
| राजाज्ञया पुच्छममुष्य वस्त्रैः संवेष्टितं संववृधेऽतिमात्रम्।<br>यत्नेन संवेष्ट्य निशाचरेन्द्रास्तत्राग्निमुच्चैरुददीपयंस्ते॥40॥ |
| पुनःपुनस्तैः पुरि नीयमानः सम्प्रीयते स्मैष पुरीं दिधक्षुः।<br>ज्वलंश्च नैनं ज्वलनो ददाह मरुत्स्वरूपं हि मरुत्सखत्वात्॥41॥ |
| स शैलसङ्काशशरीर आसीत् क्षणाद् बिलाळाप्रतनुश्च पश्चात्।<br>बन्धाद् विमुक्तोऽथ च पर्वताभो योगीश्वरस्तच्च पुरं ददाह॥42॥ |

स तोरणस्थं परिघं गृहीत्वा तान् रक्षिणस्तेन निहत्य सर्वान्।
लङ्कां सभागोपुरसौधसद्मराजावरोधादिमतीं ददाह॥43॥

जज्वाल तत्र ज्वलनोऽतिमात्रं जज्वाल तस्माद् द्विगुणं हनूमान्।
सर्वत्र चैकक्षण एव दृष्टः स विश्वरूपत्वमवाप नूनम्॥44॥

आक्रन्दनैः सन्दहनैर्निपातैर्विलोठनाद्यैर्भयदुःखपूर्णैः।
हनूमता दण्डधरेण दग्धा लङ्का न रेजे नरकोपमाना॥45॥

वितानकर्म्मेत्थमिदं विधाय नदाधिराजेऽवभृथं च कृत्वा।
समर्प्पयामास समर्प्पणीयं रामाय तन्मारुतियायजूकः॥46॥

दग्धा पुरी मारुतिना समस्ता सीतान्विता नैव च शिंशपा सा।
स्याद् विक्रमो नीतियुतः प्रभूणां श्रुत्वेत्युषीणां स वचोऽभ्यनन्दत्॥

शीतो भवाग्ने मरुतः सुते त्वं प्रागेव हीत्याशिषमुक्तवत्यै।
संसान्त्वितायै सरमावचोभिर्न्ननाम तस्यै हनुमान् यियासुः॥48॥

क्षिप्रं समागच्छतु देव इत्थं तयोदितो बाढमिति प्रणम्य।
गिरीन्द्रमारुह्य गिरिप्रकाशास्तितीर्षुरब्धिं ववृधे पुरेव॥49॥

धराधरं तं धरया समानं कुर्वन् पदाभ्यामवपीडनेन।
उत्पत्य नित्यद्युतिमान् हनूमानमेयधामा जलधिं ततार॥50॥

आशा विशाला हरितीव दोर्भ्यामूर्ध्वाण्डमुत्खण्डयतीव मूर्द्ध्ना।
पुराऽन्यतेजः पिबतीव भासा श्रीमान् हनूमानधिकं रराज॥51॥

कपीन्द्रचन्द्रे गगनं गतेऽस्मिन् वीचीव वाणी मम वर्धतेऽलम्।
तां ग्रन्थबाहुल्यभयान्मनीषा स्थैर्य्येण वेलेव नियच्छतीयम्॥52॥

पारस्थले सन्निहिते ननाद स्वज्ञातिवर्ग्गान् प्रतिहर्षयन् सः।
दीना निराशाः पतिताः कपीन्द्रास्ते तेन नादेन ननन्दुरुच्चैः ॥53॥

व्यक्तं हनूमान् स ददर्श सीतां मानी न गर्ज्जेदकृतार्त्थ इत्थम्।
ब्रह्मात्मजोक्ताः कपयः प्रहृष्टा नगेषु पेत्तुर्न्ननृतुर्ज्जगुश्च॥54॥

अथावतीर्ण्णं परिपूर्णमेनमवेक्ष्य माहेन्द्रमहीधरेन्द्रे।
उपायनैर्म्मूलफलैः सुपुष्पैरभ्यर्च्य सर्वेऽपि ववन्दिरे ते॥55॥

दृष्टा मया राघववल्लभेति निशम्य वायोस्तनयस्य वाणीम्।
हृष्टं कपीनां कुलमुज्जगर्ज्ज प्रत्युत्पपातालमुदग्रपुच्छम्॥56॥

पिङ्गेक्षणैरङ्गदशम्भुजाद्यैः पृष्टः पुनश्छाधिकविस्तरेण।
उदन्तमाद्यन्तयुतं निवेद्य प्रशस्यते स्म श्वसनस्य सूनुः॥57॥

आलोच्य ते कार्य्यमथाऽर्य्यवर्य्या निश्चित्य सर्वं हनुमन्मतेन।
आशामुदीचीं प्रययुस्तरन्तो नानानगाळीर्न्नगरीर्न्नदीश्च॥58॥

सम्प्राप्य राज्ञो मधुमद् वनं ते ययाचिरे तत्र मधूनि लोलाः।
श्लाघ्यं हनूमन्तमथाङ्गदं च तयोर्न्नियोगेन पपुर्य्यथेष्टम्॥59॥

क्रुद्धोऽतिमात्रं वनपालनाथो यो मातुलः सूर्य्यसुतस्य राज्ञः।
अभ्याद्रवत् तान् मधुपानमत्तान् सालं दधानः सहितः स्वदासैः॥60॥

अप्यार्य्यकं तं मधुमत्तचित्तस्तत्राङ्गदो भूमितळे पिपेष।
परे परान् जानुभिराक्षिपन् द्राक् ते देवमार्ग्गं प्रतिदर्शयन्तः॥61॥

मुहूर्त्तमार्त्तः प्रतिलभ्य सञ्ज्ञां सह स्वभृत्यैरुपगम्य तूर्णम्।
सुग्रीवमावेदयति स्म वृत्तं तन्मातुलो राघवसन्निधाने॥62॥

राजा तदा मधुवनस्य विलोळनं तच्छ्रुत्वा मुद दधिमुखाद् रघुनाथमूचे।
सीता ध्रुवं हनुमता ददृशे मधूनि तस्मात् पिबन्ति कृतकृत्यधियस्त एवम्॥ 63॥

आनन्दी दिनकरनन्दनः कपीन्द्रानानेतुं दधिमुखमादिशद् द्रुतं तान्।
प्राप्तस्तान् स मधुवने प्रणम्य चोचे राजा वः सपदि दिदृक्षते मुदेति॥ 64॥

आयान्तो वियति घनाघनायमानाः सम्मोदात् सकिलकिलारवाः किलैते।
सम्प्राप्ता रविसुतसेवितं रमेशं सन्नेमुः सह महता हनूमताऽथ॥ 65॥

दृष्टा सा जनकसुतेति वाक्यमात्रात् सन्तुष्टे सरविजलक्ष्मणे रमेशे।
प्रोचेऽसौ पवनसुतोऽखिलं च वृत्तं सन्देशानपि विशादाञ्छुकालपायाः॥ 66॥

कान्तायास्तिलकविधिं मनःशिलायाः काकाक्षिक्षतिमपि चित्रकूट ऊचे।
तं चूडामणिमपि दत्तवान् हनूमान् सोऽभिज्ञा इति विदधेऽखिलज्ञापार्श्वे॥ 67॥

निर्दुःखः परमसुखानुभूतिरेको रामोऽयं जगति तथैव रामरामा।
वेदायं पवनसुतोऽपि तत्वतस्तावप्येवं व्यधुरधिकं विडम्बनं ते॥ 68॥

जातां सेवासमुद्रात् स्वपदसरसिजे स्वर्पितां स्वप्रकाशां
निर्दोषामर्घहीनां जगति हनुमतो भक्तिमाणिक्यमालाम्।
दृष्टा तस्मै प्रदातुं सकलमसदृशं चिन्तयन् रामदेवः
प्रादादात्मानमेव प्रमदमहपरिष्वङ्गलीलाच्छलेन॥ 69॥

इति श्रीनारायणपण्डिताचार्य्यविरचिते रामाङ्के सङ्ग्रहरामायणे
सुन्दरकाण्डे षष्ठः सर्गः॥ [आदितः श्लोकाः 2170+69=2239]

**इति सुन्दरकाण्ड समाप्तम् [सुन्दरकाण्डे श्लोकः = 330]**

# युद्ध खाण्डम् ॥6-16॥

## प्रथमः सर्गः ॥6-1-53॥

| |
|---|
| वाणीं श्रुत्वा हनुमतो वाचमाचष्ट राघवः।<br>कुर्वन् प्रसादसामग्रीं निर्व्याजां सर्वतोऽधिकाम्॥1॥ |
| पौरुषे पुरुषः कोऽन्यो विद्यते हनुमत्समः।<br>रावणं यस्तृणीचक्रे सिन्धुमुल्लङ्घ्य लीलया॥2॥ |
| इत्युक्त्वा सह सम्मन्त्र्य भगवान् सूर्य्यसूनुना।<br>कपीनां लङ्घनोपायं निश्चिक्ये सेतुमम्बुधौ॥3॥ |
| लङ्कापुरस्य दुर्ग्गत्वं राक्षसानां च तद् बलम्।<br>उक्तं श्रुत्वा हनुमता रामः स्मितमुखोऽब्रवीत्॥4॥ |
| समूलतूलं धक्ष्यामि राक्षसारण्यमुद्धणम्।<br>उत्तरा फल्गुनी ह्यद्य मद्ध्याह्ने गमनं शुभम्॥5॥ |
| राम उक्त्वेति रविजमारुरोहाथ मारुतिम्।<br>निशाचरध्वान्तभिदे सवितेवोदयाचलम्॥6॥ |
| आरुरोह च सौमित्रिरङ्गदं कनकाङ्गदम्।<br>रामसुग्रीवयोर्वाक्यात् सर्वसैन्यानि निर्य्ययुः॥7॥ |
| नीलः सेनापतिः सेनामाकर्षन्नग्रतो ययौ।<br>पार्श्वयोर्य्यूथनाथावप्यृषभो गन्धमादनः॥8॥ |
| सुषेणजाम्बवत्पूर्वा रक्षन्तः कुक्षिमव्रजन्।<br>सुग्रीवसौमित्रियुतः सेनामद्ध्ये ययौ प्रभुः॥9॥ |

| |
|---|
| पनसाद्या वानरेन्द्रा रामसुग्रीवशासनात्।<br>पर्य्यगुश्चवच्चक्रं परितः परिपालकाः॥10॥ |
| जीमूताइव गर्ज्जन्तः सपक्षाः पर्वताइव।<br>रामदासाः कपीन्द्रास्ते रेजिरे गमनोत्सवे॥11॥ |
| अदन्तः फलमूलानि पिबन्तो मधुरं मधु।<br>गायन्तो राघवगुणान् स्वैरं यान्ति स्म वानराः॥12॥ |
| रामाज्ञावेलया रुद्धः कपिसैन्यमहार्ण्णवः।<br>पुरग्रामव्रजादीनि क्षुभितो नातिचक्रमे॥13॥ |
| दक्षिणः स दिशं गच्छन् दक्षिणां लक्ष्मणाग्रजः।<br>विन्ध्यं सह्यं चाभ्यागच्छन्मलयं च महीधरम्॥14॥ |
| महेन्द्रवन्द्यो माहेन्द्रमधिरुह्य महीधरम्।<br>प्रत्यनीकमिवापश्यद् वारिधिं सैन्यवारिधेः॥15॥ |
| वेलां विशालामापेदे माहेन्द्रादवरुह्य सः।<br>सेनायास्तत्र सेनान्या रामो वासमकल्पयत्॥16॥ |
| प्रार्त्थयन् किलपन्थानं सिन्धुं सिन्धुशयस्ततः।<br>विश्वेश्वरोऽपि भगवान् मार्द्दवं धर्म्ममाश्रितः॥17॥ |
| अशेतानन्तशयनो वेलायां दर्भसंस्तरे।<br>भुजं भुजङ्गभोगाभमुपधायाथ दक्षिणम्॥18॥ |
| तादृशं हनुमद्वीर्य्यं वीक्ष्य राक्षसपुङ्गवः।<br>सभायां मन्त्रिणां मध्ये चिन्ताक्रान्तोऽब्रवीदिदम्॥19॥ |

| |
|---|
| दृष्टं हि तस्य वीरस्य कपेः पौरुषमद्भुतम्।<br>किं वर्ण्णयामो रामस्य यस्यायं किङ्करः किल॥20॥ |
| शोषयन् स्तम्भयन् वाऽपि सिन्धुं सीतापतिस्तरेत्।<br>लङ्कायाः सङ्कटं कुर्य्यात् तत्र नीतिर्विधीयताम्॥21॥ |
| इत्युक्ते रावणेनोचे प्राञ्जलिः स विभीषणः।<br>रामायानन्तवीर्य्याय वैदेही दीयतामिति॥22॥ |
| क ईश्वरः को विजयी मां विना जगदीश्वरम्।<br>बालिशैः प्रोच्यते किं नो इत्युच्चै रावणोऽब्रवीत्॥23॥ |
| तं प्रहस्तप्रभृतयः सुपार्श्वाद्यास्तथाऽपरे।<br>उच्चैरास्फोट्य गर्ज्जन्तो राजानमिदमब्रुवन्॥24॥ |
| लोकपालान् सलोकांस्त्वमिन्द्रादीन् जितवान् ननु।<br>रामः किल भयस्थानं मानवस्तापसस्तव॥25॥ |
| वानराः किं नराहारानस्मान् कुर्य्युः फलाशिनः।<br>कथञ्चिज्जीवता यातं कपिना तेन भूयसा॥26॥ |
| त्वद्भ्रूविभ्रममात्रेण विभ्रान्तं भुवनत्रयम्।<br>कथं तापसपत्नीं त्वं बलाद् राजन् न भोक्ष्यसे॥27॥ |
| मन्त्रिणां वाक्यमाकर्ण्य सस्मितं रावणोऽब्रवीत्।<br>सत्यमेवमिदं किन्तु गोप्यं किञ्चिद् वदामि वः॥28॥ |
| मया बलेनोपभुक्ता मञ्जुला पुञ्जिकस्थला।<br>पितामहो लोकहितं तदा शापमदाद्धि मे॥29॥ |

| |
|---|
| बलाच्चेद् भोक्ष्यसे काश्चिच्छिरः शीर्य्येत ते तदा।<br>शापोऽयं ननु सीतायाः पातिव्रत्यैकपालकः॥30॥ |
| मद्बाहुवननिर्य्यातान् पत्रिणः प्राणहारिणः।<br>न नूनं वेत्ति रामोऽसौ तेन मां प्रति गर्ज्जति॥31॥ |
| कुम्भकर्णेन्द्रजित्पूर्वेष्वेकैकोऽलं रिपोर्वधे।<br>न मे दोर्द्दण्डकण्डूतिं विधिर्न्नूनं विनाशयेत्॥32॥ |
| इत्थं विकत्थनं श्रुत्वा शुद्धबुद्धिर्विभीषणः।<br>आह स्म प्रहसन् वाक्यमुदारं हितमच्छलम्॥33॥ |
| अतार्क्किकानशास्त्रज्ञानवृद्धोपासकान् खलान्।<br>मुखरान् केवलं मूर्खान् वर्ज्जयेन्मन्त्रमण्टपे॥34॥ |
| विनीतान् नीतिसम्पन्नान् धर्म्माधर्म्मविचक्षणान्।<br>पूर्वापरज्ञान् पुरुषान् मन्त्रिणः प्रतिमन्त्रयेत्॥35॥ |
| सिद्ध्युपायगुणाङ्गानि न ये शक्त्युदयान् विदुः।<br>न तैर्म्मन्त्रविधिं कुर्य्यात् षण्डैरिव रतिं बुधः॥36॥ |
| मन्त्रिदोषा अशेषाश्च राजन् त्वन्मन्त्रिषु स्थिताः।<br>गुणं नैकं च पश्यामि मन्ये ते भयमागतम्॥37॥ |
| पुलस्त्यस्यान्वये जातस्त्वं श्रुतिस्मृतिपारगः।<br>परदारपरामर्शं न कुर्य्या लोकनिन्दितम्॥38॥ |
| यदि त्रैलोक्यजैत्रं त्वमात्मानं मन्यसे प्रभो।<br>कुसुमास्त्रमिमं देवं जय मृत्युं तवाऽऽगतम्॥39॥ |

| |
|---|
| शिरीषमालामृदुलां यां त्वं कामयसे सतीम्।<br>व्याळीं कराळीं तां विद्धि सुप्तां केनापि हेतुना॥40॥ |
| अलं विरुध्य रामेण प्रणतेषु कृपालुना।<br>राजन् बद्धोऽञ्जलिस्तुभ्यं देवी देवाय दीयताम्॥41॥ |
| बान्धवाः सन्त्यजेयुस्त्वामधर्म्मेण विनश्वरम्।<br>तस्मादधर्म्मं निर्द्धूय देवी देवाय दीयताम्॥42॥ |
| रामप्रसादप्रसरः सर्वासां सम्पदां पदम्।<br>तस्मै त्रैलोक्यनाथाय देवी देवाय दीयताम्॥43॥ |
| यावन्न रामसूर्य्यस्य गावः सत्पद्मबन्धवः।<br>हन्यू रक्षस्तमस्तावद् देवी देवाय दीयताम्॥44॥ |
| न भयान्न च कार्प्पण्यान्न डम्भान्न च मोहतः।<br>मयेदमुदितं राजंस्तव पत्थ्यं श्रृणोषि चेत्॥45॥ |
| विभीषणेनैवमुक्ते क्रुद्धः प्रोवाच शक्रजित्।<br>अस्मान् महेन्द्रजयिनो मानवः किं जयेदिति॥46॥ |
| बालोऽयं बालिशो राजन् वद्ध्यस्ते कार्य्यदूषणः।<br>व्रजाम शरणं राममित्युवाच विभीषणः॥47॥ |
| मित्रवेषममित्रं त्वां नित्यं वेद्मि विभीषण। |
| अन्यं चेत् त्वादृशं हन्यामित्युवाचाथ रावणः॥48॥ |
| मृषितं पुरुषं वाक्यं ज्येष्ठत्वात् तव रावण।<br>स्वस्ति तेऽस्तु गमिष्यामीत्युक्त्वोत्तस्थौ विभीषणः॥49॥ |

चतुर्भिः सचिवैः सार्द्धं चतुरैः स गदाधरः।
मुहूर्त्तेनाम्बरचरो रामपार्श्वमुपाययौ॥ 50॥

प्रकाशमान आकाशे सम्रब्धान् प्रेक्ष्य वानरान्।
मेघगम्भीरनिर्घोषो बभाषे स विभीषणः॥ 51॥

रावणस्यानुजं प्राप्तं रावणेनावमानितम्।
रामभक्त इति त्यक्तं मां मन्यध्वं हरीश्वराः॥ 52॥

भवभयवनवह्निभर्जितानां निरुपधिभक्तिरसामृताब्धिभाजाम्।
शरणमशरणो व्रजामि रामं शरणमहं करुणाकरं मुकुन्दम्॥ 53॥

इति श्रीनारायणपण्डिताचार्य्यविरचिते रामाङ्के सङ्ग्रहरामायणे युद्धकाण्डे प्रथमः सर्गः॥6-1-53॥

[आदितः श्लोकाः 2239+53=2292]

## द्वितीयः सर्गः ॥6-2-61॥

इति ब्रुवाणे पौलस्त्ये सूर्य्यसूनुरमर्षितः।
अश्रद्दधानस्तद्वाक्यं प्राप्य राममभाषत॥ 1॥

रावणस्यानुजो नाथ शरणं त्वां किलाऽगतः।
मायिनां रक्षसामेतां मायां मन्ये स बद्ध्यताम्॥ 2॥

कपिराजोदितं श्रुत्वा कपीनाभाष्य राघवः।
ब्रुवन्तु सचिवाः सर्वे नीतिं स्वामित्यभाषत॥ 3॥

किमस्त्यविदितं देव त्रैलोक्ये सचराचरे।
वक्ष्यामोऽथ नियोगात् त इत्युक्त्वा ते बभाषिरे॥ 4॥

| |
|---|
| विपक्षवर्ग्गनिर्म्मुक्ताः सस्नेहाः सफला अपि।<br>शराइव निकृन्तेयुरिति तत्राङ्गदोऽब्रवीत्॥5॥ |
| स्नेहवांश्चापरिचितः परीक्ष्यो नाऽऽशु गृह्यताम्।<br>गृहीतो विषवद्धन्यादिति तं शरभोऽब्रवीत्॥6॥ |
| देशकालस्वजातीनां दोषाच्छङ्क्यो हि राक्षसः।<br>मन्ये परीक्ष्य एवेति जाम्बवान् व्यक्तमब्रवीत्॥7॥ |
| आकारैरिङ्गितैर्वाक्यैः सोऽश्रद्धेयः परीक्ष्यताम्।<br>औषधैरामयो यद्वदिति मैन्दोऽभ्यभाषत॥8॥ |
| नीलतारादिभिर्न्निन्त्या निन्द्यमाने विभीषणे।<br>प्रतिभाजृम्भितं वाक्यं हनूमान् राममब्रवीत्॥9॥ |
| हेयभागाच्च गृह्णन्ति सारं सारविदो जनाः।<br>सानुरागमवित्रस्तं मणिं फणिकुलादिव॥10॥ |
| अपरीक्ष्यापरिचितं सारं गृह्णाति सारवित्।<br>तत्रोदाहरणं गृह्णन् पौष्पं मधुकरो मधु॥11॥ |
| देशकालादिदुष्टोऽपि सारः सारेण शुद्ध्यति।<br>नानामलेन मलिनं शुद्धं हेमेव वह्निना॥12॥ |
| अतिमात्रं परीक्षाभिः प्रसन्नः कलुषीभवेत्।<br>प्रकतिं च त्यजेद् यद्वद् विमलः कमलाकरः॥13॥ |
| अपि नीतिमतां नीतिं नाहं मानद मानये।<br>सचिवानाममीषां ते मम तावन्मतं श्रृणु॥14॥ |

ऋजुः परपरित्यक्तो धार्म्मिकः शरणागतः।
सर्वलोकशरण्येन त्वया ग्राह्यो विभीषणः॥15॥

वीर्य्यौदार्य्यं तव ज्ञात्वा राक्षसानां च सङ्क्षयम्।
साम्राज्यं भोक्तुमाप्तोऽयं पादोपान्तं तव प्रभो॥16॥

भ्रातृव्यं भ्रातरं हत्वा राज्यमस्मै प्रदीयताम्।
अनुरक्ताय दासाय सुग्रीवाय यथा पुरा॥17॥

इति तन्मारुतेर्वाक्यं लाळयन्नब्रवीत् प्रभुः।
मन्मतप्रतिबिम्बं तन्मतं साधु हनूमतः॥18॥

अपरोक्षं परोक्षं वा शरणं मामुपागतम्।
शत्रुं मित्रमथान्यं वा पालयेयेति मे व्रतम्॥19॥

न मे भयं राक्षसतो यद्ययं छद्मसौहृदः।
मदङ्गुलिं चालयितुं नालं सर्वे सुरासुराः॥20॥

अवगच्छामि च स्वच्छं मम भक्तं विभीषणम्।
इत्युक्त्वा वानरैरेनमाह्वयद् भक्तवत्सलः॥21॥

आयुधानि नगे न्यस्य शान्तं रूपान्तरं गतः।
ननाम रामपादाब्जे सह भृत्यैर्विभीषणः॥22॥

रावणं सगणं हत्वा देवविप्रापराधिनम्।
प्राज्यं राक्षसराज्यं ते दास्यामीत्यब्रवीत् प्रभुः॥23॥

दास्यं ते दुर्लभं प्राप्तं कैवल्यस्यैककारणम्।
योत्स्यामि राक्षसान् घोरानित्युवाच विभीषणः॥24॥

| |
|---|
| लक्ष्मणेनाऽऽहृतेनाथ रामो वारिधिवारिणा।<br>लङ्काधिपतिरित्युच्चैरभ्यषिञ्चद् विभीषणम्॥25॥ |
| कपिराजेन सम्पृष्टो निजगाद् विभीषणः।<br>समुद्रतरणोपायं सेतुबन्धं महामतिः॥26॥ |
| दृष्ट्वा कपीन्द्रसैन्यं तच्छार्दूलो नाम राक्षसः।<br>रावणस्य चरो गत्वा रावणाय न्यवेदयत्॥27॥ |
| ध्यात्वा मुहूर्त्तं निश्वस्य सम्भ्रान्तः स दशाननः।<br>शुकं दूतं कपीन्द्राय प्रेषयामास सत्वरः॥28॥ |
| शुको विहङ्गमो भूत्वा निस्तीर्य्य लवणार्णवम्।<br>स्थितो वियति सुग्रीवं रावणस्य वचोऽब्रवीत्॥29॥ |
| नरेन्द्रस्याहरं भार्य्यां वानरेन्द्र कृतागसः।<br>भवान् मे भ्रातृदेशीयो विरोधं कुरुते कुतः॥30॥ |
| सुरासुरैरप्रधृष्या लङ्का वानरदुर्ग्गमा।<br>तस्मात् ते विग्रहो मा भूत् किष्किन्धां कुशली व्रज॥31॥ |
| इति ब्रुवाणं तं दृष्ट्वा कपीन्द्रा अङ्गदादयः।<br>खमुत्पत्य निपात्याधः पक्षं तस्योदमूलयन्॥32॥ |
| लोड्यमानो धरापृष्ठे ताड्यमानश्च वानरैः।<br>हा राम राजधर्म्मज्ञ दूतं पाहीति सोऽरुदत्॥33॥ |
| न दूतश्चोर एवायं चार इत्यङ्गदोऽभ्रवीत्।<br>मा घानि दूतमन्योऽसावित्यूचे सस्मितं प्रभुः॥34॥ |

न मे मित्रममित्रोऽयं रामामित्रो दशाननः।

गच्छेद् यमपुरीमित्थं सुग्रीवः शुकमब्रवीत्॥35॥

प्रतीक्षमाणो भगवान् त्रिरात्रं च क्षमापरः।

चुक्रोधानभियाताय वीर्य्याब्धिर्लवणाब्धये॥36॥

मन्यतेक्षमिणं क्षामं नीचो दण्डेन तृप्यति।

इत्युक्त्वाऽऽदत्त भगवान् बाणं बाणासनं च सः॥37॥

आकर्षतो राघवस्य बाहुना बाणमुल्पणम्।

निसर्ग्गरक्तो नेत्रान्तो रक्तत्वमभजत् पुनः॥38॥

रामापाङ्गानलज्वालाजालालीढो महोदधिः।

सर्प्पिःकलशदेशीयो भृशं तातप्यते पुरा॥39॥

शुष्यत्यम्भोनिधौ मङ्क्षु क्षुभ्यत्यस्मिन् जगत्त्रये।

प्रसीद लोकनाथेति देवाः समुनयोऽब्रुवन्॥40॥

कोपो विश्वस्य विपदे प्रसादः सम्पदे तव।

क्षमस्वाऽऽर्य्येति धनुषि व्याललम्बे स लक्ष्मणः॥41॥

सम्भ्राम्यन्नक्रचक्रादिः सम्भ्राम्यन्नम्बुधिः स्वयम्।

अर्हणं शिरसा बिभ्रद् रूपवान् समदृश्यत॥42॥

वैडूर्य्यमणिसङ्काशो नानामणिविभूषितः।

गङ्गादिभिर्वृतो दारै रामं नत्वाऽभ्यभाषत॥43॥

न वेदाहं जडमतिस्त्वां विश्वाधीश्वराधुना।

त्रिगुणैस्त्रिजगन्ति त्वं सृजस्यवसि चात्स्यसि॥44॥

| |
|---|
| यशः समुद्रसेतुस्ते मयि सेतुर्विधीयताम्।<br>तेन रावणमासाद्य सूदयाऽऽनय जानकीम्॥45॥ |
| मम कुक्षौ दुकूलाख्ये मरुदेशे महासुरान्।<br>निसूदयेदयं देव शरो मोघेतरस्तव॥46॥ |
| इत्यर्थितः सागरेण सगरान्वयशेखरः।<br>आभीरजन्मनो दैत्यानवधीत् तेन पत्रिणा॥47॥ |
| सीताकान्तप्रसादेन मरुकान्तारनामकम्।<br>वनं तदभवत् पुण्यं फलमूलाम्बुपुष्कळम्॥48॥ |
| विश्वकर्म्मसुतं वीरं विश्वकर्म्मविशारदम्।<br>आदिदेश नळं देवः सेतुं कर्त्तुं महार्ण्णवे॥49॥ |
| शैलेन्द्रान् गण्डशैलांश्च तृणस्तम्बांश्चपादपान्।<br>आजह्रुः कपियूथानि शतशोऽत सहस्रशः॥50॥ |
| केचित् सूत्राणि जगृहुर्द्दण्डैः स्म विमतेऽपरे।<br>अपूरयन् परे वृक्षैर्वानरा नळशासनात्॥51॥ |
| देवोपदेवा देवीभिः साकमाकाशमागमन्।<br>इदमत्यद्भुतं द्रष्टुं रामदासविचेष्टितम्॥52॥ |
| नगानादाय पततां नगार्त्थं पततां द्रुतम्।<br>बध्नतां चान्तरं तेषां वेगिनां न व्यदृश्यत॥53॥ |
| क्षुभ्यतः कपिसैन्यस्य क्षुभ्यतो वारिधेरपि।<br>उपमानपदं नाऽऽसीद् विनाऽन्योन्यं जगत्त्रये॥54॥ |

परस्परं स्पर्धयेव प्रवृद्धौ सेतुवारिधी।
मध्यस्थो भगवान् नूनं तयोर्वैरमवारयत्॥55॥

दशयोजनविस्तीर्णं शतयोजनमायतम्।
सेतुं पञ्चाहतश्चक्रे नळिनाक्षप्रियो नळः॥56॥

श्रीमता सेतुना तेन समेन विमलेन च।
कपिकोटिसहस्राणि सहसाऽब्धिमतारयन्॥57॥

विभीषणो गदापाणिरग्रतः सचिवैर्य्ययौ।
राघवौ च ससुग्रीवौ वायुजाङ्गदवाहनौ॥58॥

कोसलेन्द्रः सुवेलाद्रिं समारुह्य सलक्ष्मणः।
सेनाया विश्रमं चक्रे सुग्रीवेणाभिनन्दितः॥59॥

दशमुखनगरीं विलोक्य लङ्कां शरमथ पाणिगतं परीक्षमाणः।
दयितहनुमदंससक्तहस्तो गिरिशिखरे विरराजवीरराजः॥60॥

अम्भोधिशोषणमशेषसुरारिनाशं सेतोश्च बन्धनमवेक्ष्य परस्य वीर्य्यम्।
देवोपदेवमुनयो मुदिता उपेत्य रामस्य चक्रुरथ तत्र महाभिषेकम्॥61॥

इति श्रीनारायणपण्डिताचार्य्यविरचिते रामाङ्के सङ्ग्रहरामायणे युद्धकाण्डे द्वितीयः सर्गः ॥6-2-61॥

[आदितः श्लोकाः 2292+61=2353]

## तृतीयः सर्गः ॥6-3-54॥

विधाय व्यूहविस्तारं रामः सुग्रीवसंयुतः।
शुकमेव मुमोचाथ तं दूतं रावणान्तिकम्॥1॥

| |
|---|
| कपिभिर्म्मुष्टिपिष्टाङ्गो लुप्तपक्षस्तथा शुकः।<br>जीवन् कथञ्चिद् वृत्तान्तं रावणाय न्यवेदयत्॥2॥ |
| विकत्थनपरः पापो रावणः शुकसारणौ।<br>रामसेनां गणयितुं चारौ प्रेषितवान् पुनः॥3॥ |
| कपिरूपधरौ चारौ चरन्तौ राक्षसौ च तौ।<br>इतस्ततो गणयितुं प्रायतेतां प्रभोश्चमूम्॥4॥ |
| पारेऽस्मिन् परपारे च सेतावद्रौ वने जले।<br>शयितानासितान् यातानैक्षेतां तौ कपिव्रजान्॥5॥ |
| ज्ञात्वा विभीषणः प्रोचे तौ चोरौ छलवानरौ।<br>सुवृत्ताविव दुर्वृत्तौ प्रोत्पतन्तावितस्ततः॥6॥ |
| महाबलैर्हन्यमानौ कपिभिः क्रूरविक्रमैः।<br>क्षीणप्राणावथाऽऽक्रन्दं चक्राते तौ जिजीविषू॥7॥ |
| रावणस्य चरावावां त्वत्सेनायाः परीक्षकौ।<br>बद्धोऽञ्जलिरयं राम क्षमस्व जय धार्म्मिक॥8॥ |
| इत्युक्त ऊचे भगवान् प्रहसन् शुकसारणौ।<br>मा भयं रामभृत्येभ्यो युवयोर्न्यस्तशस्त्रयोः॥9॥ |
| सङ्ख्यातं चेदिदं सैन्यं गम्यतां स्वामिनोऽन्तिकम्।<br>नो चेत् पुनश्च सङ्ख्येयं सहायोऽस्तु विभीषणः॥10॥ |
| अनङ्गबाणक्षुभितं हृदयं रावणस्य यत्।<br>अङ्गवन्तो वयं बाणैर्भेत्स्याम इति चोच्यताम्॥11॥ |

| |
|---|
| एवं रामेण गदिते सुग्रीवः कुपितोऽब्रवीत्।<br>इदं च वचनं वाच्यं भवद्भ्यां स्वामिसन्निधौ॥12॥ |
| बाणबर्हिःपरिस्तीर्णे वानरर्त्विक्समीडिते।<br>रावणाख्यपशोर्होमो रामाग्नौ समुपस्थितः॥13॥ |
| इत्युक्तौ राक्षसावेतौ निर्म्मुक्तौ च भयातुरौ।<br>प्रासादशिखरारूढं प्राप्य रावणमूचतुः॥14॥ |
| राघवोऽपि सुवेलाद्रेर्लङ्काभिमुख आययौ।<br>सानुजो मुदितः सार्द्धमृक्षराक्षसवानरैः॥15॥ |
| नीलाङ्गदनळश्वेतकुमुदान् कपियूथपान्।<br>पनसं शरभं रम्भं ताववर्णयतां पृथक्॥16॥ |
| तारं धूम्रं जाम्बवन्तं विनतं कत्थनं तथा।<br>केसर्य्याख्यं शतवालिं प्रमाथिगजपूर्वकान्॥17॥ |
| खर्वार्बुदाधिपत्यं च तेषां राज्यं च विक्रमम्।<br>निगद्य विस्तरेणैव रावणं पुनरूचतुः॥18॥ |
| प्राहुर्ल्लक्षशतं कोटिं तल्लक्षं शङ्कनामकम्।<br>शङ्कुलक्षं महाशङ्क तल्लक्षं वृन्दमुत्तमाः॥19॥ |
| वृन्दलक्षं महावृन्दं तल्लक्षं पद्ममप्युत।<br>पद्मलक्षं महापद्मं तल्लक्षं खर्वमभ्यधुः॥20॥ |
| खर्वलक्षं महाखर्वं तल्लक्षं धूळिमप्युत।<br>धूळिलक्षं महाधूळिं तल्लक्षं हि समुद्रकम्॥21॥ |

| |
|---|
| समुद्रलक्षं कवयो महौघं कीर्त्तयन्ति हि।<br>पश्य सङ्ख्यामिमां राजन्नस्मिन् वानरमण्डले॥22॥ |
| अवध्यानामवेध्यानां हरिणां वातरंहसाम्।<br>हन्त कोटिसहस्रेण तेषां शङ्कुशतेन च॥23॥ |
| महावृन्दसहस्रेण तथा पद्मशतेन च।<br>महापद्मसहस्रेण तेषां खर्वशतेन च॥24॥ |
| तेषां कोटिमहौघेन समुद्रेण च संवृतः।<br>रामो विभीषणसखः ससुग्रीवो विजृम्भते॥25॥ |
| कपिकोटि महौघेभ्यो महौघगुणवीर्य्यवान्।<br>एको हनूमान् नूनं नो नाशायालं दशानन॥26॥ |
| रामानुजो लक्ष्मणोऽयं सुग्रीवो वालिनोऽनुजः।<br>तेन तर्क्यं तयोर्वीर्य्यं क्षेमायाऽऽर्य्य प्रयत्यताम्॥27॥ |
| रामस्त्रिलोकीं संहर्त्तुमेक एव किलेश्वरः।<br>अलं राजन् विरोधेन दीयतामाशु मैथिली॥28॥ |
| श्रुत्वा तयोर्हिदं वाक्यं दृष्ट्वा रामचमूं च ताम्।<br>रावणोऽतिविषण्णोऽपि मानी तावाक्षिपत् क्रुधा॥29॥ |
| पुनश्च प्रेषितास्तेन चाराः शार्दूलपूर्वकाः।<br>वानरैः पीडिता मुक्ताः प्राप्योदन्तं न्यवेदयन्॥30॥ |
| सम्मन्त्र्य मन्त्रिभिः सार्द्धमशोकवनिकां गतः।<br>मायी स रावणस्तन्वीं रामस्यापायमभ्यधात्॥31॥ |

| |
|---|
| विद्युज्जिह्वोऽथ मायावी रावणेन प्रचोदितः।<br>रामस्येदं शिर इति शिरः किञ्चिदिहाऽऽनयत्॥32॥ |
| माययाऽप्यकृतार्थेऽथ रावणे निर्ग्गते वनात्।<br>करुणं विलपन्तीं तां सरमोपाययौ सतीम्॥33॥ |
| रक्षणाय नियुक्ताऽपि राक्षसेन्द्रेण राक्षसी।<br>मायसीतां भक्तियुक्ता विदितार्थेदमब्रवीत्॥34॥ |
| मायाया रक्षसां भद्रे मा यायाः सति सङ्कटम्।<br>सबलस्ते सुवेलाद्रौ सबलः क्रीडते पतिः॥35॥ |
| चारा वानरानिष्पिष्टाः श्वासमात्रावशेषिताः।<br>रामस्य तद् बलौदार्य्यं वदन्तो वीक्षिता मया॥36॥ |
| रावणो बोध्यमानोऽपि मात्रा वृद्धैश्च मन्त्रिभिः।<br>न त्वां मुञ्चतिरम्भोरु हतो रामेण शेष्यते॥37॥ |
| एवमुक्ता सरमया सा रामा मोदमाददे।<br>शुश्राव रामसैन्यानां नादं वाद्यस्वनोर्ज्जितम्॥38॥ |
| मातामहो माल्यवांस्तं वृद्धो रावणमब्रवीत्।<br>शृणु वत्स हितं वाक्यं विदुषा भाष्यते मया॥39॥ |
| धर्म्मपक्षस्थिता देवा वयं चाधर्म्मपक्षिणः।<br>पुरा जयो ह्यधर्म्मस्य धर्म्मो विजयतेऽधुना॥40॥ |
| पालितो धर्म्मपक्षोऽयं विष्णुना प्रभविष्णुना।<br>मन्ये विष्णुमिमं जातं रामं तेजोभिरीदृशैः॥41॥ |

| |
|---|
| सन्धीयतां राघवेण दीयतां तात मैथली।<br>इति तेनोदितं श्रुत्वा क्रुद्धः प्रोवाच रावणः॥42॥ |
| नानुरूप इति त्यक्तः पित्रा दीनो वनं गतः।<br>जेता किं मानवो रामः क्षुद्रैः शाखामृगैर्वृतः॥43॥ |
| एक एव क्षिपेद् रामं जम्भारिस्तम्भनो भुजः।<br>भुजैरेकोनविंशद्भिः कृत्यं नैवोपलक्ष्यते॥44॥ |
| मन्त्रैरलमलं हन्त प्रहस्त प्रतिगम्यताम्।<br>सन्नह्यतां प्रतिद्वारं स्थियतां बलिभिर्य्युधे॥45॥ |
| इति ब्रुवाणमालोक्य राक्षसं पक्षिरूपिणः।<br>चारा विभीषणस्याथ विभीषणमुपाययुः॥46॥ |
| अनलानिलसम्पातिहर्य्याख्यैः सचिवैर्न्निजैः।<br>उदितं पुरि वृत्तान्तं राममूचे विभीषणः॥47॥ |
| भगवांश्च प्रतिद्वारं योद्धुं सङ्कल्प्य वानरान्।<br>श्वः प्रभाते रणमिति सुवेलमधिरूढवान्॥48॥ |
| ससुग्रीवौ राघवौ तौ हरयः सविभीषणाः।<br>उपासत सुवेलाग्रे सूर्य्यश्चास्तङ्गतस्तदा॥49॥ |
| सुग्रीवः सहितः प्रातर्द्देवेनाऽनन्दमूर्त्तिना।<br>तुङ्गे श्रृङ्गे त्रिकूटस्य तां लङ्कामथ दृष्टवान्॥50॥ |
| प्राकारगृहहर्म्याढ्यां सर्वसम्पत्समन्विताम्।<br>तां दृष्ट्वा विस्मयं भेजे पुरन्दरपुरीमिव॥51॥ |

तत्र प्रासादशिखरे चारुचामरवीजितम्।
रावणं प्रैक्षत कपिः सर्वभूषणभूषितम्॥ 52॥

स्वामिनो दारचोरो मे सोऽयमास्ते खलः सुखम्।
इति संरम्भसम्भिन्नश्चुक्षोभ रविनन्दनः॥ 53॥

मरतकमणिवर्णं मत्तमातङ्गलीलंमधुकरपरिघुष्टां वैजयन्तीं वहन्तम्।
हरिपरिषदिरामं सस्मितं वीक्षमाणं हरिपतिरथ नत्वा चोदयामास सेनाम्॥ 54॥

इति श्रीनारायणपण्डिताचार्य्यविरचिते रामाङ्के सङ्ग्रहरामायणे युद्धकाण्डे तृतीयः सर्गः ॥6-3-54॥

[आदितः श्लोकाः 2353+54=2407]

## चतुर्थः सर्गः ॥6-4-30॥

रामानुजो रामनियोगतोऽथ मधूनि मूलानि फलानि चाऽऽशु।
यथेष्टमत्र व्यभजत् कपिभ्यो महायुयुत्सोत्सवदर्प्पवद्भ्यः॥ 1॥

रामोऽथ बाणासनबाणपाणिः सलक्ष्मणो व्यूह्य बलं समस्तम्।
लङ्कामलङ्कारवतीमवाप प्रस्फारविस्फारविनादिताशः॥ 2॥

तमन्वगच्छन्नरिमर्द्दनाय सौमित्रिसुग्रीवविभीषणाश्च।
ते सत्यमैक्यं प्रययुस्ततो हि तेषां त्रयाणां च विभीषणत्वम्॥ 3॥

हरिप्रबर्हा हनुमत्पुरोगाः शिला विशाला दधतः कराग्रैः।
अभ्यापतन् राक्षसराजधानीं पक्षक्षयात् प्रागिव पर्वतेन्द्राः॥ 4॥

स राजधर्म्मं भुवनैकराजो रामो विधातुं किल वालिसूनुम्।
विभीषणस्यानुमतेन दूतं प्रस्थापयामास दशास्यपार्श्वम्॥ 5॥

अथाङ्गदो वह्निरिव प्रदीप्तः प्राकारमुल्लङ्घ्य पुरं प्रविश्य।
तन्मन्दिरं सुन्दरमावसन्तं दशाननं मन्त्रपरं ददर्श॥6॥

विवक्षतो रूक्षमुखस्य किञ्चिद् दशाननस्याङ्गद आबभाषे।
मां वालिनः सूनुमवैहि राजन् किं सौम्य वाली भवताऽवबुद्धः॥7॥

भ्रूविभ्रमस्तम्भितवारिराशेः सीतापतेर्विद्धि वचोहरं माम्।
श्रेणीं शराणां च दधाति देवो वाणीमपीमां रुचितां वृणीहि॥8॥

गुरुद्रुहो ब्राह्मणसूदनस्य व्रतच्छिदः सत्कुलजाङ्गनानाम्।
देवद्विषस्ते फलति प्रवृद्धो नूनं महापातकपादपोऽयम्॥9॥

अचूचुरस्त्वं महिषीमसारो वने परोक्षं पुरुषोत्तमस्य।
तन्मृष्यते त्वं प्रतिदाय देवीं देवं शरण्यं शरणं व्रजेश्चेत्॥10॥

नो चेत् प्रियार्थानुपभुङ्क्ष्व शीघ्रं कृत्येषु मा भूत् तव सम्प्रमादः।
विदारणं दारुणरामबाणैः सम्प्रप्य शीघ्रं ननु शेष्यसे त्वम्॥11॥

उक्तं निशम्येति निशाचरेन्द्रः क्रोधारुणाक्षः सचिवानुवाच।
प्रगृह्यतामाशु निगृह्यतां च शाखामृगो दुर्वचनोऽयमित्थम्॥12॥

तमुग्रवेगा जगृहुर्न्नराशाः स तान् समादाय खमुत्पपात।
ते तेन मुक्ता भुवि पेतुरार्त्ताः प्रासादभङ्गं विदधेऽङ्गदोऽथ॥13॥

प्रासादभङ्गादथ रावणस्य प्रसादभङ्गो नितरां बभूव।
प्रसादभङ्गाद् द्विषतो मुकुन्दाप्रसादमुन्मेषितवान् कपीन्द्रः॥14॥

दोषेषु तत्र प्रविजृम्भितेषु द्वाराणि देवो न्यरुणात् पुरस्य।
आयासनिश्वासपरं पुरं तत् पर्य्याकुलं मङ्क्षु बभूव शोच्यम्॥15॥

| |
|---|
| महाशिलाशैलनगायुधानामहो महौघैः कपिकुञ्जराणाम्।<br>आक्रम्यमाणा नगरी स्थिराऽपि महोदवाहैरिव नौश्चकम्पे॥16॥ |
| समादिदेशाथ दिशि प्रतीच्यमायोधनायेन्द्रजितं दशास्यः।<br>प्राच्यां प्रहस्तं दिशि वज्रदम्ष्ट्रं याम्यां स्वयं चागमदुत्तरस्याम्॥17॥ |
| प्रभुः प्रतीच्यां दिशि योधनाय प्रभुं हनूमन्तमथाऽदिदेश।<br>प्राच्यां च नीलं दिशि वालिसूनुं याम्यां स्वयं चावसदुत्तरस्याम्॥18 |
| नीलानुगामी विविदः समैन्दो गजदयश्चाङ्गदमन्वगच्छन्।<br>सम्प्रक्षको वायुसुतं प्रमाथी तस्थुः परे सूर्य्यसुतस्य पार्श्वे॥19॥ |
| यूथान्विता वानरयूथनाथाः प्रत्येकमुच्चैर्बहुकोटिसङ्ख्याः।<br>द्वारेष्ववर्तन्त सुषेणपूर्वाः पुरीं परीयुर्हरिचक्रकल्पाः॥20॥ |
| कोट्योऽथ षड्त्रिंशदतिप्रसिद्धा यूथाधिनाथा निजयूथयुक्ताः।<br>सुग्रीवमारात् परिवार्य्य तस्थुः काकुत्स्थयोः पश्चिमतो निषण्णम्॥21॥ |
| प्राकारमद्ध्यारुरुहुः कपीन्द्राः प्रासादमन्येऽथ परे गृहाणि।<br>अन्येऽवकाशानवलोक्य पूर्णानाकाशमापूरितवन्त आशु॥22॥ |
| पुनस्त्रिकूटाद्रितटेषु पूर्णाः सुवेलशैलं परिपूरयन्तः।<br>व्याप्ता महाब्धेश्च तटे कपीन्द्रा निशाचराणां विदधुर्विषादम्॥23॥ |
| केचिद् गजानां शततुल्यवीर्य्याः सहस्रवीर्य्या अपि लक्षवीर्य्याः।<br>समुद्रवीर्य्याश्च महौघवीर्य्याः केचिन्महान्तोऽपरिमेयवीर्य्याः॥24 |
| ऋक्षाश्च रूक्षा बहुकोटयो गोलङ्गुलाकोट्यश्च कटुस्वभावाः।<br>पृथक्पृथक् पर्वतसन्निभाङ्गा भङ्गं निनीषन्ति पुरा विपक्षान्॥25॥ |

विश्वेशितुः कार्म्मं कबाणपाणेरेकत्र पार्श्वेऽवरजो रराज।

अन्यत्र चित्राङ्गदवान् गदावान् विभीषणः शत्रुविभीषणोऽभूत्॥26॥

दन्तान् नखानप्यशनिप्रकाशान् प्रकाशयन्तः प्रतिघारुणाक्षाः।

तुच्छेतरं पुच्छमथोत्क्षिपन्तस्तिर्य्यङ् निरैक्षन्त रिपून् कपीन्द्राः॥27॥

यन्त्राण्यकृन्तन् परिखा अपूरयन् वप्राण्यभिन्दंश्च वनान्यखण्डयन्।

प्रासादमालाः सकला असादयन् युद्धोद्धताः कोसलनाथकिङ्कराः॥28॥

अन्योन्यतः पाणिपुटावपीडयन्नताडयन् स्वोरुमथ प्लवङ्गमाः।

साटोपमास्फोट्य गभीरनिस्वना उच्चैरुदारामिति गामुदाहरन्॥29॥

जयति जगति रामो रावणक्रोष्टुसिंहो

जयति ननु हनूमान् रामपादाब्जभृङ्गः।

जयति जगदधीशस्यानुजो लक्ष्मणोऽयं

जयति रवितनूजः सार्द्धमृद्धैः स्वसैन्यैः॥30॥

इति श्रीनारायणपण्डिताचार्य्यविरचिते रामाङ्के सङ्ग्रहरामायणे युद्धकाण्डे चतुर्थः सर्गः ॥6-4-30॥

[आदितः श्लोकाः 2407+30=2437]

## पञ्चमः सर्गः ॥6-5-50॥

कोपाटोपं कपीन्द्राणां वीर्य्यौदार्य्यं च शार्ङ्गिणः।

दृष्ट्वा मुहूर्त्तं दध्यौ स रावणो लोकरावणः॥1॥

धैर्य्यमालम्ब्य सङ्क्रुद्ध उत्तिष्ठन् हेमपीठतः।

प्रबलं राक्षसबलं नगरान्निरयापयत्॥2॥

नानायुधधरा वीरा राक्षसा रणकोविदाः।

प्रत्येकं प्रत्यगच्छंस्ते कपीन् कम्पितपादपान्॥3॥

रामरावणभृत्यानां द्वन्द्वयुद्धमभून्मिथः।

तीव्राणां पुण्यपापानां यतैव पुरसन्निधौ॥4॥

मुख्यप्राणसुतो मुख्यो युयोधेन्द्रजिता भृशम्।

पराद्रवत् तद्बलज्ञो हस्तप्राप्तइवेन्द्रजित्॥5॥

सम्पातिने प्रजङ्घोऽथ बाणांस्त्रीन् मुक्तवान् रणे।

आश्वेव सोऽश्वकर्ण्णेन प्रजङ्घं निजघान च॥6॥

मुमोच लोहजां शक्तिं जम्बुमाली हनूमते।

हनूमत्तळचूर्ण्णाङ्गो मुमोचाऽथ शरीरजाम्॥7॥

नळः प्रतपनस्योग्रः पातयामास चक्षुषी।

गजोऽद्रिशृङ्गमुष्टिभ्यां तापनं निरपातयत्॥8॥

मित्रघ्नेन शरैर्विद्धस्तं जघान विभीषणः।

शरवर्षं विरूपाक्षं शरेणैव च लक्ष्मणः॥9॥

प्रहस्तं सप्तपर्ण्णेन सुग्रीवो न्यहनद् बली।

मैन्दस्य मुष्टिनिष्पिष्टो वज्रमुष्टिरुतापतत्॥10॥

निकुम्भेन शरैर्विद्धो नीलो नीलाञ्जनप्रभः।

तस्यैव रथचक्रेण निकुम्भस्याहरच्छिरः॥11॥

शरानशनिसङ्काशान् किरन्तमशनिप्रभम्।

विदग्धो विविदस्तत्र सालेन न्यहनद् बली॥12॥

सुषेणोऽथ रथं भित्त्वा विद्युन्मालिन आहवे।

गदया ताडितस्तेन शिलया तममारयत्॥13॥

अन्यैश्च वानरैर्वीरै राक्षसा विविधायुधाः।

नखदन्तायुधैर्भग्नाः शिलासालायुधैरपि॥14॥

अथ रात्रिचरैस्तेषां रात्रियुद्धमवर्त्तत।

यत्र सुस्रुवुरत्युष्णा बहवः शोणितापगाः॥15॥

चापहस्त प्रहस्त त्वं स्वस्ति द्रावय तान् कपीन्।

मानवौ सूदयेत्यूचे प्रहस्तं तं दशाननः॥16॥

रामेण युद्धं विपदे सन्धानं सम्पदे प्रभो।

आस्तां हि मन्त्रो योत्स्याम इति मन्त्री तमब्रवीत्॥17॥

प्रहस्तो रथमारुह्य प्राच्यद्वारेण निर्य्ययौ।

उत्पातान् मृतिदान् पश्यन् वृतो विपुलसेनया॥18॥

युद्धं प्रवृद्धमत्राऽऽसीद् वानराणां नराशिभिः।

बलिष्ठं हतभूयिष्ठं वानरैः रक्षसां बलम्॥19॥

अद्रावयन् कपीन् क्रूराः प्रहस्तासचिवास्तदा।

अभ्यधावन्नतिक्रुद्धा विविदाध्याः क्षणेन तान्॥20॥

विविदो गिरश्शृङ्गेण धुरन्धरममारयत्।

समुन्नतेन वृक्षेण दुर्म्मुखश्च समुन्नतम्॥21॥

सूदयामास शिलया महानादं च जाम्बवान्।

तळेन तरसा तारो निन्ये कुम्भहनुं क्षयम्॥22॥

चापहस्तः प्रहस्तोऽथ ववर्षामर्षितः शरान्।

शरीराणि कपीन्द्राणामुदारो दारयन् मुहुः॥23॥

| |
|---|
| सेनानीरथ सेनान्यं प्रहस्तं नील आपतत्।<br>प्रहस्तेन शरैर्विद्धस्तरुणा तमताडयत्॥ 24॥ |
| नीलो निमीलिताक्षोऽथ शरवर्षसहो बली।<br>सालेनास्य जघानाश्वान् मुसली सोऽत्यजद् रथम्॥ 25॥ |
| शिरो बिबेद् निलस्य प्रहस्तो मुसलेन सः।<br>तरुणाऽताडयन्नीलः प्रहस्तोऽभ्यापतत् पुनः॥ 26॥ |
| ज्ञात्वा तं नीलदुर्द्धर्शं शक्तिं प्रास्यद् विभीषणः।<br>नीलः शिलां प्रहस्तायताभ्यां भग्नो ममार सः॥ 27॥ |
| प्रहस्ते निहते तस्मिन् राक्षसेन्द्रनियोगतः।<br>वज्रदंष्ट्रो ययौ योद्धुं ससैन्यो दक्षिणां दिशम्॥ 28॥ |
| निशाचरचमूं भीमां विविधायुधधारिणीम्।<br>शैलैः सालैर्नखैश्चोग्रा कपिसेना न्यसूदयत्॥ 29॥ |
| वज्रदंष्ट्रोऽधिकं क्रुद्धो विक्ष्य तं रक्षसां क्षयम्।<br>शरैः शरीरान्तकरैर्द्दारयामास वानरान्॥ 30॥ |
| पातितान् दारितान् कांश्चिद् द्रावितानपि तान् हरीन्।<br>युवराजोऽङ्गदो दृष्ट्वा वज्रदंष्ट्रमुपाद्रवत्॥ 31॥ |
| अङ्गदो वज्रदंष्ट्रेऽथ पातयामास पादपम्।<br>शरैस्तं शकलीचक्रे वज्रदंष्ट्रो हसन्निव॥ 32॥ |
| शैलमुत्पाट्य चिक्षेप बलवान् वालिनन्दनः।<br>अपासर्प्पद् वज्रदंष्ट्रो गिरिणा चूर्ण्णितो रथः॥ 33॥ |

| |
|---|
| गदापाणिमसम्भ्रान्तं वज्रदंष्ट्रमवेक्ष्य सः।<br>शिरः शैलेन तस्याथ ताडयन् मोहमानयत्॥34॥ |
| लब्धसञ्ज्ञो निशिचरः सोऽङ्गदं गदयाऽहनत्।<br>धृष्टयोः स्पष्टमनयोर्म्मुष्टियुद्धमवर्त्तत॥35॥ |
| वानरो वृक्षमादत्त राक्षसः खड्गचर्म्मणी।<br>चिरं चित्रं रणं कृत्वा जानुभ्यां तौ धरां गतौ॥36॥ |
| अङ्गदः सहसोत्थाय तं निपात्य निशाचरम्।<br>यमक्षयं निनायास्य शिरोमर्द्दननिर्द्दयः॥37॥ |
| तेजसाऽङ्गदचन्द्रस्य विष्णोः पदमुपेयुषः।<br>ध्वस्तं नक्तञ्चरतमः कपिचक्राब्धिरुद्धतः॥38॥ |
| धूम्राक्षः पश्चिमद्वारा निरगाद् रावणाज्ञया।<br>खरैः सिंहमुखैर्य्युक्ते रथे तिष्ठन् बलैर्वृतः॥39॥ |
| राक्षसान् वानरैर्भग्नान् दृष्ट्वा बाणान् ववर्ष सः।<br>धूम्राक्षः क्रोधधूम्राक्षो धुन्वानश्चापमुत्तमम्॥40॥ |
| स्वां चमूं चञ्चलां दृष्ट्वा मारुतिर्म्मारुतोपमः।<br>शिलयाऽथो विपुलया धूम्राक्षरथमक्षिणोत्॥41॥ |
| गदया ताडितस्तेन हनुमांस्तदचिन्तयन्।<br>गिरिश्रृङ्गेण धूम्राक्षं चूर्णयामास लीलया॥42॥ |
| गर्ववान् शर्ववरतो रावणेन प्रचोदितः।<br>अकम्पनः कपिवरान् द्रावयामास सायकैः॥43॥ |

पर्वतादभ्रकायोऽथ पर्वतान् पादपानपि।
हनूमानाक्षिपत् तस्मै स शरैस्तानखण्डयत्॥44॥

पावमानिरथोत्पाट्य पादपं प्रहसन्निव।
जघानाकम्पनं तेन चक्रेणेवाहितं हरिः॥45॥

रामाज्ञया ततो लङ्कामदहन् निशि वानराः।
उच्चावचाः प्रगर्ज्जन्त उच्चैरुल्मुकपाणयः॥46॥

जाज्वल्यमानज्वलनैरलातैरस्त्रमन्त्रितैः।
विकीर्य्यमाणैः कपिभिर्ल्लङ्का सर्वाऽप्यदह्यत॥47॥

बालानामबलानां च प्रबलानां च रक्षसाम्।
सीताहेळनदोषेण विनाशोऽभूदचिन्तितः॥48॥

हा पुत्र मातस्तातेति कान्ते कान्तेति चाऽसकृत्।
अश्रूयन्तात्र दग्धानां प्रजानां करुणा रवाः॥49॥

कपिकुलकमलप्रोज्जृम्भणे तिग्मभानुर्ज्जनकदुहितृचेतःकैरवश्वेतभानुः।
निशिचरचयसत्तध्वंसने चित्रभानुर्व्यजयत जगदेको रामनेत्रान्तभानुः॥50॥

इति श्रीनारायणपण्डिताचार्य्यविरचिते रामाङ्के सङ्ग्रहरामायणे युद्धकाण्डे पञ्चमः सर्गः ॥6-5-50॥ [ आदितः श्लोकाः 2437+50=2487]

## षष्ठः सर्गः ॥6-6-63॥

ततो निकुम्भः कुम्भश्च कुम्भकर्णसुतावुभौ।
वानरानुल्मुकधरान् प्रापतू रावणाज्ञया॥1॥

| |
|---|
| यूपाक्षः शोणिताक्षश्च प्रजङ्घः कम्पनस्तथा।<br>निर्य्ययुः कौम्भकर्णिभ्यां सार्द्धं नानायुधा युधे॥2॥ |
| वानरा राक्षसान् जघ्नुः पादपोपलपर्वतैः।<br>आयुधैर्वानरांस्तेऽपि बभौ युद्धं तदद्भुतम्॥3॥ |
| अङ्गदो गदया गुर्व्या कम्पनेनाभिताडितः।<br>जघान गिरिश्रृङ्गेण कम्पनं कोपकम्पितः॥4॥ |
| क्षुरार्द्धचन्द्रनाराचान् वत्सदन्तान् शिलीमुखान्।<br>कर्ण्णिशल्यविपाठांश्च शोणिताक्षोऽङ्गदेऽकिरत्॥5॥ |
| अनादृत्याङ्गदो वेधं धनुर्बाणरथानथ।<br>अचूर्ण्णयद् रक्षसोऽस्य सोऽपि खङ्गी खमापतत्॥6॥ |
| अङ्गदः खङ्गमाच्छिद्य छित्वांऽसं तस्य रक्षसः।<br>तेनैव सिंहनादोग्रः खङ्गेनाखण्डयत् परान्॥7॥ |
| प्रजाङ्घयूपाक्षयुतः शोणिताक्षोऽभ्ययाद् गदी।<br>अङ्गदो वारयामास तान् मैन्दिविविदान्वितः॥8॥ |
| उत्पाट्योत्पाट्य विक्षिप्तान् वनौकोभिरनोकहान्।<br>गताखङ्गशरैराशु चिच्छिदुस्ते निशाचराः॥9॥ |
| अश्वकर्ण्णेन सन्ताड्य मुष्चिघातेन चाङ्गदः।<br>प्रजङ्घस्य करात् खङ्गमाच्छिद्य प्राहरच्च तम्॥10॥ |
| प्रजङ्घो मुष्टिघातेन तं तारेयममोहयत्।<br>लब्धसञ्ज्ञो मुहूर्त्तेन वालिजोऽस्य शिरोऽहरत्॥11॥ |

यूपाक्षं विविदोऽरौत्सीद् युवराजाभिगामिनम्।
उरस्याहत्य तं दोर्भ्यां जग्राह च महाबलः॥12॥

भ्रातरं मोचयन् वीरो गदयोरस्यताडयत्।
शोणिताक्षोऽथ विविदं तां गदां विविदोऽग्रहीत्॥13॥

नखैर्म्मुखं परिक्षिण्वन् विविदो भुवि पातयन्।
पिपेष शोणिताक्षं तं मैन्दो यूपाक्षमक्षिणोत्॥14॥

काल्यमानां कपिवरैः कुम्भो दृष्ट्वा निजां चमूम्।
अभिधावन् शरेणाऽऽशु विविदं भुव्यपातयत्॥15॥

अथाऽपतन्तं मैन्दं च शरेणापातयत् क्षितौ।
मातुलौ मोहितौ दृष्ट्वा तमभ्यद्रवदङ्गदः॥16॥

वध्यमानः शरैस्तीक्ष्णैर्बलवान् वालिनन्दनः।
ववर्षाथ शिलासालान् कुम्भस्तानच्छिनच्छरैः॥17॥

अङ्गदस्याभिपततो भ्रुवोर्बाणौ स मुक्तवान्।
रुधिरव्याकुलाक्षोऽपि वृक्षं चिक्षेप सोऽङ्गदः॥18॥

कुम्भो वृक्षं शरैश्छित्वा युवराजममोहयत्।
हाहाकारो महानासीत् तदा वानरमण्डले॥19॥

सुषेणो जाम्बवान् नीलो नळस्तारादयस्तथा।
अभ्यद्रवन् शिलाहस्ताः कुम्भस्तानजयच्छरैः॥20॥

भ्रातृजं पतितं दृष्ट्वा वानरेन्द्रांश्च विद्रुतान्।
क्रुद्धो हि द्रुमवर्षेण सुग्रीवः कुम्भमाद्रवत्॥21॥

| |
|---|
| शीर्य्यमाणान् रिपुशरैः शिलावृक्षान् विलोक्य सः।<br>कुम्भस्य धनुराच्छिद्य चिच्छेदेक्षुमिव द्विपः॥22॥ |
| जितकाशी भवान् कुम्भ पौरुषं पश्य मेऽधुना। |
| इत्युक्त्वा जग्रुहे राजा कुम्भं संरम्भसम्भृतः॥23॥ |
| नियुद्धं वीरयोरासीच्चिरं चित्रं समं तयोः।<br>कुम्भमम्भोनिधौ प्रास्यत् कपीन्द्रोऽब्धिस्तदोद्धतः॥24॥ |
| अर्ण्णवात् तूर्ण्णमुत्पत्य स सुग्रीवमताडयत्।<br>सुग्रीवो मुष्टिघातेन तं निनाय यमक्षयम्॥25॥ |
| कुम्भं तं निहतं दृष्ट्वा निकुम्भो भानुनन्दनम्।<br>संरम्भारुणताम्राक्षो गम्भीरं प्रैक्षत ज्वलन्॥26॥ |
| धनुःशतमितं देशं पुप्लुवे प्लवगेश्वरः।<br>पश्यन् निकुम्भसंरम्भं किमुतान्ये प्लवङ्गमाः॥27॥ |
| परिघं प्रतिघोन्नद्धः सुरवारणदारणम्।<br>अबिभ्रमन्निकुम्भोऽथ दण्डं दण्डधरो यथा॥28॥ |
| परिघभ्रामणेनास्य सम्भ्रान्तं भुवनत्रयम्।<br>विषसाद लये यद्वत् ससुरासुरमानवम्॥29॥ |
| अवध्यः शङ्करवरादवध्याता च नाकिनाम्।<br>जाज्वल्यते स्म तस्मिन् स काले कालानलोपमः॥30॥ |
| विषादं वीक्ष्य हनुमान् विश्वस्य तमुपस्थितम्।<br>निकुम्भाग्रत आप्लुत्य विशालं वक्ष ऐक्षयत्॥31॥ |

| |
|---|
| अभीरो वीर किं कृत्यं भीरुभिर्विद्रुतैस्तव।<br>अत्र प्रहर ते हेतिमित्यूचे हनुमानिमम्॥32॥ |
| अमोघं परिघं घोरमुद्भ्राम्य प्रजहार सः।<br>हनूमति स मोघोऽबूत् पतत्रीन्द्रे पविर्य्यथा॥33॥ |
| मारुतेर्म्मुष्टिपिष्टोऽथ मूर्च्छितः कुम्भसोदरः।<br>आश्वस्तस्तं हनूमन्तमंसे न्यस्याऽऽद्रवद् द्रुतम्॥34॥ |
| नीते हनूमत्यारब्धं क्रन्दितं कपिमण्डलैः।<br>जातं सपदि हासान्तं पातितेऽस्मिन् हनूमता॥35॥ |
| महासङ्गमखे तस्मिन् प्रमथ्याविक्षतं हरिः।<br>तं निकुम्भपशुं तत्र यज्ञेश्वरमतोषयत्॥36॥ |
| कुम्भकर्णात्मजे तस्मिन् कुम्भकर्णसमे हते।<br>नन्दितं नाकिलोकेऽबूत् क्रन्दितं रक्षसां पुरे॥37॥ |
| ससुप्तघ्ना यज्ञकोपरश्मिकेत्वग्निकेतवः।<br>प्रेषिता रावणेनाऽजौ क्षणाद् रामेण सूदिताः॥38॥ |
| यमशत्रुश्च दुर्द्धर्षो महापार्श्वो महोदरः।<br>वज्रदंष्ट्रो महाकायस्तौ चोभौ शुकसारणौ॥39॥ |
| ससैन्या रावणादिष्टा हता रामेण लीलया।<br>उदारविक्रमेणाऽजौ मृगेन्द्रेण मृगा इव॥40॥ |
| निकुम्भादीन् हताञ्च्छ्रुत्वा विलपन्तं दशाननम्।<br>आश्वास्य निर्य्ययुर्य्योद्धुं कुमारास्तदनुज्ञया॥41॥ |

| |
|---|
| त्रिशिरा अतिकायश्च देवान्तकनरान्तकौ।<br>ते मत्तयुद्धोन्मत्ताभ्यां पितृव्याभ्यां समं ययुः॥42॥ |
| उग्रा तदग्रगा सेना वानरान् पर्य्यपीडयत्।<br>नानाहेतिमतीं दीप्तां तां कपीन्द्रा न्यवारयन्॥43॥ |
| वानरा वारणैर्भग्नैर्वारणांश्च हयैर्हयान्।<br>रथै रथान् राक्षसांश्च राक्षसैः समसूदयन्॥44॥ |
| नरान्तकोऽन्तकनिभः क्रुद्धो वाजिवरे स्थितः।<br>कपिसप्तशतान्येकः प्रासेनादारयत् क्षणात्॥45॥ |
| दीनं दूनं कुमारेण हरिचक्रं विलोकयन्।<br>नरान्तकं प्रितिययौ सुग्रीवप्रेषितोऽङ्गदः॥46॥ |
| तिष्ठ किं प्राकृतैरेभिः प्रासं मे प्रहरोरसि।<br>इत्यङ्गदस्य ब्रुवतः प्रासं प्रास्यत् स वक्षसि॥47॥ |
| अङ्गदोरसि स प्रासः पातितः खण्डितोऽपतत्।<br>तारेयस्तरसा तस्य तळेनाश्वमताडयत्॥48॥ |
| ताडितादश्ववदनान्नयने भुवि पेततुः।<br>तारकेइव मेघाग्रात् स पपात ममार च॥49॥ |
| दुष्टधीः पातयामास मुष्टिमङ्गदमूर्ध्नि सः।<br>मूर्च्छितः प्राप सञ्ज्ञां स रक्तो रुधिरधारया॥50॥ |
| तन्मुष्टिपीडितः क्रुद्धो दधे खड्गं नरान्तकः।<br>खड्गमाच्छिद्य तेनैनमङ्गदो भङ्गमानयत्॥51॥ |

| |
|---|
| नरान्तके निपतिते क्रुद्धो देवान्तकोऽभ्ययात्।<br>जाम्बवत्प्रमुखाः सर्वे तं दृष्ट्वैव पराद्रवन्॥52॥ |
| देवान्तकाय चिक्षेप वृक्षान् वालिसुतो बहून्।<br>स तांश्छित्वा शरेणाऽऽशु वालिसूनुममोहयत्॥53॥ |
| अथ तिग्मांशुतनयः शैलं प्रचलपादपम्।<br>अभिदुद्राव सङ्गृह्य चिक्षेप च निशाचरे॥54॥ |
| स शैलं शकलीकृत्य शरैर्देवान्तको बली।<br>हृदि विध्वा शरं घोरं कपिराजं व्यमोहयत्॥55॥ |
| बलमप्रतिमं वीक्ष्य सुरशत्रोस्तु मारुतिः।<br>तमाहवायाऽऽह्वयत केशवः कैटभं यथा॥56॥ |
| तस्याऽऽपतत एवाऽऽशु रथं सहयसारथिम्।<br>चूर्णयित्वा धनुश्चास्य चिच्छेदाऽच्छिद्य मारुतिः॥57॥ |
| अथ खड्गिनमायान्तं पातयित्वा स पावनिः।<br>शिरः पादेन निष्पिष्य जघानामरवैरिणम्॥58॥ |
| सुवर्णसुन्दरैरेष मारुतिः प्रत्यपूज्यत।<br>अमराणां कपीनां च स्तवनैर्न्नयनैरपि॥59॥ |
| युद्धोन्मत्तं च मत्तं च वीरावन्वर्थनामकौ।<br>जघान मुष्टिघातेन मारुतिः क्षिप्तवानरौ॥60॥ |
| अङ्गदादीन् प्लवङ्गेन्द्रान् द्रावयन्तं शरोत्करैः।<br>प्राप्य त्रिशिरसं तस्य हनूमान् रथमक्षिणोत्॥61॥ |

सञ्छिद्य चापखड्गौ च तळेन बलचुञ्चनुना।
त्रिमूर्द्धानममूर्द्धानं चक्रे चक्रायुधप्रियः॥62॥

परमपरमहिष्ठं मानयन्तं नयन्तं जयमखिलकपींस्तान् राममत्राभिनन्दन्।
रणरणरणिकायां वर्त्तमानोऽसमानो मुहुरपि मिहिरश्रीः श्रीहनूमान् जगर्ज्ज॥63॥

इति श्रीनारायणपण्डिताचार्य्यविरचिते रामाङ्के सङ्ग्रहरामायणे युद्धकाण्डे षष्ठः सर्ग्गः ॥6-6-63॥

[आदितः श्लोकाः 2487+63=2550]

## सप्तमः सर्ग्गः ॥6-7-32॥

अद्रिकायोऽतिकायोऽथ सन्तप्तो भ्रातृमारणात्।
रथं स्वयम्भुवा दत्तमारुरोहार्क्कभास्वरम्॥1॥

ब्रह्मणो वरदृप्तोऽसौ ब्रह्महा देवदारुणः।
विष्फारयन् महच्चापं कोपाटोपमुपाययौ॥2॥

कुमुदं विविदं मैन्दं छित्वा नीलादिकाञ्छरैः।
विजित्याङ्गदसुग्रीवौ लीलया प्राप स प्रभुम्॥3॥

विपक्षवक्षो नावेक्षे मच्छरानेव पृष्ठगान्।
निवर्त्तिष्ये निराशोऽहमित्यूचे रावणात्मजः॥4॥

मानेनासहमानेन तत्र सौमित्रिणा क्षणात्।
वर्षकेण शरान् घोरानतिकायोऽभ्यपद्यत॥5॥

ननु बालोऽसि सौमित्रे न बली नापि चास्त्रवित्।
गच्छ तिष्ठ मुमूर्षुश्चेदिति रावणिरभ्यधात्॥6॥

| |
|---|
| बालस्य किमवद्यं मे बालो हि प्राक् त्रिविक्रमः।<br>विक्रमस्व पुरा मृत्योरित्यूचे लक्ष्मणो रिपुम्॥7॥ |
| रणं द्रष्टुं नभो भेजुस्तयोर्वीरकुमारयोः।<br>पक्षपाते परिक्षिप्ता उभयेऽपि सुरासुराः॥8॥ |
| एकं पञ्च च चिक्षेप सोऽतिकायः शरोत्तमान्।<br>तानप्राप्तान् शरैस्तीक्ष्णैश्चिच्छेद भरताग्रजः॥9॥ |
| आकर्णपूर्णमाकृष्य लक्ष्मणो मुक्तवाञ्छरम्।<br>ललाटं पाटयामास रिपोः सादं च सोऽकरोत्॥10॥ |
| आश्वास्य रावणिर्वीरो वीरोऽसीति ब्रुवन् परम्।<br>एकं त्रीन् पञ्च सप्तेति लक्ष्मणायाक्षिपच्छरान्॥11॥ |
| चिच्छेद तांश्च सौमित्रिः परोऽमुञ्चन्महाशरम्।<br>शरेण तेन भिन्नोरा ववर्षेषूः स लक्ष्मणः॥12॥ |
| असङ्ख्यास्तदिषूर्द्दृष्ट्वा मुमोचेषूः स कोपितः।<br>असङ्ख्या अतिकायश्च नभ आसीत् तमोमयम्॥13॥ |
| साम्यं नसहमानोऽथ सौमित्रिर्बाणमन्त्रितम्।<br>आग्नेयमस्त्रं व्यसृजत् तत् सौरेणाऽक्षिपत् परः॥14॥ |
| मुमोच रावणीर्य्याम्यं वायव्येन निरस्य तत्।<br>चिच्छेद तच्छिरो बाणैर्बाहू च भरताग्रजः॥15॥ |
| द्विशिराः स चतुर्बाहुरतिकायो व्यदृश्यत।<br>चिच्छेद तानि चाङ्गानि लाघवाद्रा राघवानुजः॥16॥ |

द्विगुणाङ्गोऽभवत् सोऽथ छिन्नश्छिन्नः पुनः पुनः।

तं विषण्णं विवर्णास्यं सौमित्रिं वायुरब्रवीत्॥17॥

ब्राह्मेणास्त्रेण वध्योऽयं तात नैवापरैरिति।

तद् दिव्यवचनं श्रुत्वा विरिञ्चास्त्रं स सन्दधे॥18॥

मुमोच ब्राह्ममस्त्रं तत् स ब्रह्मजनकानुजः।

ससूताश्वरथं तूर्णमतिकायं ददाह तत्॥19॥

निहत्य वैरिणं वीरो रामं रामानुजोऽव्रजत्।

प्रणतं प्रणयेनेशः परिरेभेऽथ लक्ष्मणम्॥20॥

रावणं पुत्रशोकार्त्तं विलप्य क्रोधमाश्रितम्।

निर्य्याणाभिमुखं प्रेक्ष्य खरपुत्रोऽभ्यबाषत॥21॥

राजन् नियोजनीयोऽहं रणार्त्थं रणपण्डितः।

निहत्य मत्पितृरिपुं सबलं त्वां प्रसादये॥22॥

इत्युक्त्वा मन्युरक्ताक्षो मकराक्षो महाबलः।

रावणेन समादिष्टो रथी धन्वी विनिर्य्ययौ॥23॥

राक्षसान् मकाराक्षस्य पुरोगान् कपिपुङ्गवाः।

नानाविधायुधान् सङ्घे निजघ्नुः सशिलानगाः॥24॥

नीलाङ्गदादीन् सुग्रीवं शरैर्विद्राप्य वीर्य्यवान्।

लक्ष्मणेशूरगणयन् रामं प्राप खरात्मजः॥25॥

पश्यामि राम दैवात् त्वां मत्पितृघ्नमकिञ्चनम्।

करिष्ये निष्क्रियामित्थं मकराक्षोऽब्रवीत् प्रभुम्॥26॥

| |
|---|
| मत्कङ्कपत्रैर्न्निहतः कङ्कानां निष्क्रियां भवान्।<br>करिष्यते निजैर्म्मांसैरिति रामस्तमब्रवीत्॥27॥ |
| ववर्ष बाणान् दुष्टोऽसौ रामश्चिच्छेद ताञ्छरैः।<br>ववर्ष रामश्च शरानस्त्रैरस्त्राण्यवारयत्॥28॥ |
| रामः स्मितमुखो बाणैः सरथं सारथिं क्षणात्।<br>उदारो दारयामास स शूली च खमाप्लुतः॥29॥ |
| चिक्षेप राक्षसः शूलं रामश्चिच्छेद तच्छरैः।<br>चिच्छेद च शरेणास्य शिरः कुण्डलमण्डितम्॥30॥ |
| निकरा राक्षसानां ते मकराक्षानुगामिनः।<br>परेताः कपिभिः शैलैः परे च प्राद्रवन् पुरीम्॥31॥ |
| विक्रान्तकान्तकरकाशितकार्म्मुकं तं रामं रमारमणमेवमवेक्षमाणाः।<br>देवोपदेवमुनयो मुदिता मुकुन्दं देवारिवारदमनं प्रववन्दिरेऽत्र॥32॥ |
| इति श्रीनारायणपण्डिताचार्य्यविरचिते रामाङ्के सङ्ग्रहरामायणे युद्धकाण्डे सप्तमः सर्ग्गः ॥6-7-32॥<br>[आदितः श्लोकाः 2550+32=2582] |
| **अष्टमः सर्ग्गः ॥6-8-43॥** |
| निशम्य सम्यङ्मकराक्षमृत्युं स शोककोपाकुलितो दशास्यः।<br>सन्नाहयन्नाहवशोभिनीं स्वां सेनां रणायाऽऽशु विनिर्ज्जगाम॥1॥ |
| स कुण्डली भूषणभूषिताङ्गो देदीप्यमानं रथमारुरोह।<br>तस्याऽतपत्रं सितचामरे च नीलभ्रभासः परभागभाञ्जि॥2॥ |

| |
|---|
| तं वानरास्तत्र नराशिनाथं नराशिराशिप्रकरैः परीतम्।<br>सबाणबाणासनमुद्बणास्यमायान्तमालोक्य विदुद्रुवुस्ते॥3॥ |
| विंशद् दशास्यस्य च लोचनानि रक्तानि दृष्ट्वा मदमन्युमन्ति।<br>भुजाश्च विंशद् भुजगप्रकारान् कुतूहलं प्राप कुलं कपीनाम्॥4॥ |
| दंष्ट्राकटूनां मुखकोटराणां महाञ्जनाद्रेरिव कन्दराणाम्।<br>लोलाहिजिह्वादशकं चकाशे दिशो दशेव ग्रसितुं सुरारेः॥5॥ |
| किं पौरुषं तत् पुरुषादभर्त्तुः संवर्ण्णनीयं कविभिर्विविच्य।<br>कालानलस्येव न यस्य शान्तिर्विनेशितुर्वीर्य्यलयोद्वाहम्॥6॥ |
| सेनान्य एनं बहुसैन्यवन्तो वीराः सहस्रायुतकोटिसङ्ख्याः।<br>नानायुधाढ्याः परिवारयन्तो व्यद्रावयंस्तत् कपिचक्रमाशु॥7॥ |
| गजो गवाक्षो गवयो वृषश्च सगन्धमादाः सह कत्थनेन।<br>रक्षश्चमूं जघ्नुरिमे कपीन्द्राः षड्भिः शरैस्तानतुदद् दशास्यः॥8॥ |
| नासत्यसूनू स च शम्भुसूनुः शैलैः प्रजह्रुः कुपिता दशास्यम्।<br>शरैः सशैलाञ्छकलीचकार त्रिभिस्त्रिभिः पातितवानिमांश्च॥9॥ |
| अथाङ्गतोऽङ्गीकृतगण्डशैलः प्रचण्डवेगोऽभिपपात रोषात्।<br>उदारवीर्य्यः प्रविदार्य्य तूर्ण्णं तं रावणः पातितवाञ्छरेण॥10॥ |
| उग्रं दशग्रीवमथाभ्यरौत्सीत् सुग्रीव उच्चैः प्रगृहीतवृक्षः।<br>छित्वा तरुं तस्य विदार्य्य कण्ठं शरेण तं पातितवान् दशास्यः॥11॥ |
| भुजं भुजङ्गाभमथोन्नमय्य तं रावणं ताडितवान् हनूमान्।<br>सर्वाननेभ्योऽस्य जगाल रक्तं धातुद्रवोऽद्रेरिव कन्दरेभ्यः॥12॥ |

स मूर्च्छितस्तत्र मुहूर्त्तमुग्रः सञ्ज्ञां गतो विस्मित आबभाषे।
न पौरुषे स्यात् पुरुषो भवादृक् को मोहयेन्मां भुवनेऽन्य एवम्॥ 13॥

लीलाप्रहारोऽयमरे नराश तस्मात् पुनर्ज्जीवसि दुर्ज्जन त्वम्।
त्वां नन्वहं शोणितपङ्कपेषं न पिष्टवानित्यवदद्धनूमान्॥ 14॥

मत्तोऽसि मत्तोऽपि गृहाण वीर मुष्टिप्रहारं त्वमथेत्युदीर्य्य।
सर्वौजसा सर्वजयी दशास्यः सन्ताडयामास मीरसूनुम्॥ 15॥

मरुत्सुते विह्वलवन्निषण्णे मा याहि चोरेति मुहुर्ब्रुवाणे।
लब्धान्तरोऽस्मीति ययौ विचिन्त्य किरन् शरान् नीलसनीळमेषः॥ 16॥

अप्यात्ममुक्तेषु विदारितेषु नगेषु नीलो ध्वजमारुरोह।
दशाननस्याथ धनूरथाश्वानाचक्रमे तस्य शिरांसि चाऽऽशु॥ 17॥

निरीक्ष्य तं राक्षसराट् चुकोप ननाद नीलोऽथ च कोपयंस्तम्।
जळीकृतस्तेन स रावणोऽलं सराघवास्ते हरयोऽहसंश्च॥ 18॥

मा गाः कपे कौतुकमात्मलौल्यान्मद्विद्धमात्मानमव प्रभुश्चेत्।
इत्थं ब्रुवाणो धनदानुजोऽयमाग्नेयमस्त्रं प्रमुमोच तस्मै॥ 19॥

अग्नेस्तनूजः स्वयमग्निभावान्ममार नास्त्रेण पतंश्च भूमौ।
तं रावणं राममभिद्रवन्तं रुरोध सौमित्रिरमित्रहन्ता॥ 20॥

दिष्ट्याऽसि दृष्टो विगतायुरद्य मर्त्येति मर्त्याशननाथ ऊचे।
शूरा न गर्ज्जन्ति निशाचरेति धुन्वन् धनुर्ल्लक्ष्मण आचचक्षे॥ 21॥

सप्तार्च्चिराभानथ सप्त बाणान् निशाचरेशो निशितान् मुमोच।
चिच्छेद रामावरजः शरैस्ताञ्छरानमुञ्चच्च दशाननाय॥ 22॥

तान् रावणश्चाच्छिनदाशु बाणैरमुञ्चतां तावथ बाणसङ्घान्।
धनुर्द्धराणां प्रवरौ धराण्यं जिगीषया लक्ष्मणराक्षसेन्द्रौ॥23॥

स्वयम्भुवा दत्तममोघमुग्रं स रावणो बाणवरं मुमोच।
स लक्ष्मणस्यादलयल्ललाटं पपात सौमित्रिरवाप्तमोहः॥24॥

रथादवप्लुत्य स रावणोऽपि क्षणादभिद्रुत्य बलाच्चकर्ष।
यावत् स तावत् स्मरति स्म रूपं शेषं निजं शेषशयानुजन्मा॥25॥

विंशाद्भिरप्यात्मभुजैः प्रगृह्य दुष्टेन कृष्टोऽपि चचाल नायम्।
गिरिस्तनी सप्तसमुद्रवस्त्रा मही चकम्पे महिळेव भीता॥26॥

भूमण्डलं सर्षपकल्पमल्पं विभाति पाताळसमेतमेतत्।
सहस्रमूर्ध्नोऽस्य बतैकमूर्द्धि प्रसह्य को नाम हरेत् तमेनम्॥27॥

क्रुद्धोऽभिनिष्पत्य मरुत्तनूजः प्रोद्यम्य मुष्टिं प्रजहार घोरम्।
सर्वैर्म्मुखैः शोणितमुद्गिरन् स पौलस्त्यपुत्रो मृतवत् पपात॥28॥

सौमित्रिमार्त्तं पतितं विलोक्य प्रेमाकुलात्मा प्रतिगृह्य दोर्भ्याम्।
निन्ये हनूमान्परमोपकण्ठं मातेव पोतं जनकोपकण्ठम्॥29॥

स्पृष्ट्वा कराभ्यां करुणाकरस्तं मग्नं ललाटे शरमुज्जहार।
स राहुमुक्तेन्दुरिवाऽर्त्तिमुक्तो रराज सौमित्रिरुदारकान्तिः॥30॥

अवाप्य सञ्ज्ञामवलम्ब्य धैर्य्यं स रावणो राघवमाससाद।
मदप्रमादप्रतिमुष्टदृष्टिर्म्मतङ्गजः सिंहमिवाप्रसह्यम्॥31॥

भोगीन्द्रभोगप्रतिमं प्रतीप्तं सन्धाय विस्फार्य्य धनुर्द्धुनानः।
अविस्मितः स स्मितवानदीनां जगाद वाणीं जगदेकनाथः॥32॥

स्वयम्भुवं वा भुवनाभिपूज्यं स्वयं भवं वा शरणं गतस्त्वम्।
न मोक्ष्यसे राक्षस सर्वथाऽपि कृतापराधः समरोद्यमी स्याः॥33॥

एवं ब्रुवाणं भुवनप्रभुं तं प्राभञ्जनिः प्राञ्जलिराबभाषे।
शत्रौ रथस्थे सति नात भूमौ न तिष्ठ शीघ्रं मयि तिष्ठ हीति॥34॥

ओमित्यथोक्त्वा पुरुषः पुराणः स मारुतिं मङ्क्षु समारुरोह।
स रावणो राघवमाप्य बाणैर्दिशो दश द्राक् तिमिरीचकार॥35॥

संरम्भसम्भिन्नमना दशास्यः शरान् मुमोचानिलनन्दनाय।
हनूमतोऽवर्द्धत तैः स्वतेजः प्राज्यैरिवाऽज्यैर्ज्वलतो महाग्नेः॥36

प्रहस्यरामः प्रदरप्रवेकैः सप्तींश्च सूतं च निहत्य सद्यः।
ध्वजं रथं छत्रमुतातिचित्रं चिच्छेद हेतीश्च दशाननस्य॥37॥

शरेण विध्वा विवशां विधाय शरीरयष्टिं शतमन्युशत्रोः।
चकर्त कार्त्तस्वरभास्वरं सरत्नं किरीटं सुरकीर्त्यकीर्त्तिः॥38॥

तं निर्विषाशीविषवद् विषण्णं कर्त्तव्यमूढं भगवान् बभाषे।
अनुज्ञया मे पुरमङ्ग याहि शरार्द्दितो नन्वधुना हि राजन्॥39॥

भोगानशेषाननुभुङ्क्ष्व शीघ्रं प्रेष्ठं जनं तोषय तोषणीयम्।
अप्यप्रमत्तः कुरु सर्वकृत्यं रणाय शीघ्रं मरणाय चैहि॥40॥

वाणीमुदारामिति राघवस्य निशम्य यातो नगरीं दशास्यः।
स्मरन्नसह्यान् रघुनाथबाणांश्चिन्तामनन्तां मनसा जगाम॥41॥

स वायसो हंसमिवातिमूढो मत्तो महासिंहमिवेभराजः।
अहिर्विहङ्गेन्द्रमिवाभियुद्ध्य देवं दशास्यः परितापमाप॥42॥

दशमुखविशिखैः शिखिप्रकाशैरपरशरैरपि पातितान् प्लवङ्गान्।
प्रभुरमृतमयैरपाङ्गपातैरकृत निरस्तरुजः स रामदेवः॥43॥

इति श्रीनारायणपण्डिताचार्य्यविरचिते रामाङ्के सङ्ग्रहरामायणे युद्धकाण्डेऽष्टमः सर्ग्गः॥6-8-43॥

[आदितः श्लोकाः 2582+43=2625]

## नवमः सर्ग्गः ॥6-9-79॥

कुम्भकर्ण्णाग्रजः क्रुद्धः कुम्भकर्ण्णप्रबोधने।
रक्षसामयुतं भीममादिदेश वलीयसाम्॥1॥

भेरीशङ्खादिवाद्यानां भूरिणां भूरिभिः स्वनैः।
ते सन्नादैश्च युगपन्न शेकुस्तत्प्रबोधने॥2॥

श्वासवेगैः पतन्तोऽस्य कृच्छ्रेणान्तिकमागताः।
शैलैः खड्गाद्यायुधैश्च जघ्नुस्ते रावणानुजम्॥3॥

अङ्गे तुङ्गाद्रिसङ्काशे खरैरुष्ट्रैर्ग्गजादिभिः।
समन्तात् परिधावन्तो नदन्तो नाप्यबोधयन्॥4॥

केचित् केशान् परे श्मश्रु लोमान्यप्युदमूलयन्।
शातकुम्भैरथाम्बांसि सिञ्चिन्ति स्मास्य कर्ण्णयोः॥5॥

अप्रबुद्धं प्रयत्नेन संरम्भात् ते निशाचराः।
पुनरेवाऽयुधैर्घोरैश्चिच्छिदुः क्रोधमूर्च्छिताः॥6॥

निद्रावशो भुजेनैव कुम्भकर्ण्णो युयोध तान्।
पुनश्च च्छिद्यमानाङ्गः कथञ्चित् प्रत्यबुध्यत॥7॥

| |
|---|
| स जृम्भमाणः सहसा प्रोत्थितो बुभुजे बहून्।<br>मांसराशीन् सरुधिरान् पूर्वमेवोपकल्पितान्॥ 8॥ |
| द्विसहस्रकरीरेषु पूर्णां पीत्वाऽथ वारुणीम्।<br>ज्येष्ठेन प्रेषितः प्रायात् कुम्भकर्णः सभातळम्॥ 9॥ |
| दशाननं वन्दमानः कुम्भकर्णोऽब्यभाषत।<br>त्रयाणां कतमं लोकं संहराणि क्षणादिति॥ 10॥ |
| न भयंलोकपालैर्न्नो भयं तु नरवानरैः।<br>रामः सलक्ष्मणो वध्यस्त्वयेत्यूचे स रावणः॥ 11॥ |
| सकलं कलहस्याथ कारणं श्रुतवानयम्।<br>कुम्भकर्णोबभाषे तं नीतिमान् निःश्वसन् मुहुः॥ 12॥ |
| रामेणामेघवीर्य्येण विग्रहोऽयमुपस्थितः।<br>अचिरान्मरणायात्र नराकाय परत्र च॥ 13॥ |
| बलिना सन्धिरल्पस्य बलिनोऽल्पेन विग्रहः।<br>औदासिन्यं समेन स्यादिति शास्त्रविनिश्चयः॥ 14॥ |
| अनयं त्वं समाश्रित्य प्राप्तो रामेण विग्रहम्।<br>शर एको दहेद् यस्य त्रैलोक्यं सचराचरम्॥ 15॥ |
| कुम्भकर्णगिरं श्रुत्वा रावणो वाक्यमब्रवीत्।<br>त्वादृशैर्बन्धुबिर्ग्गुप्ता राजानः किं न कुर्वते॥ 16॥ |
| पाल्योऽहं हि त्वया वत्स त्वद्बलेन किमन्यथा।<br>ज्येष्ठं गुरुं कथं त्वं मामवजानासि मूर्खवत्॥ 17॥ |

| |
|---|
| अग्रजेनैवमुक्तः स विग्रहायोग्रमानसः।<br>त्रिशिखं शूलमुद्धृन्वन्नुदतिष्ठत् स निष्ठुरः॥18॥ |
| मद्बन्धुनिधनस्याद्य कृत्वा निष्कृतिमुत्तमाम्।<br>प्रसादयेयं राजंस्त्वां व्येतु ते हृदयज्वरः॥19॥ |
| कबळत्रितयार्थं स्यात् कथञ्चिद् भुवनत्रयम्।<br>सप्ताब्धयोऽनुपानार्थमित्युक्त्वा स ययौ युधे॥20॥ |
| एकाकिना न गन्तव्यं सर्वे याम वयं युधे।<br>सीता विलोभ्या मायाभिरित्युवाच महोदरः॥21॥ |
| महोदरं विनिर्भर्त्स्य रावणं प्रतिनन्दयन्।<br>सम्पूजितो रावणेन प्रययौ रावणानुजः॥22॥ |
| स पञ्चयोजनोत्सेधं प्राकारमतिलङ्घयन्।<br>निर्ग्गम्य नगरात् तस्मात् कपिसैन्यमवैक्षत॥23॥ |
| नानायुधधरा वीरा नानावाहनसंस्थिताः।<br>तमन्वयू राक्षसेन्द्राश्चतुरङ्गबलैर्वृताः॥24॥ |
| बहुयोजनविस्तीर्ण्णं ततश्चाभ्यधिकोऽच्छ्रयम्।<br>कालाम्बुदप्रभतनुं कालान्तकयमोपमम्॥25॥ |
| महाकटककेयूरकोटिरादिविभूषणम्।<br>करौ च परिघाकारौ व्यापयन्तं दिशो दश॥26॥ |
| पादाभ्यामतिभीमाभ्यां दारयन्तमिवावनिम्।<br>वृत्ताभ्यां ताम्रनेत्राभ्यां विसृजन्तं महानलम्॥27॥ |

दंष्ट्राभ्यां क्षुरधाराभ्यां खण्डयन्तमिवाखिलम्।
महागुहावद् गहनं व्याददानं महाननम्॥28॥

ग्रसन्तमिव लोकांस्त्रीन् भूरिसंरम्भसम्भृतम्।
महाट्टहासप्रक्ष्वेळं घनाघनघनस्वनम्॥29॥

क्व द्रुता वानराः क्षुद्राः क्व रामः क्व च लक्ष्मणः।
आस्फोटयन्तमित्युक्त्वा मनोमारुतरंहसम्॥30॥

कुम्भकर्णं तथा दृष्ट्वा जम्भारेश्च भयङ्करम्।
दुद्रुवुः कपिसङ्घास्ते चापमुक्ता इवेषवः॥31॥

सेतुमत्यगमन् केचित् केचित् सेतुमुपागमन्।
केचिन्निलीन वृक्षेषु पतिताः केचन क्षितौ॥32॥

युवराजोऽङ्गदो दृष्ट्वा निजसैन्यं भयाकुलम्।
नळादीन् द्रवतः प्रोचे वीर्य्यौदार्य्ययुतं वचः॥33॥

भुवनानां प्रभौ रामे नाथेऽस्मिन्नभयङ्करे।
वानराः षण्ढतिलवत् कुत्र द्रवथ विक्लबाः॥34॥

इत्यङ्गदोदितं श्रुत्वा निवृत्त्य कपिपुङ्गवाः।
सालशैलशिलाहस्ताः कुम्भकर्णमथाभ्ययुः॥35॥

कुम्भकर्णानुगास्तूर्णं वानरानतुदञ्छरैः।
कपयो विविदाद्यास्तान् कुपिताः समसूदयन्॥36॥

तस्मै सालशिलाशैलान् वानराः प्रतिचिक्षिपुः।
कुम्भकर्णाङ्गसङ्घात् ते चूर्णिताः पांसुपिण्डवत्॥37॥

| |
|---|
| शतानि सप्तचाष्टौ च सहस्राणि च वानरान्।<br>युगपत् प्रतिनिष्पिष्य कुम्भकर्णो न्यपातयत्॥38॥ |
| षोडशाष्टौ च दश च विंशत् त्रिंशत् तथाऽपरान्।<br>परिगृह्य स पाणिभ्यां खादङ्खादं स्म धावति॥39॥ |
| अभ्यापतितदर्शं स निनायादर्शनं कपीन्।<br>रणरङ्गानुपातं च द्रुतवेदं स्म तिष्ठति॥40॥ |
| क्षिप भक्षय पिङ्गोर्व्यां प्रतिदारय पातय।<br>वानरान् स नराहार इत्थं भूयो व्यनीनशत्॥41॥ |
| ततः शतवलिं श्वेतं सम्पातिपनसावपि।<br>उन्मुखान् दुर्मुखमुखान् राक्षसोऽभक्षयत् कपीन्॥42॥ |
| क्षणात् पिपेष पाणिभ्यां जयन्तकुमुदावुभौ।<br>गर्जन्नास्फोट्य युद्धार्थी ददर्शाऽऽशु दिशो दश॥43॥ |
| गजं गवाक्षं गवयं वृषाख्यं गन्धमादनम्।<br>तारनीलनळान् योद्धून् मुष्टिघातैरपातयत्॥44॥ |
| युवराजयुतो राजा वीक्ष्य तं पृतनाक्षयम्।<br>अभ्यधावदभिक्रुद्धो जाम्बवांश्चापरैः सह॥45॥ |
| सालशैलशिलावर्षं चक्रुस्ते कपयस्त्रयः।<br>चूर्णीबभूवुस्तेऽस्याङ्गे नैवाकम्पत राक्षसः॥46॥ |
| अथ पर्वतमुत्पाट्य तस्मै चिक्षेप तापनिः।<br>तमेवाद्रिं कपीन्द्राय कुम्भकर्णोऽक्षिपद्धसन्॥47॥ |

| |
|---|
| तपनस्य सुते तस्मिन् पतिते पर्वताहते।<br>अङ्गदो जाम्बवांश्चैनं सङ्क्रुद्धावभ्यधावताम्॥48॥ |
| तळताडनमात्रेण कुम्भकर्णौ निपात्यतौ।<br>मूर्च्छितं द्रुतमादाय भास्करीं राक्षसो ययौ॥49॥ |
| नयन्तं कपियूथेशं प्रयान्तं च निजां पुरीम्।<br>तं सूक्ष्ममक्षिकारूपः क्षिप्रं मारुतिरन्वगात्॥50॥ |
| बाध्यते चेदयं राजा मोचयेयं बलादिमम्।<br>स्वयं चेन्मोचयेच्छ्रेय इत्थं हनुमतो मतम्॥51॥ |
| विवेश बिभ्रत् सुग्रीवं लङ्कां लङ्केश्वरानुजः।<br>प्रहृष्टै राक्षसगणैस्तत्रतत्राभिपूजितः॥52॥ |
| पूजयाद्भिः कुम्भकर्णं स्रग्गन्धैस्तुहिनाम्बुभिः।<br>आसिच्यमानः सुग्रीवः शनैः सञ्ज्ञामवाप्तवान्॥53॥ |
| कुम्भकर्णस्य कर्णौ स कराभ्यां तूर्णमच्छिनत्।<br>नासिकां चाऽऽशु दशनैः सुग्रीवोऽथोत्पपात च॥54॥ |
| कुम्भकर्णोऽथ सम्भ्रान्तस्तळेनैनमताडयत्।<br>पिपेष च पुनः पृथ्व्यां सोऽङ्गुल्यन्तरतो ययौ॥55॥ |
| अमोघं शूलमशनैः प्राक्षिपद् राक्षसाधिपः।<br>कालदण्डप्रचण्डाभं कपिराजजिघांसया॥56॥ |
| जग्राह हनुमान् मङ्क्षु खमाप्लुत्य महायुधम्।<br>जानुनि न्यस्य तच्छित्वा जहास च ननाद च।57॥ |

| |
|---|
| ततः क्रुद्धः कुम्भकर्णो मुष्टिमावृत्य सत्त्वरम्।<br>विशाले प्रजहारोच्चैर्वायुनन्दनवक्षसि॥58॥ |
| अचिन्तयंस्तस्य परं प्रहारं नदन् हनूमान् प्रजहार चैनम्।<br>तन्मुष्टिपिष्टः स पपात दुष्टो वज्रप्रभिन्नोऽद्रिरिवातितुङ्गः॥59॥ |
| सञ्ज्ञामवाप्याथ च कुमभकर्णः संरम्भनिर्य्यद्भ्रुकटीकठोरः।<br>तुङ्गं गिरेः शृङ्गमथ प्रगृह्य चचार दण्डीव स दण्डपाणिः॥60॥ |
| जघास कांश्चिन्निजघान कांश्चिच्चिक्षेप कांश्चित् स पिपेष कांश्चित्।<br>कपीनकम्प्यो विगतानुकम्पः प्रकम्पयन् गामपि कुम्भकर्णः॥61॥ |
| ते भक्ष्यमाणा हरयो निरीयुः स्त्रोतोभिरन्येऽस्य च रोमकूपैः।<br>सहस्त्रशः साहसिनः पुनश्च तमेव हन्ताऽऽरुरुह्युय्यथाऽद्रिवम्॥62॥ |
| स रक्तगन्धेन विवृद्धदर्प्पः प्रभक्षयन् राक्षसवानरौघम्।<br>रघुप्रवीरं विभयोऽभिधावन् स्वानां परेषां च भयङ्करोऽभूत्॥63 |
| वज्रोपमैर्बाणगणैरगण्यैः सौमित्रिरेनं प्रबिभेद वीरः।<br>अचिन्तयंस्तान् प्रययौ सुरारिः सृणिप्रहारानिव मत्तहस्ती॥64॥ |
| क्षिप्रं च चिक्षेप स राक्षसेन्द्रः शृङ्गं गिरेर्मङ्गलकीर्त्तनाय।<br>चिच्छेद तच्छीघ्रमतुच्छकीर्त्तिः स सत्वरं सप्तभिरेव बाणैः॥65॥ |
| स रामबाणैरथ भिन्नवर्म्मा रक्तं पिबन् राक्षसवानराणाम्।<br>सकोपमाटोपमुपाजगाम कपीन् विधुन्वन् मुहुरङ्गलग्नान्॥66॥ |
| एह्येहि किं ते कपिकालनेन नन्वस्मि देवारिनिसूदनोऽहम्।<br>इति ब्रुवाणो भगवानुदारो विश्फारयामास धनुः सुधन्वा॥67॥ |

| |
|---|
| नाहं विराधो न खरो वराको नाम्नाऽस्म्यहं राघव कुम्भकर्णः।<br>बाहू इमौ पश्य महेन्द्रभीमावुक्त्वेति रामं स खलोऽभ्यधावत्॥68॥ |
| तौ कुम्भकर्णस्य करावुदीर्णावुदीक्ष्य देवा दिवमुल्लिखन्तौ।<br>भियाऽपयाताः सहसोपयाता रामो हि नः पालक इत्युदीर्य॥69॥ |
| देदीप्यमानानलसन्निकाशैः सुवर्णपुङ्खैश्च सुपर्णवेगैः।<br>रामः शरौघैः प्रबिभेद शूरः सतां शरारोर्द्विषतः शरीरम्॥70॥ |
| उद्यच्छतो मुद्गरमुग्रमूर्त्तेः काण्डेन दोर्दण्डमखण्डयत् सः।<br>महीयसीं व्याप महीं स बाहुर्म्महामहीभृच्छिखरोपमानः॥71॥ |
| उन्मूल्य सालं विपुलं परेण हस्तेन हस्तीन्द्रवदाद्रुतस्य।<br>पौलस्त्यपुत्रस्य परं च बाहुं चिच्छेद तीव्रेण शरेण रामः॥72॥ |
| उद्गर्ज्जतोऽभिद्रवतः परस्य क्रोधाज्जिघांसोः प्रपदप्रहारैः।<br>सम्पूर्णचन्द्राभमुखोऽदर्थचन्द्रौ विमुच्य पादौ च चकर्त शत्रोः॥73॥ |
| ते कौम्भकर्णा भुवि हस्तपादा लोठन्त उच्चैः कठिनाद्रितुल्याः।<br>अनीकिनीं तां कपिराक्षसानामक्षोभयन्नम्बुनिधिं पुरं च॥74॥ |
| अहस्तपादोऽपि विवृत्य वक्त्रं महागुहाभं स समुद्रनादः।<br>अभ्यापतत् तं ग्रसितुं तदोग्रं शरैरपूरि प्रभुरस्य वक्त्रम्॥75॥ |
| परेण घोरेण शरेण रामः स्वच्छेन चिच्छेद बृहच्छिरोऽस्य।<br>उद्दीप्तनेत्रं कटुदंष्ट्रमस्य पतच्छिरो भूरि बिभेद भूमिम्॥76॥ |
| तिलक्षमानः खलु योजनानां स कुम्भकर्णो ववृधे पुरस्तात्।<br>सङ्कोचमाप्तो नगरीं प्रवेष्टुं निसूद्यमानो ववृधे पुरेव॥77॥ |

चिक्षेप तद्राक्षसदेहमब्धौ शरैः शरण्यो जगतां सलीलम्।

शरीरपातादुदगान्महाब्धिर्म्महाश्मपातादिव पल्वलाम्भः ॥78॥

करटकटककाळं भीषणं प्राणभाजां

भुवनभवनपूर्णं कुम्भकर्णच्छलेन।

तिमिरमहरदेवं रामभानुः शरोस्त्रैः

सुरमुनिनिकरस्तं पूजयामास पुष्पैः ॥79॥

इति शीनारायणपण्डिताचार्य्य विरचिते रामाङ्के सङ्ग्रहरामायणे युद्धकाण्डे नवमः सर्ग्गः ॥6-9-79॥

[आदितः श्लोकाः 2625+79=2704]

## दशमः सर्ग्गः ॥6-10-53॥

रावणो निहतं श्रुत्वा भ्रातरं भ्रातृवत्सलः।

मुहूर्तं मूर्छितः प्राप्य मनीषां विललाप सः॥1॥

हा वत्स कुम्भकर्ण त्वं कुत्र यासि मया विना।

अनुयास्याम्यहं च त्वां रामबाणाग्निदीपितः॥2॥

कुलभूषणभूतो नः सत्यवादी विभीषणः।

मया कामात्मना त्यक्तः सद्यः पश्यामि तत्फलम्॥3॥

विलपन्तं विषण्णं तमवलोक्य सुरेन्द्रजित्।

मेघनादो जगादोच्चैर्म्मेघसन्नादिनीं गिरम्॥4॥

नरराजसुताद् भीतो देवराजजितः पिता।

मा भूदित्थं परिवादो मामादिश युधे द्रुतम्॥5॥

इत्युक्त्वा तातमापृच्छ्य सन्नद्धो युद्धकर्म्मणे।
चकार रुद्रदेवात्यमभिचारं महेन्द्रजित्॥6॥

शरबर्हिः शोणवासा वह्नौ वैभीतकेध्मवान्।
कार्ष्णायसस्रुवस्छागं सर्वकृष्णं जुहाव सः॥7॥

स हुत्वाऽऽथर्वणैर्म्मन्त्रैर्द्दिव्यं रथमधिष्ठितः।
गच्छन् गगनमार्ग्गेण माययाऽन्तर्द्दधे खलः॥8॥

स शरैरशनिप्रख्यैर्द्दिव्यैर्न्नागास्त्रमन्त्रितैः।
राघवौ वानरांस्तांश्च च्छादयामास राक्षसः॥9॥

दिदृक्षमाणाः प्रक्षीणा राक्षसं रूक्षविक्रमम्।
क्षोभयन्तोऽपि गगनं नापश्यन् वानरा रिपुम्॥10॥

शरैराशीविषाकारैरसङ्ख्यैः सङ्ख्यपण्डितः।
रावणिर्द्दारयामास वानरांस्तान् महाबलान्॥11॥

बध्वाऽऽशीविषपाशैस्तान् कपीन् सर्वान् सलक्ष्मणान्।
शक्रशत्रुः पुरीं प्राप्य मुमुदे रावणान्वितः॥12॥

नामोचयन् नागबन्धाद् राममारुतिलक्ष्मणाः।
देवगुह्यमनुस्मृत्य समर्त्था अपि वानरान्॥13॥

विद्धवद् बद्धवद् रामो मुग्धवत् क्षतजार्द्रवत्।
दर्शयामास पापानां मोहनायाखिलेश्वरः॥14॥

मायासीतामुपादाय राक्षस्यो रावणाज्ञया।
अदर्शयन् दशामेतां त्रिजटा तामसान्त्वयत्॥15॥

शक्रारिणा शर्ववरात् पातितेषु कपिष्वपि।
सप्तद्वीपवतीं पृथ्वीं कम्पयन् वायुराववौ॥16॥

आ जानुतः स्वर्णवर्णा आ नाभेर्हारगौरभाः।
माणिक्यशोण आ कण्ठादा केशाद्धितप्रभः॥17॥

नीलकेशो लसन्माल्यश्चारुचन्दनचर्च्चितः।
अष्टभिर्भोगिभिः पुष्टैर्भूषितो मणिमौलिभिः॥18॥

पत्राभ्यां चित्रवर्णाभ्यां मुञ्चाद्भ्यां च सुधाकणान्।
कालयन् नागपूगं तं चारुचञ्चुः सुलोचनः॥19॥

ब्रुवाणो जय रामेति दृष्टः स्पष्टं प्लवङ्गमैः।
ववन्दे परमानन्दं गरुडो गरुडध्वजम्॥20॥

कालिताः काद्रवेयास्ते पक्षवातेन पक्षिणः।
तद्दर्शनस्पर्शनाभ्यां वानरा बलिनोऽभवन्॥21॥

शुश्रूषां गरुडः कृत्वा राममामन्त्र्य यातवान्।
सालशैलशिलाहस्ता उदगर्जन् प्लवङ्गमाः॥22॥

आकर्ण्य कपिसिंहानां सिंहनादं भयानकम्।
अस्त्रमोक्षं विनिश्चित्य त्रस्तौ रावणरावणी॥23॥

आथर्वणविधानेन हुत्वा हुतवहं मुहुः।
अदृश्यो रथमध्यास्य ययावाकाशवर्त्मना॥24॥

शर्वशम्भुवराद् गर्वी पूर्ववत् सर्ववानरान्।
नागभोगैर्दृढं बध्वा रावणं रावणिर्य्ययौ॥25॥

| |
|---|
| राक्षसेन्द्रो महेन्द्रारिमभ्यनन्दत् स्वनन्दनम्। कृतकार्य्यं महावीर्य्यं प्रशशंस च सादरम्॥26॥ |
| जिज्ञासुः पुरि वृत्तान्तं पूर्वं यातो विभीषणः। रणभूमिं तदा प्राप्तो ददर्श पतितान् कपीन्॥27॥ |
| अपश्यन्नुत्थितं कञ्चिद् रात्र्यां रात्रिचरेश्वरः। कोऽत्राविपन्न इत्युच्चैरुवाच जलदस्वनः॥28॥ |
| अहमस्मीति हनुमान् ब्रुवन्नुपससार तम्। अलातं भ्रामयन्तौ तौ कपीन् विष्वगपश्यताम्॥29॥ |
| सुग्रीवाङ्गदनीलादीन् भग्नाङ्गान् रुधिरोक्षितान्। दृष्ट्वाऽन्यांश्चोपययतुर्जाम्बवन्तं विमोहितम्॥30॥ |
| आश्वासयन् जाम्बवन्तमम्बुसेकैर्विभीषणः। किं जीवसीत्युवाचाऽरान्मन्दम्मन्दं स चाब्रवीत्॥31॥ |
| अञ्जना सुप्रजा येन स किं जीवति पावनिः। तस्मिन् जीवति जीवामो मृते तस्मिन् मृता वयम्॥32॥ |
| इत्युक्त ऊचे पौलस्त्यः कस्मात् पुच्छसि मारुतिम्। न लक्ष्मणं न सुग्रीवं नाङ्गदं मतिमन्निति॥33॥ |
| इत्युक्तो ब्रह्मजः प्रोचे हनूमान् यदि जीवति। स्वतेजसा पालयेन्नो नास्त्यन्यः शक्तिमानिति॥34॥ |
| आर्य्य जीवाम्यहमिति ब्रुवाणो वायुनन्दनः। उपसृत्य तमस्प्राक्षीचङ्क्रेण स्वपाणिना॥35॥ |

| |
|---|
| अताब्रवीद् ब्रह्मसुतो वत्स स्वज्ञातिवत्सल।<br>मृतं कपिकुलं रक्ष रामदासाग्रणीर्भवान्॥36॥ |
| समीपे मेरुशैलस्य शैलो यो गन्धमादनः।<br>तस्मादानीयतां शीघ्रं त्वयौषधचतुष्टयम्॥37॥ |
| मृतसञ्जीवनी मुख्या सन्धानकरणी परा।<br>सवर्ण्णकरणी चैव विशल्यकरणीति च॥38॥ |
| इतुक्तो हनुमान् नत्वा रामं रामप्रियामपि।<br>ववृधे पर्वताग्रस्तो द्वितीय इति पर्वतः॥39॥ |
| अतुच्छं पुच्छमाविद्य कर्ण्णावाकुञ्च्य पूर्ण्णभाः।<br>धराधरमवष्टभ्य दीरोऽसावथ पुप्लुवे॥40॥ |
| सप्तद्वीपवती पृथ्वी चकम्पे तेन पीडिता।<br>शाखेव शाखिनः स्निग्धा पल्लवावलिशालिनी॥41॥ |
| प्रासादशिखरादीनि लङ्कायां भङ्गमाययुः।<br>निष्पीडिते त्रिकूटे च मारुतेः पातरंहसा॥42॥ |
| मृता केचित् परे मुग्धा रुरुदु राक्षसाः परे।<br>कर्त्तव्यमूढा अपरे लङ्काकम्पनकम्पिताः॥43॥ |
| स द्वितीय इवाऽदित्य आदित्यपथमेयिवान्।<br>अतिदीर्घमथाध्वानं हनुमानत्यवर्त्तत॥44॥ |
| योजनानामर्द्धलक्षमतीत्यायत्नतो द्रुतम्।<br>असङ्ग एकपातेन प्रापासौ गन्धमादनम्॥45॥ |

| |
|---|
| औषधानि विलीनानि ज्ञात्वा क्रुद्धो मरुत्सुतः।<br>गिरिमेवोज्जहारैनं शतयोजनमण्डलम्॥46॥ |
| तं गिरिं काञ्चनमयं प्रतिदीप्तमहौषधम्।<br>प्रतिगृह्याऽपपाताथ रामं रामप्रियाग्रणीः॥47॥ |
| लीलयोत्तोलयन्नद्रिं कराग्रे कन्दुकायितम्।<br>विरराज वियत्येष वीरराजो जगत्त्रये॥48॥ |
| निन्ये निमेषमात्रेण स यावद् गन्धमादनम्।<br>उदतिष्ठन् कपिगणास्तावदौषधवायुना॥49॥ |
| जीवनं च्छिन्नसन्धानं विशल्यत्वं सवर्णताम्।<br>चतुर्णामौषधानां ते गन्धसामर्थ्यतोऽगमन्॥50॥ |
| स देवतानामभयङ्करात्मा भयङ्करो दैवतशात्रवाणाम्।<br>बभौ गिरिं बिभ्रदहो हनूमान् त्रिविक्रमश्चक्रधरो यथा प्राक्॥51॥ |
| सौमित्रिसुग्रीवविधातृनन्दना आनन्दिनः साङ्गदनीलपूर्वकाः।<br>धराधरेन्द्रं दधतं तमार्चयन् धरां दधानं विबुधा यथा हरिम्॥52 |
| समधिकपरिरब्धो रामदेवस्य दोर्भ्यां स्तुवदमरविमुक्तैर्भूषितः पुष्पपूगैः।<br>समरभुवि स तिष्ठन् क्षेपणेनैव चक्रे पवनतनयएनं पूर्ववत् पर्वतेन्द्रम्॥53॥ |
| इति श्रीनारायणपण्डिताचार्य्यविरचिते रामाङ्के सङ्ग्रहरामायणे युद्धकाण्डे दशमः सर्गः ॥6-10-53॥<br>[आदितः श्लोकाः 2704+53=2757] |

## एकादशः सर्गः ॥6-11-73॥

| |
|---|
| उत्थितैरुद्धतैर्वीरैरुद्वणैः सर्ववानरैः।<br>सिंहनादः कृतो घोरः सद्यो लङ्कामकम्पयत्॥1॥ |
| रावणस्य नियोगेन रावणिः पुनरुत्कटः।<br>निर्य्ययौ रथमद्यास्य तर्प्पयित्वा हुताशनम्॥2॥ |
| शर्वशम्भुवराद् गर्वी पूर्ववत् सर्ववानरान्।<br>बबन्ध नागौ शक्रारिस्तन्न सेहेऽथ लक्ष्मणः॥3॥ |
| रामानुजोऽब्रवीद् रामं देवाहं ते प्रसादतः।<br>सूदयिष्यामि शक्रारिं ब्रह्मास्त्रेण क्षणादिति॥4॥ |
| भयाददृश्ये ब्रह्मास्त्रं न मोक्तव्यं विपश्चिता।<br>हन्यां शरेण शक्रारिमिति रामोऽब्रवीदिमम्॥5॥ |
| रामो गरुडमारुत्योर्बलं दर्शयितुं पुरा।<br>अस्त्रबद्धवदास्ते स्म तदोग्रं शरमाददे॥6॥ |
| अद्राक्षीन्मामयं रामो घोरशक्तिरिति स्मरन्।<br>पलायत प्राणभयाद् रणं त्यक्त्वा स रावणिः॥7॥ |
| जय देव त्रिलोकैकभूषणारिविभीषण।<br>इति देवस्तदाऽस्तावि देवैरिन्द्रारिकालनात्॥8॥ |
| मृतकोपममालोक्य स्वसैन्यं करुणाकरः।<br>ज्ञानास्त्रेण ज्ञानमूर्त्तिः क्षणमात्रादबूबुधत्॥9॥ |

उत्तस्थुरुन्नदन्तस्ते सालशैलशिलाधराः।

हनूमन्तं पुरस्कृत्य लङ्कामभ्यद्रवन् रुषा॥10॥

रावणस्य नियोगेन रावणिः पुनरुत्कटः।

ससैन्यः पश्चिमद्वारे रथी धन्वी विनिर्ययौ॥11॥

हरयो हरिसङ्काशा युयुधुः शक्रशत्रुणा।

सृष्ट्वा स्वमायया सीताकृतिं तां निजघान सः॥12॥

दुःखाज्ञानविहीनोऽपि रामः स्वानन्दवारिधिः।

दर्शयामास दुःखादीन् नटवत् पटुचेष्टितः॥13॥

शक्रशत्रोः परिजनान् हत्वा मारुतिरुद्धतः।

प्रचण्डो गण्डशैलेन द्रावयामास रावणिम्॥14॥

भग्नादर्प्पो हनुमता जम्भारिद्विट् निकुम्भिलाम्।

प्राप्य होतुं हुतवहं चक्रे परममुद्यमम्॥15॥

विभीषणोऽब्रवीद् रामं रावणिर्वध्यतां द्रुतम्।

कृतहोमो ह्यवध्यः स्याद् ब्रह्मणोऽयं वरादिति॥16॥

महेन्द्रारिं जिघांसन्तं लक्ष्मणं लक्ष्मणाग्रजः।

आदिदेश हरीन्द्रांश्च समारुतिविभीषणान्॥17॥

पराद्रुतं नीचवृत्तिं रावणिं कूटयोधिनम्।

अजिघांसुः स्वयं रामः प्रेषयामास लक्ष्मणम्॥18॥

प्राप्ता निकुम्भिलाप्रान्तं ते विभीषणनीतितः।

निजघ्नू रक्षसां सैन्यं नियुक्तं शक्रशत्रुणा॥19॥

| |
|---|
| ऋक्षवानरवीराणां वृक्षशैलप्रहारतः।<br>लक्ष्मणस्य शरैश्चोग्रे रक्षसामभवत् क्षयः॥20॥ |
| ते विभीषणसौमित्र्योर्वाक्यतः कपयो रिपोः।<br>होमविघ्नं स्फुटं चक्रुर्हसन्तो बहुहेळनैः॥21॥ |
| कपिभिः कोपितस्तत्र रावणी रणदुर्म्मदः।<br>सालजालादथोत्पत्य रथी धन्वी व्यदृश्यत॥22॥ |
| रक्तास्यनयनः क्रुद्धो भिन्नाञ्जनचयोपमः।<br>कपीनद्रावयद् बाणैर्दण्डपाणिरिवापरः॥23॥ |
| कपीनां कालनं दृष्ट्वा कुपितो मारुतात्मजः।<br>राक्षसीमक्षिणोत् सेनां वृक्षवर्षैर्न्निरन्तरैः॥24॥ |
| जाज्वल्यमानः कोपेन कालज्वलनसप्रभम्।<br>अभ्यद्रवद्धनूमन्तं शरवर्षेण रावणिः॥25॥ |
| परश्वधान् पट्टसांश्च खड्गानन्यायुधान्यपि।<br>क्षणमात्रेण चिक्षेप शक्रशत्रुर्हनूमते॥26॥ |
| यद्यदायुधमत्युग्रं प्राक्षिपद् राक्षसात्मजः।<br>तच्छित्त्वाऽऽदाय हस्तेन हनूमान् हसितोऽब्रवीत्॥27॥ |
| यद्याखण्डलशत्रुस्त्वं पण्डको नासि वा यदि।<br>एह्येहि मारुतिकराज्जीवन् पाप न मोक्ष्यसे॥28॥ |
| बाहुभ्यामथ बाणैर्वा माययाऽमाययाऽथवा।<br>मद्वेगं सहसे चेत् त्वं कीर्त्तिं पूर्वमवाप्स्यसि॥29॥ |

तस्येत्युच्चैर्ब्रुवाणस्य बलं जानन् बलारिजित्।
अपक्रम्याभिमुखतः प्रययावपरान् युधे॥30॥

एतस्मिन्नन्तरे प्राह लक्ष्मणं स विभीषणः।
त्वरस्व हन्तुमिन्द्रारिं पुरा कर्म्मकृतेरिति॥31॥

अभ्यद्रवच्छक्रशत्रुं सौमित्रिः सविभीषणः।
मण्डलीकृतकोदण्डो मण्डयन् कपिमण्डलम्॥32॥

ज्ञातीन् सन्त्यज्य नीचांस्त्वं पितृव्य कथमाश्रितः।
इत्यब्रवीदिन्द्ररिपुः प्रहसंस्तं विभीषणम्॥33॥

पुत्र यूयं नरकिणां नीचानां सख्यमाप्स्यथ।
अहं विश्वेशदासः स्यामित्यूचे तं विभीषणः॥34॥

लक्ष्मण त्वं मुमूर्षुश्चेत् तिष्ट गच्छ न चेदिति।
उवाचाथ धनुर्द्दुन्वन् रावणी रामसोदरम्॥35॥

वाचा मायाविनां वीर्य्यं वीराणां कर्म्मणा ननु।
क्लीब तिष्ठ क्षणमिति स्पष्टमाचष्ट लक्ष्मणः॥36॥

अविद्ध्यत् पञ्चविंशद्भिर्विशिखैरथ लक्ष्मणम्।
पौलस्त्यमष्टादशभिर्न्नदन् पौलस्त्यनन्दनः॥37॥

पुनः शरशतेनाऽऽशु शक्रशत्रुर्विदार्य्य तौ।
उवाच पुरुषंवाक्यं ततश्चुक्रोध लक्ष्मणः॥38॥

सौमित्रिः पञ्च नाराचानमित्रोरस्यमज्जयत्।
त्रीन् बाणानुद्धणास्तस्मै व्यमुचद् रावणात्मजः॥39॥

| |
|---|
| धरायां धन्विनां श्रेष्ठौ वरिष्ठावस्त्रवेदिनाम्।<br>चिरं चित्रं युयुधतुस्तौ रामानुजरावणी॥40॥ |
| ततः शरशतेनाऽऽशु शक्रशत्रुं स लक्ष्मणः।<br>अदारयदुतारात्मा विषण्णोऽभूत् स रावणिः॥41॥ |
| इदमन्तरमिन्द्रारेर्वधायाऽशु प्रयत्यताम्।<br>इत्यूचे नीतिसम्पन्नो लक्ष्मणं स विभीषणः॥42॥ |
| स सौमित्रिरमित्राया शरान् शिखिशिखोपमान्।<br>मुमोच स दृढं विद्धो मुहूर्त्तं मूर्च्छितोऽपतत्॥43॥ |
| सञ्ज्ञामवाप्येन्द्ररिपुः कोपसंरक्तलोचनः।<br>तूर्णं शरशतं तस्मै लक्ष्मणाय मुमोच सः॥44॥ |
| पुनः शरशतेनाऽशु निर्बिभेद विभीषणम्।<br>वानरांश्च नराशेन्द्रः शरैराशीविषोपमैः॥45॥ |
| प्रहस्य लक्ष्मणो वीरो नैतत् किञ्चिदिति ब्रुवन्।<br>शरैर्विदारयामास कवचं शक्रवैरिणः॥46॥ |
| शूरः शरसहस्रेण मेघनादोऽपि लक्ष्मणम्।<br>सञ्छाद्य तस्य कवचं सञ्छिद्याऽपातयद् भुवि॥47॥ |
| दिशो दश शरव्रातैश्छादयामासतुस्तदा।<br>कृतप्रतिकृतोदारौ तौ रामानुजरावणी॥48॥ |
| सौष्ठवे लाघवे वीर्य्ये शौर्य्ये वेगे पराक्रमे।<br>अन्योन्यमतिशिश्याते धन्विनां प्रवरावुभौ॥49॥ |

| |
|---|
| आक्तौ रक्तेन महता धातुनेव धराधरौ।<br>अयुध्यतामस्त्रशस्त्रैरस्त्रशस्त्रविशारदौ ॥ 50 ॥ |
| अस्मिन् हते हतं सर्वं रावणस्यातुलं बलम्।<br>त्वरध्वं हरयो योद्धुमित्युवाच विभीषणः ॥ 51 ॥ |
| विभीषणस्य वचनात् कपयो जाम्बन्मुखाः।<br>दन्तैर्नखैश्च वृक्षैश्च राक्षसान् क्षयमानयन् ॥ 52 ॥ |
| विभीषणस्यानुचरा विभीषण उत स्वयम्।<br>भीषणं विदधुर्युद्धं भीषणैरिन्द्रजिद्भटैः ॥ 53 ॥ |
| रक्षसां विक्रमं वीक्ष्य भीमः प्राभञ्जनिः प्रभुः।<br>सालेन ता जघानोग्रान् सौमित्रेर्बृंहयन् बलम् ॥ 54 ॥ |
| चतुर्भिश्चतुरो वाहान् कराळान् काळवर्चसः।<br>शरैर्विव्याध सौमित्रिः सूतं चान्येन वैरिणः ॥ 55 ॥ |
| ववर्षाथोद्वणान् बाणान् पदाती रावणात्मजः।<br>शरैरशनिकल्पैस्तं लक्ष्मणः श्रममानयत् ॥ 56 ॥ |
| मण्डोदरीसुतश्चण्डो विरथः पुरमाविशत्।<br>रथमारुह्य सन्नद्धः पुनरागाद् रणाजिरम् ॥ 57 ॥ |
| स रावणिर्बाणगणैर्न्निशातैः प्लवङ्गमान् भङ्गमुपानिनाय।<br>चिच्छेद रामावरजः शरेण शक्रद्विषः कार्म्मुकमुग्रकर्म्मा ॥ 58 ॥ |
| क्षणेन चापान्तरमाददे स क्षणेन चिच्छेद स लक्ष्मणस्तत्।<br>वक्षो विपक्षस्य बिभेद चाऽऽशु स पञ्चभिः पत्रिभिरत्र वीरः ॥ 59 ॥ |

| |
|---|
| वमंश्च रक्तं शतमन्युशत्रुश्चापान्तरेणेषुगणान् ववर्ष।<br>च्छित्त्वैव तास्तंस्य चमूं च हत्वा जघान सौमित्रिरमित्रसूतम्॥ 60॥ |
| विनाऽपि सूतं वहतोऽस्य वाहानबिभ्रमल्लक्ष्मण उग्रबाणैः।<br>न भेत्तुमीशः कवचं सुरारिर्बिभेद बाणैरथ तल्ललाटम्॥ 61॥ |
| ललाटमस्याऽऽशु स लक्ष्मणोऽपि बिभेद बाणैरशनिप्रकाशैः।<br>भिन्नाखिलाङ्गाविषुभिः सरक्तौ तौ रेजतुः पुष्पितकिंशुकाबौ॥ 62॥ |
| विभीषणायैष मुमोच बाणास्त्रीनेकमेकं हरिपुङ्गवेभ्यः।<br>विभीषणोऽश्वान् न्यहनत् सुरारेः शक्तिं पितृव्याय मुमोच पुत्रः॥ 63॥ |
| चिच्छेद सौमित्रिरमोघशक्तिं विभिषणश्चेषुभिरार्द्दयत् तम्।<br>यमेन दत्तं प्रमुमोच बाणं विभीषणं हन्तुमथेन्द्रवैरी॥ 64॥ |
| कुबेरदत्तं प्रमुमोच बाणं सलाघवो राघवसोदरोऽथ।<br>शरौ ज्वलन्तौ ज्वलनप्रकाशौ संहत्य तौ व्योम्नि निपेततुः कौ॥ 65॥ |
| स लक्ष्मणोऽमुञ्चत वारुणास्त्रं निरास रौद्रेण स मेघनादः।<br>आग्नेयमस्त्रं मुमुचे सुरारिः सौरेण सौमित्रिरतो निरास॥ 66॥ |
| अथाऽसुरास्त्रं सुरशत्रुरुग्रं मुमोच नानायुधवर्षभीमम्।<br>महेश्वरास्त्रेण महामनस्वी तल्लक्ष्मणोऽस्त्रं प्रतिसञ्जहार॥ 67॥ |
| सुराःपुरस्कृत्य पुरन्दरं खे तस्थूरणं चित्रमवेक्षमाणाः।<br>स्वस्त्यस्तु रामानुज देवशत्रुं विनाशयेति प्रवदन्त उच्चैः॥ 68॥ |
| दिव्यं पुरासादितदैत्यचक्रमाकृष्य चाऽकर्णत उग्रवीर्य्यम्।<br>रामोऽभिरामो जयतीत्युदीर्य्य रामानुजो बाणवरं मुमोच॥ 69॥ |

आखण्डलारातिशिरः प्रचण्डमुत्खण्डितं काण्डवरेण तेन।
सम्मण्डितं कुण्डलमण्डलाभ्यां भूमण्डले भूदरवत् पपात॥70॥

तस्मिन् हते तत्र हतावशिष्टाः प्रदुद्रुवुः क्रव्यभुजोऽतिभीताः।
हरिप्रबर्हा हनुमत्पुरोगाः सौमित्रिमस्तारिमपूजयंस्ते॥71॥

दिनैस्त्रिभिस्तत्र दिवानिशं च युध्वा हते राक्षसराजसूनौ।
इन्द्रादिदेवा वरपुष्पवर्षमिन्द्रारिशत्रौ विदधुः स्तुवन्तः॥72॥

रामाभ्याशं प्राप्य रामानुजन्मा साकं वायोः सूनुना तं ववन्दे।
सान्द्रानन्दो मन्दहासी मुकुन्दस्तं सौमित्रिं लाळयन्नालिलिङ्गे॥73॥

इति श्रीनारायणपण्डिताचार्यविरचिते रामाङ्के सङ्ग्रहरामायणे युद्धकाण्डे एकादशः सर्गः ॥6-11-73॥

[आदितः श्लोकाः 2757+73=2830]

## द्वादशः सर्गः ॥6-12-34॥

भूयानभूद् राघवसैनिकानां मोदश्चमोदप्रभवश्च रावः।
ततोऽपि भूयान् पुरि राक्षसानां शोकश्च शोकप्रभवश्च रावः॥1॥

मृतं निशम्येन्द्रजितं सुतं स्वं प्राणोपमानं व्यलपद् दशास्यः।
हा वत्स नौ त्वं पितरौ विहाय मृतोऽसि देवेन्द्रजयिन् बतेति॥2॥

पुनश्च कोपं द्विगुणं प्रयातो जिघांसुरायाच्छलमैथिलीं सः।
व्यक्तं सुपार्श्वेन निवारितोऽथ सम्मन्त्रयामास सभामवाप्य॥3॥

त्रिंशत्सहस्राणि महौघकानामक्षोहिणीनामपि षड्सहस्रम्।
समादिदेशाऽऽशु रणाय यास्यन् स रक्षसां राक्षसयूथनाथः॥4॥

कल्लोलकल्पैः करिभिः परीतस्त्वङ्गत्तरङ्गाभतुरङ्गतुङ्गः।

रथाख्ययादोभरितोऽभिपेदे बालार्णवो राघवबाडवाग्निम्॥5॥

जाज्वल्यमानोज्ज्वलहेतिलीलो धूमायमानोद्धतधूळिधूम्रः।

विसुत्वरः सैन्यमहोघसङ्घः सांवर्त्तको वह्निरिवोददीपि॥6॥

उन्मूलयन्ती सकलांश्च सालान् निमीलयन्ती सकलांश्च लोकान्।

सा वाहिनी वानरवाहिनीं द्राक् चिक्षेप वात्येव विशीर्णपर्णम्॥7॥

छिन्नेषु भिन्नेषु निपातितेषु विद्रावितेष्वाकुलितेषु भूयः।

सैन्येषु सैन्यप्रभवोऽभ्ययुध्यन् सुग्रीवनीलाङ्गदपूर्वकास्ताम्॥8॥

वराद् विरिञ्चस्य परैरजेयां सर्वैरवध्यां च चमूं प्रयुध्य।

तरङ्गिणीतुङ्गतरङ्गलोलपलण्डुवन्न स्थिरतां ययुस्ते॥9॥

पराक्रमं क्रूरतरं विधाय परान् पराभाव्य वरास्त्रशस्त्रैः।

रामं ययौ रावणवाहिनी सा ज्वलन्तमग्निं शलभावलीव॥10॥

अथेषुभिः पट्टसभिण्डिपालैः शक्त्या शतघ्नीपरिघैश्च शूलैः।

गदासिभिस्तोमरसायकाद्यैर्युयोध रामं विविधायुधैः सा॥11॥

कच्चिद् बहून् जेष्यति राम एको रामो जयेदेव रिपून् प्रवीरः।

विश्वेश्वरः क्रीडति सेनयेति बाला समा भूरिधियोऽप्यवोचन्॥12॥

आदाय कार्त्तस्वरभास्वरं स चापं चकार प्रभुराशु सज्यम्।

विष्फारशब्देन सुरासुराणामुद्घोषयामास सुखासुखे च॥13॥

सुवर्णपुङ्खानतितीव्रधारानक्षीणपक्षान् नतपर्वणोऽथ।

बाणासने बाणगणानगण्यान् सन्धायसन्धाय मुमोच रामः॥14॥

| |
|---|
| कण्ठेषु घण्टाघटितेषु कांश्चित् करेषु कांश्चिच्चरणेषु कांश्चित्।<br>मदोत्कटानापततः क्षुरप्रैश्चकर्त्त कर्त्ता जतगतां गजेन्द्रान्॥15॥ |
| श्रिया प्रदीप्तानविषादिनश्च निषादिनः संयति सादिनश्च।<br>अपातयत् तान् सहसा स देवो नाकाधिरोहानिव पुण्यनाशे॥16॥ |
| अलङ्घनीयां विमलां विशालांवेलामिवानन्तशरावलिं ताम्।<br>अभ्यापतन्तीप्रययौक्षणेन भङ्गं तुरङ्गाख्यतरङ्गमाला॥17॥ |
| पदातिपङ्क्तिं द्रुतमापतन्तीं पतत्रिवेगां धृतखङ्गखेटाम्।<br>निरास रामो बहुबाणवर्षैर्वर्षैर्म्महामेघइवोरुधूळिम्॥18॥ |
| युद्धे समृद्धे कृतविक्रमाणां पुरा मुहुर्द्रावितदैवतानाम्।<br>महारथानांमधुजिच्छिरांसि चिच्छेद भल्लैश्च लकुण्डलानि॥19॥ |
| सन्धानमाकर्षमिषोर्विमोक्षमादानमीशस्य तथाऽऽपदानम्।<br>जनो विवेकी च विवेकहीनं विभ्रान्तचक्रारवदीक्षते स्म॥20॥ |
| स यौगपद्येन शतं सहस्रं लक्षं च साक्षादविलक्ष एव।<br>कोटिं च खर्वं च तथा महौघं मुञ्चन्निषून्नेष रिपून् जघान॥21॥ |
| अपाङ्गमात्रेण जगन्नियन्ता नन्वेकरूपोऽपि रिपून् निहन्यात्।<br>स्वैश्वर्य्यमेवं च निदर्शयन् हि स विश्वरूपोऽकृत विश्वरूपम्॥22॥ |
| रामो धरण्यां गगने चरामो रामोऽन्तिके दूरतरे च रामः।<br>रामो विपक्षे स्वबले च रामः सर्वत्र रामः क्व बभौ न रामः॥23॥ |
| रामाननन्तानवलोकयन्तः प्रत्येकशस्तेषु गुणाननन्तान्।<br>एकैकशस्तेषु गुणाननन्तान् सुरेश्वराः प्राञ्जलयः प्रणेमुः॥24॥ |

हरिन्मणिश्यामलकोमलाङ्गान् बिम्बाधरानम्बुजपत्रनेत्रान्।

रामान् विरामान् रिपुवाहिनीनां प्रेक्ष्य प्रजाः प्राञ्जलयः प्रणेमुः॥25

विष्फारयन्ति स्म धनूंषि केचित् केचिद् विभिन्दन्ति पुरा विपक्षान्।

अन्ये पराक्रम्य नदन्ति यावद् रामास्त्रिलोक्यामभिरामरूपाः॥26॥

जिघांसतां वानरवाहिनीं तां कृताट्टहासंमुखकोटरान्तम्।

निशाचराणां निशितैः शरौघैरपूरयन् केचन रामदेवाः॥27॥

रामैरगण्यैरिति वध्यमानां सम्पश्यमाना रिपुवाहिनीं ताम्।

अन्योन्यमाबद्धकरा हसन्तस्तस्थुः परं केचन रामदेवाः॥28॥

किं विश्वमूर्तेः कपिभिस्तु कृत्यमिति ब्रुवाणान् प्लवगान् विलोक्य।

अविस्मितं सुस्मितमाननाब्जमकम्पयन् केचन रामदेवाः॥29॥

भिन्ना न वह्नेः पृथगीक्षिताश्च जाथा यथा दीपत एव दीपाः।

न विश्वमूर्त्तेर्न्नु जातु भिन्ना जातास्तथा रामत एव रामाः॥30॥

वर्त्याद्युपाधेर्न्नु तारतम्याद् दीपेषु दृष्टं गुणतारतम्यम्।

रामस्य रूपेषु तथा गुणानां नैसर्ग्गिकाणां न हि तारतम्यम्॥31॥

सर्वेऽपि ते श्याममणीन्द्ररामाः सर्वेऽपि विध्वस्तनिजोपरामाः।

सर्वेऽपि ते सर्वगुणाभिरामाः सर्वेऽपि नाथा जगतां हि रामाः॥32॥

भेदं विनैवापि विशेषमात्राद् रूपाण्यनन्तानि पृथग् विधाय।

एकीचकाराथ स रामदेवो दीपाभिमानी हि यथाऽग्निदेवः॥33॥

न भवति बहुभावो भेदहीनात्र्थं इत्थंमतिरपटुमतीनामस्तु डोलायमाना।

वपुरवयवधर्म्मा वर्ण्णचेष्टागुणाद्या ध्रुवमपरिमिताः श्रीराम एको विशेषात्॥34॥

इति श्रीनारायणपण्डिताचार्य्य विरचिते रामाङ्के सङ्ग्रहरामायणे युद्धकाण्डे द्वादशः सर्गः ॥6-12-34॥

[2830+34=2864]

## त्रयोदशः सर्गः ॥6-13-80॥

महाबलेन रामेण श्रुत्वा मूलबलं हतम्।

जीविताशां सुखाशां च क्षणात् तत्याज रावणः॥1॥

स्नुषाणामथ भार्य्याणां परासामपि योषिताम्।

पत्यपत्यार्त्तिजं रोदं श्रुत्वा मर्त्तुं मनो दधे॥2॥

जाज्वल्यमानः क्रोधेन नेत्रेभ्यो वह्निमुद्गिरन्।

अवानरनरामुर्वीं करिष्यामीत्युवाच सः॥3॥

सर्वदिव्यायुधोपेतं पुष्पकं पुष्टिवर्द्धनम्।

आरुरोह महाबाहुः सन्नद्धो दशकन्धरः॥4॥

निरुपाक्षश्च यूपाक्षो महापार्श्वमहोदरौ।

दंसिता रथमारुह्य रावणं पर्य्यवारयन्॥5॥

विर्य्ययौ नगराद्राजा सेनया हतशेषया।

उत्पातान् वीक्षमाणोऽपि दिव्यान् भौमानथाङ्गिकान्॥6॥

देवो ववर्ष रुधिरं विनेदुरशिवाः शिवाः।

चेलुरङ्गानि वामानि यतो मृत्युः प्रतीयते॥7॥

पुरुषादाधिपस्यास्य पुरुषादान् पुरःसुरान्।

वानरा वारयामासुस्तन्नासहत रावणः॥8॥

| |
|---|
| निकृत्तकरकर्णाङ्घ्रिकण्ठाद्यवयवान् बहून्।<br>पत्रिभिः पातयामास युगपद् रावणः कपीन्॥9॥ |
| पराद्रवन् पराभूताः केचित् तच्छरपावकैः।<br>अपरे कपयस्तस्य ध्वचिनीं जघ्नुरुद्धताः॥10॥ |
| प्रक्षीणान् राक्षसान् वीक्ष्य महादेहो महोदरः।<br>अभ्यद्रवद् वानरेन्द्रान् शरवर्षी घनस्वनः॥11॥ |
| स एव कुम्भकर्णोऽयं हन्तुं नः पुनरागतः।<br>इति विक्रुश्य हरयो पलायन्त दिशो दश॥12॥ |
| इदं विभीषिकामात्रं मैवं द्रवत तिष्ठत।<br>इत्युक्त्वा स्थापयामास तारेयो ध्वजिनीं निजाम्॥13॥ |
| इन्द्रसूनुसुतो वीरो महोदरमथाद्रवत्।<br>सङ्ग्रामः समजन्युग्रो रक्षोवानरवीरयोः॥14॥ |
| महोदरो वालिसुते ववर्ष निशितान् शरान्।<br>अचिन्तयंस्तान् जग्राह केशे वालिसुतो रिपुम्॥15॥ |
| महोदरं महिपृष्ठे पातयित्वाऽङ्गदो रुषा।<br>परिघापातपुरषैः पादपातैरचूर्णयत्॥16॥ |
| महोदरं हतं दृष्ट्वा महापार्श्वः समापतन्।<br>ववर्ष विशिखान् घोरान् वालिसूनुजिघांसया॥17॥ |
| अङ्गदस्तमभिद्रुत्य प्रसह्याऽऽदत्त तद्धनुः।<br>महापार्श्वोऽथ कुपितः खड्गमादत्त वेगवान्॥18॥ |

| |
|---|
| खलस्य खड्गमाच्छिद्य केशपाशे प्रगृह्य तम्।<br>पातयित्वा धरापृष्ठे खड्गेनाकृन्तदङ्गदः॥19॥ |
| आ दक्षिणोदरप्रान्तादा वामांसाच्च राक्षसम्।<br>खण्डयन् निजघानैनमाखण्डलसुतात्मजः॥20॥ |
| ततो विरूपनेत्रेण यूपनेत्रेण चाङ्गदः।<br>आच्छन्नः शरवर्षेण मेघाभ्यामिव भास्करः॥21॥ |
| शरपञ्जरबद्धोऽथ रक्षोभ्यां वालिनन्दनः।<br>न शशाक प्रचलितुं व्याघ्रः पञ्जरगो यथा॥22॥ |
| सुतं संशयितं वीक्ष्य पृतनां च प्रपातिताम्।<br>गुल्मे सुषेणं विन्यस्य सुग्रीवोऽभ्यपतद् रुषा॥23॥ |
| उत्पाठ्य पाटवेनाऽऽशु गिरिं हरिगणेश्वरः।<br>तरसा पातयामास तयो रावणमन्त्रिणोः॥24॥ |
| चूर्णीबभूवतुस्तूर्णममात्यौ रावणस्य तौ।<br>तेन स्थूलेन शैलेन पांसुपिण्डाविवाश्मना॥25॥ |
| मन्त्रिणां मरणं वीक्ष्य क्रोधदीप्तो दशाननः।<br>उद्घणंबाणमादाय कार्म्मुकेणाऽऽशु सन्दधे॥26॥ |
| तेन हर्य्यृक्षराजस्य वक्षो रक्षोधिपो बली।<br>निर्बिभेदाथसुग्रीवो मूर्च्छितो न्यपतद् भुवि॥27॥ |
| विधूय वानरान् बाणैर्विधूमोऽग्निरिव ज्वलन्।<br>राममभ्यद्रवत् क्रुद्धो रामभ्राता रुरोध तम्॥28॥ |

| |
|---|
| विभीषणो गतापाणिन्र्यहनद् रावणानुगान्।<br>ममोच रावणः शक्तिं घोरां भ्रातृजिघांसया॥29॥ |
| तामापतन्तीं चिच्छेद सौमित्रिः पत्रिभिस्त्रिभिः।<br>विनेदुर्वानरा हृष्टास्ततश्चुक्रोध रावणः॥30॥ |
| लक्ष्मणं त्वं बलश्लाघी विभीषणमपीपलः।<br>शक्तश्चेत् पालयाऽऽत्मानमित्युवाच दशाननः॥31॥ |
| मयाया ब्रह्मणा दत्तां मयेन पुनरात्मने।<br>कालदण्डोपमां शक्तिं मुमोचास्मै स रावणः॥32॥ |
| अथाष्टघण्टाघटिता ज्वलन्ती शक्तिरम्बरे।<br>लक्ष्मणस्य क्षणात् वक्षो दारयामास दारुणा॥33॥ |
| पतितं लक्ष्मणं वीक्ष्य कुपितो वायुनन्दनः।<br>विशालं शैलमादाय रक्षोवक्षस्यथाक्षिपत्॥34॥ |
| गर्वीं पर्वतपातेन व्यथां प्राप्य गरीयसीम्।<br>दशास्यो दशभिश्चाऽस्यैः शोणितं वमति स्म सः॥35॥ |
| एतस्मिन्नन्तरे हन्त निःसङ्ज्ञं राघवानुजम्।<br>पादारविन्दं देवस्य प्राणदेवात्मजोऽऽनयत्॥36॥ |
| सर्वशक्तिरिमां शक्तिमुत्पाट्यानुजवक्षसः।<br>औषधान्यानयेत्याशु हनूमन्तमचोदयत्॥37॥ |
| पूर्ववत् पर्वतश्रेष्ठं सर्वौषधनिधिं प्रभुः।<br>आनिनाय महातेजा वायुजो वायुवेगवान्॥38॥ |

अप्यौषधानां गन्धेन सौमित्रिर्मित्रवर्धनः।

अक्षतः प्रोत्थितो वीरः पूर्णानन्दमवन्दत॥39॥

श्यामलाङ्गं शबलयन् हसितेन सितत्विषा।

प्रसन्नोमारुतिं प्रेक्ष्य परिरेभेपरः पुमान्॥40॥

छिन्नप्ररोहिणश्चैव विशल्याः पूर्ववर्णिनः।

औषधीनां प्रभावेन सर्वेऽपि हरयोऽभवन्॥41॥

राक्षसान् प्राक्षिपन्नब्धौ वानरेन्द्रा मृतान्मृतान्।

रामाज्ञया ततस्त्वेते नाजीवन्नौषधैरपि॥42॥

लक्षार्द्धयोजनाध्वानं प्राक्षिपन्मारुतिस्ततः।

पर्वतं पूर्ववत् सोऽद्रिर्निश्छेदाङ्कः स्थिरोऽभवत्॥43॥

अथाभिनन्द्य स्वचमूं चक्रे रामो धनुर्ध्वनिम्।

युद्धनाट्यप्रसङ्गाय पूर्वरङ्गमिवाग्रतः॥44॥

विमाने भासमानः स महामानो दशाननः।

मण्डलीकृतकोदण्डः पुण्डरीकाक्षमभ्ययात्॥45॥

शम्भुशर्वौ पुरस्कृत्य पुरन्दरपुरःसराः।

देवोपदेवमुनयो युद्धं द्रष्टुं वियद् ययुः॥46॥

नास्मन्नाथः क्षितौ तिष्ठेद् राक्षसेऽस्मिन् विमानगे।

इति मत्वा महेन्द्रोऽस्मै निजं रथमयापयत्॥47॥

अवतार्य्य रथं दिव्यं प्राञ्जलिः स्माऽऽह मातलिः।

विजयस्व जगन्नाथ रथेऽस्मिन् विहरन्निति॥48॥

रथोदयाद्रिमारूढो रेजे रामसहस्रगुः।
विश्वग्रासिदशग्रीवध्वान्तविध्वंसदीक्षितः॥49॥

बाणान् बहून् बहुविधानुद्घणान् निशितान् दृढान्।
स्वर्णपुङ्खान् स्फुरत्पक्षान् प्रास्याद् रामाय रावणः॥50॥

ताननन्तोऽन्तरेणैव भल्लैश्चिच्छेद राघवः।
मुमोच च स्वयं बाणान् प्रहसन्नेव लीलया॥51॥

मण्णलानि विचित्राणि दक्षिणानीतराणि च।
चरन्तौ चक्रतुश्चित्रं युद्धं तौ विश्वविस्मयम्॥52॥

दिशो दश शरैः शूरौ छादयामासतुः क्षणात्।
अन्धकारेण सान्द्रेण विश्वमन्धमभूत् तदा॥53॥

वानरा राक्षसाश्चेमे विस्मयोत्फुल्लोलचनाः।
तस्थुर्विहाय सङ्ग्रामं सङ्ग्रामं वीक्ष्य तं तयोः॥54॥

किञ्चत् प्रहृष्ट वित्रस्थं किञ्चित् किञ्चित् समाकुलम्।
विचित्ररूपं त्रैलोक्यं विस्मितं समभूत् तदा॥55॥

नाराचमालाममुचद् रावणो राममूर्धनि।
सा नीलोत्पलमालेव न रामस्य व्यथां व्यधात्॥56॥

ललाटं पाटयामास पाटवाक्कैटभार्द्दनः।
शरैर्न्निशाचरेन्द्रस्य चुक्षोभ स दशाननः॥57॥

ससर्ज्ज विविधान् बाणानासुरास्त्रेण रावणः।
सिंहव्याघ्रादिकमुखान् पक्षिसर्प्पाननानपि॥58॥

राघवो रावणस्त्राणि स्वतन्त्रास्त्रैर्न्यवारयत्।
यान्याग्नेयादिनामानि वह्न्याद्यैः साधितत्वतः॥59॥

ब्रह्मेन्द्रपशुपत्यद्या देवा यस्य प्रसादतः।
सत्ताशक्त्यादिमन्तः स्युस्तस्य का परतन्त्रता॥60॥

आग्नेयास्त्रेण भगवान् ससर्जाग्निमुखाञ्छरान्।
विद्युन्मुखांश्च सूर्य्यास्यांस्तैस्तस्यास्त्रमनीनशत्॥61॥

दैवगन्दर्वपूर्वाणि मुक्तान्यस्त्राणि वैरिणा।
दैवगान्धर्वपूर्वैः स नाशयामास केशवः॥62॥

रावणोऽथास्त्रवीर्य्येण नागांश्चक्रे विषोद्बणान्।
सुपर्ण्णैः स्वशरोद्भूतैस्तान् जघान जगद्गुरुः॥63॥

यत् परैर्दुष्करं लोके तच्चक्रे रावणो युधि।
यद्यच्चक्रे दशास्योऽयं तत्तत् प्रत्यहनत् प्रभुः॥64॥

रामरावणयोर्य्युद्धं रामरावणयोरिव।
गगनं गगनाकारं सागरं सागरोपमम्॥65॥

रथं सारथिमप्यश्वान् ध्वजं च निशितैः शरैः।
रावणस्ताडयामास रामस्य प्रणदन् मुहुः॥66॥

कोपं प्रकटयामास भगवांल्लोकभीषणम्।
पूर्ण्णानन्दे मुकुन्देऽस्मिन् कुतः कोपस्तमोभवः॥67॥

भ्रुकुटीमल्ललाटेन सर्वशोणेक्षणेन च।
भ्रूभ्यां च भावगर्भाभ्यां रामोऽभूत् सर्वदुःसहः॥68॥

| |
|---|
| संरम्भं तं भगवतो वीक्षमाणो भयाकुलः।<br>न्यस्तमापद्धनमिव शूलमादत्त रावणः॥69॥ |
| जाज्वल्यमानं तच्छूलं युगान्तानलभीषणम्।<br>विक्षेप घण्टाघटितं क्षिप्रं रामाय रावणः॥70॥ |
| सर्वशक्तिस्ततः शक्त्या तस्य शूलमशातयत्।<br>विभेद चोद्धर्णैर्बाणैरुरु वक्षश्च रक्षसः॥71॥ |
| विकिरन्तं बहून् बाणान् विकिरन्नेव सायकान्।<br>मेघगम्भीरया वाचा रामो रावणमब्रवीत्॥72॥ |
| सुतो विश्रवसः शूरस्त्वं हि वैश्रवणानुजः।<br>जितवान् किल दिक्चक्रं भवान् निजभुजौजसा॥73॥ |
| नटवत् कपटीभूतान् नाटयन् स्वगतान् गुणान्।<br>निसर्ग्गनीचस्त्वमिति स्त्रीचौर्य्येणावगम्यते॥74॥ |
| ब्रह्महत्या गुरुद्रोहो देवतानां  च हेळनम्।<br>इत्यादयोऽपराधास्ते स्त्रीचौर्य्येण नवीकृताः॥75॥ |
| दारयिष्यामि हृदयं दारुणं तव रावण।<br>साधूनां धर्म्ममार्ग्गस्य कवाटमिव रोधकम्॥76॥ |
| मुनिमांसेन पुष्टस्य तव मांसेन दुर्म्मते।<br>कङ्कान् सन्तर्प्पयिष्यामि पश्य सीतापतेर्बलम्॥77॥ |
| इत्युदाहृत्य भगवान् शरैरशनिसन्निभैः।<br>राघवो रावणस्याङ्गं विभेद गिरिसन्निभम्॥78॥ |

रामबाणैर्विभिन्नाङ्गो रावणो विश्वरावणः।
स्रस्तगात्रो विविक्ताक्षो मुहूर्त्तं मूर्च्छितोऽपतत्॥79॥

अर्द्धप्रहर्षितसुराम्बुरुहस्तदानीमर्द्धावमीलितसुरेतरकैरवोऽयम्।
अर्द्धप्रभग्नदशवक्रतमाः स्वगोभिरर्द्धोदितो रविरिवाथ रराज रामः॥80॥

इति श्रीनारायणपण्डिताचार्य्यविरचिते रामाङ्के सङ्ग्रहरामायणे युद्धकाण्डे त्रयोदशः सर्ग्गः ॥6-13-80॥

[आदितः श्लोकाः 2864+80=2944]

## चतुर्द्दशः सर्ग्गः ॥6-14-50॥

विमानयानैर्विबुधैर्द्विजैश्च निमन्त्रितो मन्त्रविदां वरिष्ठः।
व्योम्नोऽवतीर्य्योपगतो मुकुन्दमुवाच वाचं मतिमानगस्त्यः॥1॥

लीलाभिरेताभिरलं महेश क्षिप्रं क्षिपैनं जगदेकशत्रुम्।
बिभेति लोको नविदन् भवन्तमपायदर्शी प्रणयो मृदूनाम्॥2॥

मार्त्तण्डसन्मण्डलमध्यवृत्तं नारायणं भक्तपरायणं त्वाम्।
संसेव्य दिव्यस्तुतिभिर्जनोऽयं सर्वोऽपि सर्वं पुरुषार्त्थमेतु॥3॥

इत्युक्त ईशो मुनिना नितान्तमोमित्युदाहृत्य चकर्ष चापम्।
सम्प्राप्य सञ्ज्ञामनवाप्य भीतिं स रावणस्तावदवाप रामम्॥4॥

विज्ञाय वीर्य्यं रघुवंशकेतोर्द्दृष्ट्वा निमित्तं मृतिसूचकं च।
चचाल चेदो न दशाननस्य न मानिनामापदि चापलं स्यात्॥5॥

स्वपार्षदानां प्रवरेण तेन महर्षिशापाद् रिपुजन्मभाजा।
प्रक्रीडितस्तत्र दशाननेन चकार चित्रं रणमम्बुजाक्षः॥6॥

| |
|---|
| उत्कार्म्मकौ काञ्चनवर्म्मभाजौ तौ रेजतुः सन्ततबाणवर्षौ।<br>व्यक्तेन्द्रचापावचिरांशुचारू संवर्त्तमेघाविव भूरिवर्षौ॥7॥ |
| ताभ्यां तदा राघवरावणाभ्यां युद्धोद्धताभ्यामभिलोठ्यमाना।<br>धरा ससप्ताब्धिधराधराऽपि वाताहता नौरिव चञ्चलाऽभूत्॥8॥ |
| प्रभाकरे निष्प्रभतां प्रयाते वातेऽप्यवाते सुरसिद्धसङ्घाः।<br>प्रोचुः प्रभुं प्राञ्जलयः प्रसीद राम द्विषं संहरसंहरेति॥9॥ |
| दशाननस्याथ शिरांसि शीघ्रं दश स्फुरत्कुण्डलमण्डितानि।<br>चिच्छेद तुच्छेतरमौलिमन्ति तुल्यं क्षुरप्रेण रघुप्रवीरः॥10॥ |
| अन्यानि दृष्ट्वा पुनरुद्गतानि शिरांसि देवो दशकन्धरस्य।<br>जनान् विरिञ्चस्य वरं वरिष्ठमादत्त बाणं प्रहसन् महेशः॥11॥ |
| तं वायुवाजं रविवह्निधारमाकाशमानस्वशरीरयष्टिम्।<br>शरं महामेरुगुरुं स्वचापे सुवर्णपुङ्खं प्रतिसन्दधे सः॥12॥ |
| विदारणं दारुणदानवानामदारणीयं कुलुशादिभिश्च।<br>विराविणं भीमतरं नितान्तं स रावणायाथ मुमोच बाणम्॥13॥ |
| श्रीरामनामाक्षरलक्षणोऽयं विलक्षणः सर्वजगत्सु जिष्णुः।<br>स मार्ग्गणः श्रीरमणेन मुक्तो मुख्यः स्वयं भक्त इवाज्वलत् खे॥14॥ |
| विदारयामास स रावणोरो निपातयामास च पुष्पकात् तम्।<br>व्यापादयामास च तं शराग्र्यः सम्पादयामास च विश्वमोदम्॥15॥ |
| प्रशस्यमानः सकलैः स लोकैर्विवेश भूमिं प्रदरो ह्रियेव।<br>पत्युः पुनः पार्श्वमुपाजगाम साक्षादृजूनां ननु युक्तमेतत्॥16॥ |

| |
|---|
| ते राक्षसा रावणभृत्यभूता हतावशिष्टाः पतिते दशास्ये।<br>पराद्रवन् प्राणरिरक्षयाथ वृक्षे विपन्ने पतगाइव द्राक्॥17॥ |
| प्रक्षीणकर्म्माणमिवाथ पृथ्व्यां प्रेक्ष्याग्रजं निष्पतितं विमानात्।<br>विभीषणोलं विललाप हाहा रामागसस्तात मृतोसि हीति॥18॥ |
| धूळीविधूम्रं रुधिरौघसिक्तं वीरं विधात्राऽर्प्पितवीरशय्यम्।<br>पतिं परेतं परिरभ्य दीना मयात्मजाद्या महिळा विलेपुः॥19॥ |
| हा रामकान्तामपहृत्य कान्त विभीषणादीन् सुनयान् विधूय।<br>दशामिमां प्राप्य गतोसि कुत्र प्रियाः प्रियास्मांश्च नयाऽऽत्मपार्श्वम्॥20॥ |
| एवं विलापे बहु वर्त्तमाने विभीषणं तं भगवान् बभाषे।<br>भ्रातुः परेतस्य कुरुष्व कृत्यं नारीः पुरीं प्रपाय धार्म्मिकेति॥21॥ |
| दारापहारी तव नाथ पापो भ्राता न मे तस्य करोमि कृत्यम्।<br>एवं ब्रुवाणं तमुवाच देवो मदाज्ञया स्यादिति मन्दहासी॥22॥ |
| दशाननस्य क्रतुभिः समिद्धानग्नीन् पुरस्कृत्य पुरोहिताग्र्यैः।<br>विधाय संस्कारमथापराश्च क्रियाश्चकाराऽऽशु विभीषणोऽत्र॥23॥ |
| लोकैकशत्रौ निहते दशास्ये लोकैकनाथो द्रुहिणो हरश्च।<br>महेन्द्रपूर्वैः सह लोकपालैर्ल्लोकेशचूडामणिमाप्य नेमुः॥24॥ |
| पद्मापतिं पद्मभवोऽथ देवो बद्धाञ्जलिर्बद्धमहानुबन्दः।<br>तुष्टाव तुष्टात्ममतिर्वचोभिर्ग्गुह्यैः स वेदान्तकृतान्तसारैः॥25॥ |
| जयो ध्रुवस्ते न पराजयः स्याद् विश्वेश्वरस्त्वं वयमत्र दासाः।<br>न चान्यथा स्यादयमीरितोऽर्थः क्वचित् कदाचिद् भगवान् कुतश्चित्॥26॥ |

| |
|---|
| नाऽऽदिर्न्न नाशस्तव सद्गुणानां नान्तो न हन्तास्ति तिरस्कृतिश्च।<br>एकैकशोऽप्येवमुतान्यथा नो क्वचित् कदाचिद् भगवन् कुतश्चित्॥ 27॥ |
| अनाद्यनन्तः परमः स्वतन्त्रस्त्वमेक एवेश भवद्वशाः स्मः।<br>अहं भवः शुक्र इनादयश्च भवे च मुक्तौ च परे च सर्वे॥ 28॥ |
| अर्च्चिष्मतोऽर्च्चींषि रवेर्म्मयूखा वेगाश्च वायोः सरितां यथाऽऽपः।<br>निर्य्यान्ति संयान्ति च सन्ततं हि त्वत्तो वयं चेश तथा समस्ताः॥ 29॥ |
| न दोषलेशोऽपि तवेश कश्चिद् गुणान् सुखादीन् गणयन्ति के वा।<br>स्वरूपभूताश्च वपुर्ग्गुणाद्या विशेषतोऽनन्त तव ह्यनन्ताः॥ 30॥ |
| भ्रूविभ्रमेणैव जगन्ति हन्तुं स्रष्टुं पुनः पालयितुं प्रभोस्ते।<br>रक्षोवधो नाद्भुतमत्र यद्वत् तूलप्रदाहः प्रळयानलस्य॥ 31॥ |
| अनन्यसाध्येन तथाऽपि शत्रोर्वधेन रक्षस्यखिलामरांस्त्वम्।<br>नमोनमो राम नमोनमस्ते सदेति तुष्टाव विधिः स्वतातम्॥ 32॥ |
| दशाननं स्वेन वरेण गुप्तं नीरीक्ष्य रामेण निपातितं तम्।<br>भवस्तदा तामसभावमाप्तो योद्धुं क्रुधाऽऽह्वास्त रघुप्रवीरम्॥ 33॥ |
| चापेन रोपं प्रतिसन्दधाने चराचरेशे विचचाल भूमिः।<br>पृथ्वीप्रकम्पेन पपात शर्वः स उत्थितोऽभूच्च विशुद्धभावः॥ 34॥ |
| पद्मापतेराशु स पादपद्मे पपाद भक्त्या भरितो भवोऽथ।<br>क्षमस्व लक्ष्मीरमणापराधं शुद्धाऽस्तु मे बुद्धिरिति ब्रुवाणः॥ 35॥ |
| वृन्दारकैरिन्द्रपुरःसरैश्च स्वानन्दमूर्त्तिः परिवन्द्यमानः।<br>मुखेन्दुना चारुवचोऽमृतेन विश्वाभिरामोऽभिननन्द रामः॥ 36॥ |

रामानुजो रामनियोगतोऽथ समं समस्तैः कपिपुङ्गवैस्तैः।
लङ्काधिनाथोऽयमिति ब्रुवाणो विभीषणं शोभनमभ्यषिञ्चत्॥ 37॥

भूम्ना नियुक्तः पवनस्य सूनुः सीताकृतिं तां विनयेन गत्वा।
पतिव्रते ते पतिरेष हत्वा तं रावण राजत इत्युवाच॥ 38॥

स्वस्त्यस्तु वत्स प्रियवादिने ते प्रियं दिदृक्षे मम देवदेवम्।
इति ब्रुवन्त्यां तनुमध्यमायामुवाच तन्मारुतिराप्य रामम्॥ 39॥

रामाज्ञया तत्र विभीषणस्तामुपानिनायाधिकगोपनेन।
स्वयंवरे च व्यसने च युद्धे राज्ञी न गोप्येति जगाद रामः॥ 40॥

तिरस्करिण्यामपवाहितायामसंवृता संसदि जातलज्जा।
स्वेष्वेव गात्रेषु निनीय याता रामाननं चारु ददर्श रामा॥ 41॥

आलोक्य तां लोकपतिर्बभाषे जिताऽसि भद्रे विनिहत्य शत्रुम्।
दारापहारोद्भवदुर्य्यशो मे प्रमृष्टमेवं किमिहाद्य कृत्यम्॥ 42॥

कुलाङ्गनायां परवेश्मगायां कथं कुलीनः कुरुतेऽभिलाषम्।
वयं तु सर्वत्र च सङ्गहीनाः शुचिस्मिते याहि यथेप्सितं त्वम्॥ 43॥

नास्म्यन्यसक्तेति मुहुर्ब्रुवाणा विज्ञाय भावं भुवनेश्वरस्य।
शुकालपा लक्ष्मणमाललाप चितां द्रुतं मे कुरु लक्ष्मणेति॥ 44॥

सुग्रीवमुख्येष्वथ वानरेषु मुञ्चत्सु बाष्पं सविभीषणेषु।
बाष्पेक्षणो लक्ष्मण आशु चक्रे चितां प्रबोधश्चित्तमवेत्य भावैः॥ 45॥

अगामहं चेन्मनसाऽपिनान्यं मां पावकः पातु परीक्षकोऽयम्।
सेति ब्रुवाणा प्रणिपत्य रामं जाज्वल्यमाने ज्वलने पपात॥ 46॥

हाहाकृतं वानरराक्षसैस्तैस्तस्यां पतन्त्यामनले विशङ्कम्।
ब्रह्मादयो राममथाभ्यदुस्ते शुद्धैव सीता महिषी तवेति॥47॥

सीताकृतिं दिव्यपरीक्षणच्छलात् सीतापतिर्हव्यवहे निधाय ताम्।
कैलासशैलात् पुनरागतं प्रियां सीतां स्वयं प्रैक्षत पावकार्पिताम्॥48॥

प्राप्येन्दिरां नृपसुतामतिसुन्दरीं तां मन्दस्मितेन्दुलसितां मुमुदे मकुन्दः।
रामं समेत्यपरमं मुमुदेऽपि देवी  दृष्ट्वैव तौ मुमुदिरे सुजनाः समेतौ॥49॥

ब्रह्म ब्रह्मादिकानां शिशुरतिलळितः केवलं राजराड्यो-
राजेन्द्रो मद्यमानां स्वगतिरथ सतामङ्गनानामनङ्गः।
मृत्युर्नक्तञ्चराणां जगति हनुमतो नित्यनैसर्गिकेष्टो
रेजे रामोऽभिरामो जनकदुहितुरश्रान्तमेकान्तकान्तः॥50॥

इति श्रीनारायणपण्डिताचार्य्यविरचिते रामाङ्के सङ्ग्रहरामायणे युद्धकाण्डे चतुर्द्दशः सर्ग्गः ॥6-14-50॥ [
आदितः श्लोकाः 2944+50=2994]

## पञ्चदशः सर्ग्गः ॥6-15-84॥

गिरेरानयनात् पश्चाद् ये रावणशराहताः।
हरींस्तान् विरुजश्चक्रे सुषेणो भिषजां वरः॥1॥

उच्चावचा ए हरयो मृतास्तान् राघवः स्वयम्।
सङ्कल्पात् सत्यसङ्कल्पः समानिन्ये यमक्षयात्॥2॥

ततो राजा दशरथो महेन्द्रेण समागतः।
परिरेभे सुतं प्रीत्या बाष्पपर्ण्याकुलेक्षणः॥3॥

लक्ष्मणं च परिष्वज्य लक्ष्मणाग्रजमब्रवीत्।
त्वया भवाब्धिमतरं विश्वानन्दन नन्दन॥4॥

| |
|---|
| स्वर्ग्गादप्यपवर्ग्गाच्च सर्वस्माच्चान्यतः सुखात्।<br>श्रवणं दर्शनं वा ते स्मरणं वा वरं मम॥5॥ |
| धन्या सा खलु कौसल्या सुमित्राऽन्ये च नागराः।<br>ये तवानुभवेयुस्तमभिषेकमहोत्सवम्॥6॥ |
| सीते सीमन्तिनीनां त्वां मन्ये धन्यतमां सति।<br>साक्षान्नारायणं रामं या मत्सुतमुपाश्रिता॥7॥ |
| सौमित्रे कृतकृत्योऽसि रामाशुश्रूषणाद् ध्रुवम्।<br>वासुदेवमिमं देवा विदुर्वेदान्तवेदितम्॥8॥ |
| इति ब्रुवाणं पितरमभिवन्द्य जगद्गुरुः।<br>अन्वजानात् ततो रामो ब्रह्मादीनपि दैवतान्॥9॥ |
| तत आमन्त्रयामास भक्त्या रामं विभीषणः |
| राजभोगैर्वस स्वामिन् ससीतो मे गृहेष्विति॥10॥ |
| उपवासकृशं दीनं भरतं स्थण्डलेशयम्।<br>नादृष्ट्वा पुरि मे वास इति रामोऽब्रवीदिमम्॥11॥ |
| अथ रामाज्ञया सर्वान् वानरान् स विभीषणः।<br>रत्नैः सुवर्ण्णैः कामैश्च यथाकाममपूजयत्॥12॥ |
| सुमेरुशिखराकारं नानारत्नमयं शुभम्।<br>पुष्पकं प्राप्पयामास राघवाय विभीषणः॥13॥ |
| आरुह्य पुष्पकं दिव्यमङ्कमारोप्य जानकीम्।<br>रेजे रामो यथा मेघः सविद्युन्मन्दराचले॥14॥ |

| |
|---|
| रामः सलक्ष्मणस्तत्र हनूमत्सूर्य्यजादिकान्।<br>कपीन् विभीषणं चैनमारोपयत पुष्पकम्॥15॥ |
| हंससंहतियुक्तेन पुष्पकेणार्क्कवर्च्चसा।<br>विमानेनासमानेन ययौ रामो निजां पुरीम्॥16॥ |
| तत्र तत्रातिचित्राणि सिन्धुशैलवनानि सः।<br>वर्ण्णयन् दर्शयन् देव्यै ययौ देवो विहायसा॥17॥ |
| वानरेन्द्रकळत्राणि किष्किन्धायाः स राघवः।<br>आदायाऽरोप्य च क्षिप्रं विमानेन ययौ पुनः॥18॥ |
| पूर्ण्णे चतुर्द्दशे वर्षे पञ्चम्यां पुरुषोत्तमः।<br>भरद्वाजाश्रमं प्राप्य मुनेः पूजामुपाददे॥19॥ |
| हनूमन्तमुपान्तस्थमुवाच मधुसूदनः।<br>मारुते मामुपायान्तं भरताय वदेरिति॥20॥ |
| ययौ रामनियोगेन मारुतिर्म्मारुतोपमः।<br>मानुषं वेषमाश्रित्य पुरीं राघववल्लभाम्॥21॥ |
| जटिलं चीरिणं वीरमुपवासकृशं मृदुम्।<br>मलिनं तीव्रतपसं रामरामेतिवादिनम्॥22॥ |
| पादुके देवदेवस्य वन्दमानं पुनः पुनः।<br>रामोक्ते समये प्राप्ते रामादर्शनविक्लवम्॥23॥ |
| देदीप्यमानमनलं प्रवेष्टुं धृष्टमुद्यतम्।<br>भरताग्रजदूतोऽसौ भरतं क्षिप्रमैक्षत॥24॥ |

| |
|---|
| मा वीर साहसं कार्षीर्व्यक्तं भक्तोऽसि पूर्वजे।<br>इत्युक्त्वा भरतं प्रोचे मतिमान् हनुमान् पुनः॥25॥ |
| सीतापतिः ससीतस्त्वां ससौमित्रिरमित्रजित्।<br>रामो रामानुज प्राप्तः कुशलं सौम्य पृच्छति॥26॥ |
| इति प्रियं ब्रुवाणाय तस्मै मारुतये तदा।<br>तुभ्यं किं प्रददानीति ब्रुवाणः प्रणनाम सः॥27॥ |
| प्रहर्षो रोमहर्षश्च वर्षो हर्षाश्रुसन्ततेः।<br>चित्ते गात्रे च नेत्रे च भरतस्याभवन् समम्॥28॥ |
| महापुरुष कोऽसि त्वं त्वां मन्ये धन्यमात्मना।<br>कथाः कथय रामस्य तमित्थं भरतोऽब्रवीत्॥29॥ |
| हनुमान् कथयामास काकुत्स्थस्य कथां कविः।<br>आत्मानं चावदत् तेन मुमुदे भरतोऽधिकम्॥30॥ |
| अनुजं प्रत्युवाचेदं भरतोऽथ सगद्गदम्।<br>आयाति किल देवो नः पुरी संस्क्रियतामिति॥31॥ |
| किङ्कराणां सहस्रैः स शोधयामास तां पुरीम्।<br>अप्यलङ्कारयामास शत्रुघ्नो भरताज्ञया॥32॥ |
| स्वामी राम उपायातः पश्यामैनं सुदुर्लभम्।<br>इति ब्रुवाणा आजग्मुः पौरा जानपदा अपि॥33॥ |
| भरतोऽभिययौ गृह्णन् पादुके मन्त्रिभिर्युतः।<br>सस्त्रीबालैः सर्ववर्णैः परितो मातृभिश्च सः॥34॥ |

| |
|---|
| हनूमतो मुखं वीक्ष्य बाष्पाक्षो भरतोऽब्रवीत्।<br>कच्चित् कपीन्द्र कापेयी नेयं चपलता तव॥35॥ |
| कच्चिदार्य्यस्य पादाब्जं सेविष्येऽद्य सुदुर्ल्लभम्।<br>कच्चिन्मे सफलं जन्म कच्चिद् भूर्ल्लप्स्यते पतिम्॥36॥ |
| इत्युक्तो हनुमान् प्रोचे पश्येमान् पुष्पितान् द्रुमान्।<br>अकालेऽप्यधुना सौम्य सामीप्यात् तेऽग्रजन्मनः॥37॥ |
| पांसुं दाशरथे पश्य व्यश्नुवानं दिशो दश।<br>किङ्कराणां त्वदार्य्यस्य हरीणां रभसोत्थितम्॥38॥ |
| इमं किलकिलाशब्दं कपीनां कौतुकोद्भवम्।<br>अवधारय वीर त्वं त्वज्ज्येष्ठस्याग्रगामिनाम्॥39॥ |
| पुष्पकं पुष्करे पश्य पुष्करेक्षणवाहनम्।<br>सफलीकुरु लोले ते लोचने रामदर्शनात्॥40॥ |
| आर्य्यस्याङ्के स्मितमुखीमार्य्यां किं सौम्य पश्यसि।<br>आर्य्यापार्श्वे विनीतं तं लक्ष्मणं वीक्षसे न किम्॥41॥ |
| कपीन्द्रराक्षसेन्द्रौ त्वं तौ सुग्रीवविभीषणौ।<br>पश्य देवस्य पार्श्वस्थौ किङ्करौ सुप्रियङ्करौ॥43॥ |
| इति मारुतिवाक्येन वर्ण्यमानं स्वदैवतम्।<br>गुरोरिवोपदेशेन ददर्श भरतो विभुम्॥44॥ |
| श्यामलं कोमलं रामं विमलं कमलेक्षणम्।<br>मन्दहासेन्दुमालक्ष्य ननाम भरतो भुवि॥44॥ |

| |
|---|
| सीताकान्तं रावणारिं रामं पश्यतपश्यत।<br>उत्थितं सर्वतो वाक्यमित्येवं विश्वमङ्गलम्॥45॥ |
| भासमानं विमानाग्रे नेमुः सर्वाः प्रजाः प्रभुम्।<br>तमांसिपरिमुष्णन्तमुदयाद्रौ रविं यथा॥46॥ |
| अवातरत् पुराभ्याशे पुराणपुरुषस्ततः।<br>सोऽभवत् सर्वजगतांनेत्रचित्तमहोत्सवः॥47॥ |
| चरणावरुणाब्जाभौ ववन्दे विश्ववन्दितौ।<br>रामानुजोऽथ रामस्य धन्योऽस्मीत्यनुचिन्तयन्॥48॥ |
| आकृष्याऽश्लिष्यमाणस्य भरतस्य जगद्धुता।<br>भावः कश्चिददपूर्वोऽबूल्लज्जासम्भ्रमभक्तिभिः॥49॥ |
| सीताया लक्ष्मणस्यापि ववन्दे चरणावसौ।<br>परिरेभे हरिश्रेष्ठान् ससुग्रीवविभीषणान्॥50॥ |
| शतृघ्नोऽप्येवमेवैतान् ववन्दे परया मुदा।<br>स्वागतं रामदेवेति प्रोचुः प्राञ्जलयो जनाः॥51॥ |
| स्मितावलोकैः सम्पूज्य लोकांस्तांल्लोकनायकः।<br>ससीतालक्ष्मणो मातृर्ववन्दे सकला अपि॥52॥ |
| पादुके पादयोः कृत्वा रामं रामानुजोऽब्रवीत्।<br>निवेदयामि देवेश त्वद्राज्यं पालितं मया॥53॥ |
| कोशकोष्ठबलाद्यं च धनं जीवधनं च ते।<br>स्वामिंस्तव प्रसादेन कृतं दशगुणं मया॥54॥ |

तथा ब्रुवाणं तं दृष्ट्वा वानरा राक्षसाः परे।

रुरुदुर्विक्लबास्तस्य प्रावण्यार्जवभक्तिभिः॥55॥

कृत्वा प्रसादं निर्व्याजं कैकेयीतनये प्रभुः।

वसिष्ठं तं कुलगुरुमार्चयज्जगतां गुरुः॥56॥

धनदं प्रति याहीति पुष्पकं सन्नियोज्य सः।

सह सर्वैरयोध्याया बाह्योपवनमाययौ॥57॥

प्रार्थितो भरतेनेशः सर्वप्रकृतिभिस्तथा।

सिंहासनमथाध्यास्त रामः साम्राज्यलक्षणम्॥58॥

सर्वाङ्गसुन्दरं रूपं वानर्यो वानरा अपि।

भेजुर्योगानुभावेन तस्मिन् जनसमागमे॥59॥

अलङ्कारांश्चकाराऽऽशु रामलक्ष्मणयोस्तदा।

सशत्रुघ्नोऽथ भरतो हरिणां रक्षसामपि॥60॥

जानकीं तामलञ्चक्रुः सर्वा दशरथस्त्रियः।

कौसल्या भूषयामास स्वयं वानरवल्लभाः॥61॥

स्नाताः सुवस्त्राभरणाः स्रग्विणस्चारुकुण्डलाः।

विरेजुर्देवसङ्काशा वानर्यो वानरा अपि॥62॥

उपायनान्युपादाय सर्वाश्च नगराङ्गनाः।

सीतां सुग्रीवपत्नीं च दृष्ट्वा मुमुदिरे मुहुः॥63॥

सुमन्त्रो मन्त्रयामास विशोकविजयान्वितः।

अभिषेकाय रामस्य भरतेन प्रचोदितः॥64॥

| |
|---|
| शत्रुघ्नेन समादिष्टः सुमन्त्रो रथमानयत्।<br>रामस्य पुरतो दिव्यं प्रोद्यत्प्रद्योतनप्रभम्॥65॥ |
| आरुरोह रथं रामो रम्यया सीतया सह।<br>शिखरं हेमशैलस्य विद्युतेव बलाहकः॥66॥ |
| दिव्याकल्पाम्बरधरौ दीप्तकुण्डलमण्डितौ।<br>रामं मारुतिसुग्रीवाननुयातौ गजेन्द्रगौ॥67॥ |
| गजाश्वादीनथाऽऽरुह्य वानराः सपरिग्रहाः।<br>विविशुर्न्नगरीं ते च राक्षसाः सविभीषणाः॥68॥ |
| तूर्य्यदुन्दुभिनिर्घोषाः शङ्खशब्दविमिश्रिताः।<br>जज्ञिरे जयशब्दाश्च पुरीं प्रविशति प्रभौ॥69॥ |
| तं सभार्य्यमुपायान्तं भ्रातृभिः परिवारितम्।<br>प्रत्युद्ययुः प्रहृष्टास्ते पौरा मङ्गलपाणयः॥70॥ |
| हर्म्यस्थाः पुररामास्तं रामं स्वरमणीयुतम्।<br>अवेक्षमाणाः सुप्रीता लाजपुष्पाण्यवाकिरन्॥71॥ |
| सुग्रीवस्य च तत् सख्यं वीर्य्यं भक्तिं च मारुतेः।<br>सकौतुकेभ्यो मन्त्रिभ्यो जगाद जगदीश्वरः॥72॥ |
| अन्तःपुरं स्वतातस्य पुरन्दरपुरोपमम्।<br>हेमरत्नमयं दिव्यं प्रविश्य निषसाद सः॥73॥ |
| रामाज्ञयाऽथ सुग्रीवं भरतः प्रापयद् गृहम्।<br>मुक्तावैडूर्य्यसङ्कीर्ण्णमशोकवनिकान्तरे॥74॥ |

| |
|---|
| वसिष्ठस्तापसश्रेष्ठः सम्भरान् समुपादिशत्।<br>रामाभिषेकलोलानां प्रकृतीनां मते स्थितः॥75॥ |
| शूभान् ब्रीहिमहाब्रीहिप्रियङ्गुयवसम्भवान्।<br>तोक्मभेदान् दधिमधुसर्पींष्यन्यांश्च सर्वशः॥76॥ |
| अप आतपवर्ष्यांश्च नानातीर्थोदकानि च।<br>न्यग्रोधोदुम्बराश्वत्थप्लक्षक्काथाम्बु चोत्तमम्॥77॥ |
| किङ्कराणां सहस्राणि तान् सम्भारान् समाहरन्।<br>वानरा वार्द्धिवार्य्यर्थं सुग्रीवस्याऽऽज्ञया ययुः॥78॥ |
| सुषेणो जलमानिन्ये पूर्वाब्धेर्ग्गवयस्तथा।<br>पश्चिमादृषभो याम्यान्नळ उत्तरवारिधेः॥79॥ |
| शातकुम्भमयैः कुम्भैर्म्मणिश्रेणिप्रदीपितैः।<br>पल्लवावरणं वारि ते सहेळमुपानयन्॥80॥ |
| कार्य्यदक्षेऽत्र शत्रुघ्नः सुहृदः सपुरोहितान्।<br>अभिषेकोत्सवं कुर्वन् ऋत्विजश्च न्यमन्त्रयत्॥81॥ |
| वसिष्ठो वामदेवश्च जाबालिरुत काश्यपः।<br>कात्यायनः सुयज्ञश्च तेऽबिषेकार्त्थमाययुः॥82॥ |
| रामोऽभिषिच्यते नाथ इत्युदन्ते प्रवर्त्तिते।<br>पुरे जनपदे चाऽऽसीदपूर्वोऽयं महोत्सवः॥83॥ |
| विश्लेषार्त्ता रामदेवस्य सर्वे प्रीयन्ते स्मास्याभिषेकप्रसङ्गे।<br>धर्म्मेणाऽर्त्तास्तोयदर्त्ताविवाऽप्ते संसारर्त्ता यद्वदाप्ते विमोक्षे॥84 |

इति श्रीनारायणपण्डिताचार्य्यविरचिते रामाङ्के सङ्ग्रहरामायणे युद्धकाण्डे पञ्चदशः सर्गः ॥6-15-84॥ [आदितः श्लोकाः 2994+84=3078]

## षोडशः सर्गः ॥6-16-26॥

अथाहिमांशावुदयं प्रयाते द्विजैः कृते स्वस्त्ययने समस्तैः।
महामणीन्द्रैरुपक्लृप्तमत्र रामो महामण्डपमाप दिव्यम्॥1॥

समन्त्रतन्त्रान्तरकोविधैस्तैर्वसिष्ठपूर्वैरुपकल्प्यमाने।
महार्घमाणिक्यमणीन्द्रक्लृप्ते सिंहासने दैवतसिंह आस्त॥2॥

सीता पदैस्तं ललितैरुपेत्य तस्थौ समन्दाक्षममन्दकान्तिः।
अनन्यलभ्ये निजविष्टरार्द्धे न्यवीविशत् तां परिगृह्य रामः॥3॥

भासेव भानुः शिखया शिखीव रेजे तया चन्द्रिकयेव चन्द्रः।
आस्तां कवीनामति वाक्प्रसारः श्रीश्रीकमित्रेरुपमा न काचित्॥4॥

उशीरगुग्गुल्वगरुप्रवृद्धो धूमो वितानेन निवार्य्यमाणः।
रत्नप्रपीपैः खचितः सविद्युन्नवाम्बुदाडम्बरमाललम्बे॥5॥

मृदङ्गभेरीपटहादिकानां सकांस्यशङ्खानकगोमुखानाम्।
सवेणुवीणागणकाहळानां शब्दोऽथ शब्दान्तरमूर्णुनाव॥6॥

सम्मूर्च्छयन्तोऽपि विकासयन्तः सप्तस्वरांस्तान् नवतां नयन्तः।
अग्राम्यका ग्रामविशेषदक्षा गन्धर्ववर्य्या जगुरत्र रामम्॥7॥

तत्राऽऽगता अप्सरसोऽथ दृष्ट्वा रूपातिरिक्ताः पुरि वारकन्ताः।
अस्पर्द्धमाना ननृतुः प्रजानां रामस्य पार्श्वे न हि दोषबुद्धिः॥8॥

| |
|---|
| अग्रे विधायाथ विधातृसूनुं ते वामदेवादिमहामुनीन्द्राः।<br>रत्नोज्ज्वलैर्हैमघटैर्म्महेशं तमभ्यषिञ्चन् सलिलैः प्रशस्तैः॥9॥ |
| सितातपत्रं तपनीयदण्डं दधे सुमित्रातनयो यवीयान्।<br>अचालयेतामथ चामरे द्वे देवस्य सुग्रीवविभीषणौ तौ॥10॥ |
| न केवलं कोसलपालकोऽयं पाता भुवः सप्तसमुद्रवत्याः।<br>इतीर्य्यमाणो मनुजैर्जगाम स्मितं त्रयाणां जगतां स नाथः॥11॥ |
| साधारणं भूषणभूष्यभावं मन्ये प्रभोस्तस्य च भूषणानाम्।<br>परस्परालङ्क्रियेति मित्थ्या स भूषणं सर्वविभूषणानाम्॥12॥ |
| हेमाम्बुजानां रचितां शतेन मालां शुभां सौरभलोलभृङ्गाम्।<br>बभार रामः पवनेन दत्तां चन्द्रांशुगौरीमपि हारमालाम्॥13॥ |
| गवां स लक्षाणि सुलक्षणानां ददौ द्विजेभ्यो बहुलानि देवः।<br>त्रिंशच्च कोटीर्वरहाटकानां कामांश्च सर्वान् परिपूर्णकामः॥14॥ |
| रत्नान्यनर्घ्याणि वराम्बराणि हारान् परार्घ्यांश्च विभूषणानि।<br>ददौ स देवो जनकात्मजायै तेभ्यश्च कामान् कपिराक्षसेभ्यः॥15॥ |
| विभूषणैस्तैश्च विभूषिताङ्गी सीता वरिष्ठामथ हारमालाम्।<br>उन्मुच्य कण्ठादवलोकयन्ती ददर्श देवस्य मुखेन्दुबिम्बम्॥16॥ |
| मुहुर्म्मुखेन्दुं निजमीक्षमाणां मुहुश्च मुक्तास्रजमीक्षमाणाम्।<br>शुचिस्मितां तां पतिरिङ्गितज्ञः पश्यन्नपाङ्गेन जगाद रामः॥17॥ |
| विद्याविशेषेषु विशिष्टमेकं सद्ब्रह्मचर्य्यादिषु वा गुणेषु।<br>यं मन्यसे धन्यतमं त्रिलोक्यां मुक्ताकलापं सति देहि तस्मै॥18॥ |

| |
|---|
| अतिक्रमं यस्य पराक्रमाणां न कोऽपि कुर्य्यादुचितक्रमाणाम्।<br>अतिक्रमी योऽन्यपराक्रमाणां तस्मै शुभे त्वं दिश वेतनार्थम्॥19॥ |
| मम प्रियं यं भुवनेषु वेत्थ तव प्रियो योऽस्मदुपासकेषु।<br>सर्वेष्वसङ्गो मयि योऽतिसङ्गी सम्प्रीतिदेयं सति देहि तस्मै॥20॥ |
| एवं ब्रुवाणे जगदेकनाथे सीता हनूमन्तमवेक्ष्य दृष्टा।<br>अनन्यलभ्यां स्वयमामुमोच  तां हारमालामतुलां तदंसे॥21॥ |
| सुधासुधारासितया तयाऽलं सुवर्ण्णवर्णोऽत दधार शोभाम्।<br>हरस्त्रजाऽसौ हनूमान् महात्मा यथा महामेरुरमर्त्यनद्या॥22॥ |
| एषां गुणानामतिदुर्ल्लभानां पात्रं प्रियोऽयं ननु देवदेव्योः।<br>ब्रह्मैव नूनं भगवान् हनूमानित्येव वाणी ववृधे त्रिलोक्याम्॥23॥ |
| स राजराजः परिराजमानो रामोऽथ राजीवसमाननेत्रः।<br>महामहाः सर्वमहाजनानां मनोदृशामेष महोत्सवोऽभूत्॥24 |
| कीर्त्तिं वदाम तव तां श्रृणवाम राम ध्यायाम राम चारणौ च भजाम राम।<br>अर्च्चाम राम जय राम नमाम राम दासा वयं सहचरास्तव राम क्लृप्ताः॥25॥ |
| गदति जगति भद्रां भारतीमेवमेवं नवविधगुणभाजा काममेकान्तभक्त्या।<br>अरमत परमश्रीरामया रामदेवः स्वयमकृतकपूर्णानन्दसन्दोहदेहः॥26॥ |
| इति श्रीनारायणपण्डिताचार्य्यविरचिते रामाङ्के सङ्ग्रहरामायणे युद्धकाण्डे षोडशः सर्गः॥6-16-26॥ [<br>आदितः श्लोकाः [3078+26=3104] [युद्धकाण्डे श्लोकाः 865] |

# उत्तर काण्डम्॥ 7-8 ॥

## प्रथमः सर्गः ॥7-1-48॥

श्रिया सह श्रीरमणं निषण्णामगस्त्य मुख्यामुनयः सभायाम्।
उपासतोपासितमात्मभक्तैर्हर्षेण हंसाइव दुग्धसिन्धुम्॥1॥

अभ्यर्चितोऽभ्यर्थिंतदेन भूम्ना शृण्वत्सु सर्वेषु स कुम्भयोनिः।
मा शब्द् इत्यायति वेत्रपाणावुदाहरद् वाचमुदारभावाम्॥2॥

स्वस्त्यस्तु सद्यो भवतः प्रसादाद् राजन् सुराजन् रघुवंशदीप।
कीर्त्तिं च ते कीर्त्तयितुं प्रभुः स्याच्छ्रीमान् हनूमांश्चतुराननो वा॥

सुमालिमालिप्रमुखान् सुरारीन् नारायणात्मैव निराचकर्त्थ।
रामाधुना रावणमुग्रवीर्य्यं हत्वा त्वमाश्वासयसीह विश्वम्॥4॥

विना जगन्नाथमनन्यनाथं त्वां राक्षसानां क्षयकृत् क एव।
सहस्रभानुं न विना हि भानुं भवेत् क्वचित् सन्तमसस्य हन्ता॥5॥

जाता हि देवास्तव सेवनार्त्थममी च सर्वे नरवानरेन्द्राः।
पुंसां भवत्सेवनमेव कृत्यं यतः समग्रः पुरुषार्थ्थसार्त्थः॥6॥

इति ब्रुवाणं विविधाः कथाश्च मुनिं मुनीन्द्रैः सहितं मुकुन्दः।
यज्ञाय यज्ञाधिपतिर्निमन्त्र्य सम्पूज्य पूज्यं विससर्ज हृष्टम्॥7॥

सम्प्रेष्य नम्रान् नरवानरेन्द्रान् पौरान् प्रभुर्वैषयिकांश्च सर्वान्।
सूर्य्येऽस्तमायाति स लोकनाथः सन्ध्यामवन्द्यां सुधियामुपास्त॥8॥

प्रविश्य चान्तः पुरमम्बुजाक्षः पुरन्दरान्तःपुरकान्तिहारि।
अन्नानि पीयूषमयानि भुक्त्वा विवेश शय्याशरणं शरण्यः॥9॥

तल्पं पयःफेननिभं पवित्रं विष्वङ्मणिश्रेणिघृणिप्रदीप्तम्।
सीतापतिः कोमलमध्यशेत भोगीन्द्रभोगं भगवानिवाथ॥10॥

तं नित्यमुक्तं निबबन्ध दोर्भ्यामरञ्जयन्नीरजसं सदैव।
स्वाराममेवारमयच्च रामं सीता विरुद्धा न तथाऽपि जातु॥11॥

रामाभिषेकोत्सवमुत्सुकानां प्रशंसतामप्यभिनन्दतां च।
सा शर्वरी सर्वमहाजनानामानन्दसन्दोहकरी बभूव॥12॥

स्निग्धस्वराः पीडितपञ्चमाख्याः षड्जस्वरं भिन्नकतां नयन्तः।
विनर्षभाख्यं पुरुषर्षभस्य ववन्दिरे वन्दिगणाः पुरान्ते॥13॥

द्विजाः प्रबुद्धा विरळोन्धकारो विधुर्विधामा कमुदं मुदाऽस्तम्।
विकासमर्हत्यधुनाऽर्हणीयं नवाम्बुजं त्वन्नयनाम्बुजं च॥14॥

भजत्यपास्यत्यपि रागलीलां चक्राङ्गनोषस्यथ कौशिकी च।
यथा तवोरुक्रम विक्रमान्ते स्वः सुन्दरी चासुरसुन्दरी च॥15॥

उन्मोच्य रम्यं पतिबाहुबन्धं पतिव्रताः पत्युरुपेत्य पादम्।
श्रीरामरामेति कलं वदन्त्यः कुर्वन्ति सुप्रातमिमा प्रजानाम्॥16॥

प्राच्या मुखं रागगुणेन भाति कान्तेन काल्येन हि सङ्गतेयम्।
प्रसोष्यते साम्प्रतमेतयाऽर्कः कौसल्ययेवात्र भवान् प्रभावान्॥17

विधिर्विभुत्वस्य हरो हि मन्योः कीर्त्तेर्म्महेन्द्रो मदनश्च कान्तेः।
बुद्धेर्गुरुश्चेति बवद्गुणानां बिम्बोष्ठ सर्वे प्रतिबिम्बमेते॥18॥

इत्यादि तद्गीतमकाकि श्रुण्ववन् यावत् स तल्पादुदतिष्ठदीशः।
उपस्थितं तत्र नृणां सहस्रं हेमोदपात्रैरुदकं दधानम्॥19॥

| |
|---|
| यन्नामसङ्कीर्त्तनमात्रमत्र दिशेन्महापातकमोक्षमाशु।<br>स नित्यशुद्धोऽपि किलाऽऽत्मशुद्धिं चक्रेऽथ सल्लक्षणशिक्षणार्त्थम्॥ 20॥ |
| स्नातः सुवासाः समुपास्य सन्ध्यां हुत्वा स हव्यं प्रतिदाय देयम्।<br>अग्निनुपातिष्ठदुताग्निहोत्रगृहेष्वथेक्ष्वाकुभिरादृतेषु॥ 21॥ |
| पुंसां ललामैष ललाम कृत्वा नवार्क्कभासा हरिचन्दनेन।<br>विभूषणानां च विभूषणत्वं ययौ त्रिलोकैकविभूषणं सः॥ 22॥ |
| निर्ग्गम्य रौग्मात् स्वसमाधिधाम्नः सभां महारत्नमयीं विवेश।<br>यावत् स सूर्य्यान्वयसूर्य्य ईशः सूर्य्योगिरेर्व्योम विवेश तावत्॥ |
| असीनमेनं मणिहेमरूपे सिंहासने सिंहमिवाद्रिश्रृङ्गे।<br>उपासताऽरादनुजा विनीता भक्तास्तथा वानरराक्षसेन्द्राः॥ 24॥ |
| सभागते स्वामिनि सानुरागा सामन्तमालाऽत्र समन्ततोऽभूत्।<br>हरिन्मणिश्रीरधिकप्रभोऽस्याः स नायको नायकतामुपायात्॥ 25॥ |
| पुरोधसस्तत्र वसिष्ठपूर्वान् समागतान् स्वं नमतो धियैव।<br>न्यवीविशन्न्यायनिदर्शनाय तूर्ण्णं चलन्नासनतः स नाथः॥ 26॥ |
| स्वालोकलोलानवलोक्य लोकान् लोकाधिनाथः सकलान् सभायाम्।<br>स्मितामृतेन प्रतितर्प्पयंस्तान् वाणीमुदारां समुदाजहार॥ 27॥ |
| वर्ण्णाश्रमाचारविशेषनिष्ठाः समस्तविद्याभिरतौ पटिष्ठाः।<br>मामेव सेवध्वमकैतवेन प्रजाः प्रजानामधिनाथमेकम्॥ 28॥ |
| अहंममेत्याग्रहमोह एष देहे च देहानुगते च मा भूत्।<br>मोहेन्धनेऽस्मिन् भवदावव्हौ तातप्यमानानवलोकयध्वम्॥ 29॥ |

सर्वेन्द्रियाणा विषये विषाभे सङ्गं प्रसङ्गं च विमुञ्चतैनम्।
सङ्गो ह्यमङ्गल्यकरोऽत्र मीनो निदर्शनं स्यात् बळिशानुषङ्गी॥30॥

सङ्गोज्झिता विष्णुपदैकनिष्ठा दैवोपनीतान् विषयान् भजन्तः।
न लेपमर्हन्ति महानुभावाः साक्षादिहोदाहरणं नभस्वान्॥31॥

मामेव नाथं सततं स्मरन्तो ममैव सारूप्यमदुःखसौख्यम्।
यूयं लभध्वं भवभीतिमुक्ताः पेशस्कृतः कीट इवाचिरेण॥32॥

एं स देवोऽनुदिनं प्रवृत्तस्ततः कदाचित् स्थिरभक्तिनम्रान्।
वैदेहकैकेयमुखान् महीशान् मुमोच सम्पूज्य समस्तपूज्यः॥33॥

मुखेन्दुना व्यक्तिमुपागतेन सम्पूरयन् वानरसङ्घसिन्धुम्।
उवाच सुग्रीवविभीषणादिनाप्तानुपाप्तांस्तनयं च वायोः॥34॥

मह्यं मनोदेहवचांसि यूयंसमर्प्पयन्तः सहवृत्तिकानि।
तेनैव मूल्येन पुमर्त्थमूलं सम्प्राप्तवान्तो मम दास्यमग्र्यम्॥35

अहं तदानृण्यमवाप्तुकामो दत्वाऽपि साम्राज्यमिदं न तृप्तः।
तस्मादनन्तं वितरामि मोक्षं दास्यस्य साक्षादनुरूपमर्घम्॥36॥

हनूमतः सेवनकौस्तुभस्य मुक्त्याख्यमर्घं सदृशं न मन्ये।
स्वभावभक्तो मम नो उपाधेर्म्मद्भक्त्युपाधेः स्वमपीक्षते यः॥37॥

यो भोगयोगादिगुणैः समो मे स्वेस्तथाऽऽभास इवावभातः।
तस्याब्जयोनेः सहभोगनाम पदं हनूमन् प्रदिशामि तुभ्यम्॥38॥

अस्यां कथायां मम चन्द्रगौर्य्यां प्रादुर्भवन्त्यां निगमान्तसिन्धोः।
मग्नः सुधायामिव वत्स भूयो वृष्णीष्व कामानखिलान् यथेष्टम्॥39॥

| |
|---|
| उक्त्वेति वैदूर्य्यनिबद्धमध्यं मुक्ताकलापं स कलापगौरम्।<br>उन्मुच्य कण्ठान्निदधेऽस्य कण्ठे रामः स्वयं मूर्त्तमिव प्रसादम्॥40॥ |
| भक्तिर्म्मम स्यात् त्वयि वर्द्धमाना प्रीतिस्तव स्यान्मयि वर्द्धमाना।<br>इमौ हि कामौ मम नापरः स्यान्नाथेति रामं हनुमान् बभाषे॥41॥ |
| लक्ष्मिनिवासेन भुजान्तरेण प्रभुर्भुजाभ्यां भुवनावनाभ्याम्।<br>तं पावमानिं परिरेभ आशु द्वयं च तद् ब्रह्मपदं च दत्वा॥42॥ |
| दिव्यानि रत्नाभरणानि दत्वा वस्त्राणि भद्राणि बहूनि चेषः।<br>सन्तर्प्प्य सुग्रीवविभीषणादीन् सर्वांश्च गन्तुं स्वगृहानवोचत्॥43॥ |
| त्वत्पादपार्श्वादपगम्य नाथ राज्यं न यामो भयशोकमूलम्।<br>कल्पाङ्घ्रिपेन्द्रादिव काकतुण्डीमित्यूचतुस्तौ कपिराक्षसेन्द्रौ॥44॥ |
| प्रजाधिपाभ्यां भरणं प्रजानां शुश्रूषणं मे क्रियतां युवाभ्याम्।<br>उक्त्वेति विष्णोः प्रददौ विमानं विभीषणायान्वयभूषणं सः॥45॥ |
| संरञ्जयन्नङ्गदमङ्ग बालं भुक्त्वा चिरं राज्यमुपैहि मां त्वम्।<br>सुषेणतारादिगणैः प्रियैर्म्मे सुग्रीवमित्यभ्यधिताथ भूमा॥46॥ |
| स्तुवन्ति  भूयः प्रणमन्ति केचित् परिक्रमन्तेऽथ परे पुरैनम्।<br>बाष्पेक्षणा वानरराक्षसौघा नाथं विहातुं बत नाथ शेकुः॥47॥ |
| कथमपिगतवन्तस्ते निजं गेहमापुर्व्यमुचदपि गतांस्तान् नैव देवः कृपालुः।<br>यदवसदुरुतापध्वंसनश्चन्द्रचारुर्म्मनसिमनसि तेषां हन्त रामोऽभिरामः॥48॥ |
| इति श्रीनारायणपण्डिताचार्य्यविरचिते रामाङ्के सङ्ग्रहरामायणे उत्तरकाण्डे प्रथमः सर्गः ॥7-1-48॥<br>[आदितः श्लोकाः 3104+48=3152] |

## द्वितीयः सर्गः ॥7-2-32॥

विश्वेश्वरः प्राज्यमवाप्य राज्यं कृपानिधिर्ल्लक्ष्मणमाचचक्षे।
शुश्रूषया वत्स तवास्मि तुष्टस्त्वं यौराज्यं भज शोभनेति॥1॥

स्वर्ग्गाधिपत्यादपवर्ग्गसौख्यात् साम्राज्यभोगाच्च वरीयसीं ते।
पादाब्जसेवां हि वृणे न चान्यत् प्रसीद नाथेत्यवदत् स धन्यः॥2॥

तामेव तस्मै प्रतिदाय देवः प्रीतो भुजाभ्यां परिरभ्य चैनम्।
तद् यौवराज्यं भरताय दत्वा चक्रे द्रुतं चक्रधरोऽभिषेकम्॥3॥

विमानमागादथ पुष्पकाख्यं प्रत्यर्प्पितं वैश्रवणेन भूम्ने।
देव प्रसीदेति वदन्नभस्थं स्मृतं त्वमेहीति मुमोच रामः॥4॥

नारायणोपास्तिपरायणानां नान्यत्र भक्तिः कुहचित् प्रजानाम्।
तद्भक्तवर्ग्गे स्थिरभक्तिभाजां रामे भुवो राजनि राजमाने॥5॥

रामस्य रूपे मतिरक्षियुक्ता कीर्त्त्यां सकर्ण्णा रमते स्म वाणी।
शक्तिः प्रजानां सकराऽर्च्चनायां कान्ता सकान्तेव समृद्धधाम्नि॥6॥

केचिन्मनोयोगकृतो मनोज्ञे रामे नवेन्दीवरसुन्दराभे।
धन्या उतान्ये स्म विचारयन्ति तं सर्ववेदान्तकृतान्तसारम्॥7॥

कथां कथाज्ञा अवतारमूलां रामस्य तां रावणमारणान्ताम्।
पराक्रमानुक्रमतोऽनुवर्ण्य ननन्दुरेनामनुमोद्य चान्ये॥8॥

रामाभिरामानुपराम राम रामाऽस्मरामारिविराम राम।
श्रीराम रामेति पुरा रमन्ते रामस्य नामानृतपायिनोऽन्ये॥9॥

| |
|---|
| वर्णाश्रमाचारविशेषशोभानधर्म्मगन्धाविषयान् स्वधर्म्मान्।<br>कामाद्यवद्यै रहितान् विदूराद् रामाय सर्वे स्म समर्प्पयन्ति॥10॥ |
| सर्वत्र सर्वस्य च सर्ववित्तं स्वयोग्यतावृत्ति च सर्ववित्त्वम्।<br>तदा बभूवास्य महाजनस्य यदा स चक्री भुवि चक्रवर्त्ती॥11॥ |
| सर्वेन्द्रियानन्दकरानमन्दान् स्पर्शान् रसादीन् विषयानथान्यान्।<br>शास्त्रोपपन्नाननुभुञ्जते स्म रामस्य राज्ये न तु बन्धहेतून्॥12॥ |
| सहस्रसंवत्सरजीविनस्ते लावण्यतारुण्यगुणाभिरामाः।<br>मुक्ता जरारोगपुरोगदोषै रामस्य राज्ये रमणाः सरामाः॥13॥ |
| वैधव्यवैधुर्य्यभयं न किञ्चिन्न पुत्रशोको न च मित्रशोकः।<br>नामङ्गलं किञ्चिदथापरं च मङ्गल्यदेवीरमणस्य राज्ये॥14॥ |
| यश्यं जनः कामयतेऽर्त्थमत्र रामप्रसादात् सकलः सस स्यात्।<br>किं चित्रमेतज्जगतामधीशे रामे स्वयं राजनि राजमाने॥15॥ |
| अनेन किं वा बहुनोदितेन रामस्यराज्यं वलयं धरायाः।<br>वैकुण्ठलोकप्रतिबिम्बभूतं विरिञ्चलोकं प्रतिगर्ज्जतीदम्॥16॥ |
| निर्दुःखसौख्यं स्थिरभक्तिभाजामनन्तशय्यः प्रदिशेदनन्तम्।<br>स्वानुग्रहस्यास्य निदर्शनार्थं रामः स्वराज्ये श्रियमातनोत् ताम्॥17 |
| अनाद्यनन्तं रमणं श्रिता या विना वियोगं सततं ततः श्रीः।<br>सीताभिधामत्र रमां स्वरामां रामोऽभिरामां रमयाम्बभूव॥18॥ |
| सीतामुखेन्दोः सदृशोऽयमिन्दुर्व्यङ्को भवेच्चेदिति काव्यभङ्गी।<br>सीतामुखेन्दुः स्वरुचेन्दुवृन्दं कळङ्कहीनं च नयेत् कळङ्कम्॥19॥ |

अत्रस्तमाणिक्यमणिप्रकाशैः पुष्पैर्विनिद्रैः परिभासमानम्।

प्रविश्य सोऽशोकवनं विशोकः स्वानन्दमूर्त्तिर्विजहार देव्या॥20॥

शम्पोल्लसच्चम्पकपुष्पवर्षैर्म्मन्दानिलान्दोलितमाघवीभिः।

मधुव्रतानां मधुरैश्च गीतैर्देवः सिषेवे मधुमाधवाभ्याम्॥21॥

उल्लासिनीभिर्न्नवमल्लिकाभी रामाङ्घ्रिमाराध्य मलैरपेतौ।

ऋतु इमौ शुक्लशुची प्रसिद्धौ न नामतः केवलमर्त्थतोऽपि॥22॥

खर्ज्जूरजम्बूफलसन्निवेद्यमुर्वीश्च दूर्वास्तरुणं च वारि।

रामेऽर्प्पयन् केकिकुलस्य नृत्तैर्ग्गीतैश्च धन्यो जलदत्तुरासीत्॥23॥

कर्ण्णावतंसार्त्थमनिन्दनीयं दत्वा नवेन्दीवरमिन्दिरायै।

नीलारविन्दं च करारविन्दे दासीवदासीच्छरदाशु देव्याः॥24॥

परिस्फुरस्फाटिकभित्तिशोभां चक्रे हिमानीं परितो हिमर्त्तुः।

भृत्यः पटुः काण्डपटीमिवाग्र्यामेकान्तभाजोरिह देवदेव्योः॥25॥

नैकं विनिद्रं फलिनीप्रसूनमापादितं यच्छिशिरेण भक्त्या।

तन्नर्म्मसाचिव्यकृदप्युपांशु मन्दानिलो मन्दधारिणेऽदात्॥26॥

सर्वर्त्तवः सर्वगुणाभिरामास्तं यौगपद्येन सिषेविरेऽत्र।

स्वाराममप्यद्भुतभावभाजा देव्याऽतिदिव्यं रमममाणमीशम्॥27॥

गन्धर्वविद्याधरचारणाद्याः सहाप्सरोभिर्ज्जगुरेत्य रामम्।

सदासदानन्दतनुं मुनीन्द्राः सहामरेन्द्रैरभितुष्टुवुस्तम्॥28॥

त्रयोदशैवं त्रिदशाधिनाथः समाः सहस्राणि महीं ररक्ष।

सुराहितध्वान्तनिकृन्तनार्क्को रामो महत्कैरववृन्दचन्द्रः॥29॥

महान्वयस्यास्य समेधनाय बभार गर्भं भुवनप्रगल्भम्।
विदेहपुत्री रघुवंशकेतोः पुराणमायेव पुराणमूर्त्तेः॥30॥

कुशं लवं चाथ यमौ कुमाराविन्द्रानलांशौ सुषुवे सुमध्या।
यच्छैशवं रामकथाप्रसङ्गैरानन्दयत् तापसमानसानि॥31॥

दशशतनयनो वा तान् सहस्राननो वा दशशतहृदयो वा केवलं वेदगर्भः।
न गणयति गुणौघान् रामदेवस्य सर्वानहह वयमधीरा वर्ण्णयामः कथं तान्॥32

इति श्रीनारायणपण्डिताचार्य्यविरचिते रामाङ्के सङ्ग्रहरामायणे उत्तरकाण्डे द्वितीयः सर्गः ॥7-2-32॥ [आदितः श्लोकाः 3152+32=3184]

## तृतीयः सर्गः ॥7-3-46॥

कदाचित् प्रणतं प्रेक्ष्य लक्ष्मणं लक्ष्मणाग्रजः।
उवाच वाचं सद्धर्म्माञ्छिक्षयन् क्षत्रियोचितान्॥1॥

पौरजानपदानां यत् कार्य्यं लक्ष्मण चिन्त्यताम्।
अविचारयतो राज्ञो धर्मकामौ विनश्यतः॥2॥

गोविवादेन सम्प्राप्तौ ब्राह्मणौ राजवेश्मनि।
दिनत्रयान्तेऽप्यप्रेक्ष्य नृगं शापममुञ्चताम्॥3॥

यजमानं निमिं सत्रे निद्रयाऽनभिभाषिणम्।
वसिष्ठः शप्तवांस्तस्माद् राजा नित्योद्यतो भवेत्॥4॥

शप्तोऽपि ब्राह्मणै राजा क्षमी चेत् सुखमाप्नुयात्।
ययातिः शुक्रशप्तोऽपि क्षमी क्षेममवाप्तवान्॥5॥

| |
|---|
| संरक्ष्यः क्षत्रधर्म्मोऽयमस्माभिस्तु विशेषतः।<br>श्रेष्ठानां चरितं लोकैः प्रमाणं क्रियते यतः॥6॥ |
| एवं रामोदितः सोऽथ पौरजानपदान् प्रति।<br>चतुरश्चतुरः कार्य्ये सामादीन् विनियुक्तवान्॥7॥ |
| एकया द्वौ विनिश्चित्य तिसृभिः पञ्च साधयन्।<br>षड्भिः सप्त पुरा रक्षन् रामं प्रीणाति लक्ष्मणः॥8॥ |
| न कश्चित् कस्यचित् क्वापि कार्य्यं नाकृतमैक्ष्यत।<br>लक्ष्मणानुगते देवे रामे राजनि राजति॥9॥ |
| कदाचिल्लक्ष्मणोऽपश्यच्छ्वानं द्वारमुपागतम्।<br>पाहि देव शरण्येति क्रोशन्तं द्विपदस्थितम्॥10॥ |
| रामराज्ये भयं किं ते ब्रूहीत्याचष्ट लक्ष्मणः।<br>राममेव दिधृक्षेऽहमित्यवोचत् स  कुकुरः॥11॥ |
| रामाज्ञया लक्ष्मणेन प्रविशेति प्रचोदितः।<br>सारमेयो विनीतात्मा प्रविवेश प्रोभो सभाम्॥12॥ |
| विवक्षितं ब्रूह्यशङ्कस्त्वमित्युक्तो जगद्गुता।<br>सारमेयोऽब्रवीदुच्चेर्न्नीचयोनिरनीचवत्॥13॥ |
| अगण्यगुणसम्पन्न जगन्मङ्गलकीर्त्तन।<br>नीचजातेः प्रलापो मे क्षम्यतां करुणाकर॥14॥ |
| भिक्षुः सर्वत्र्थसिद्धो मां दण्डेनाताडयद् भृशम्।<br>अनागसं दीनतरं लोकानां त्वयि शास्तरि॥15॥ |

| |
|---|
| श्रुत्वा शुनेति गदितं क्षत्रा भिक्षुं तमानयत्।<br>भिक्षोर्दण्डं सभामध्ये सर्वज्ञोऽपि व्यचीचरत्॥16॥ |
| दण्डं निपातयस्यस्मिन् यदि योग्यं प्रदीयताम्।<br>कालञ्जरे कौलपत्यमित्युवाच स कुक्कुरः॥17॥ |
| तच्छ्रुत्वेशोऽभ्यषिञ्चत् तं कालञ्जरजनाधिपम्।<br>गजस्थं प्रापयामास दृष्टं देवालयं च तम्॥18॥ |
| दण्डार्हायेह विप्राय वरो दत्तः कथं विभो।<br>इत्यवोचन्त सचिवा रामं कौतूहलाकुलाः॥19॥ |
| रामेण चोदितः प्रोचे श्वाऽयं जातिस्मरस्तदा।<br>कालञ्जरे कौलपत्याच्छ्वयोनित्वं तदात्मनः॥20॥ |
| ततः प्रणम्य रामाय कृतकृत्यः स कुक्कुरः।<br>गत्वा वारणसीं वायुं तत्रोपास्यानघोऽभवत्॥21॥ |
| सभागतः स भगवान् कदाचिद् भ्रातृभिः सह।<br>प्रतीक्षमाणा विज्ञाय मुनीन् द्वास्थैरुपाह्वयत्॥22॥ |
| च्यवनाख्यं पुरस्कृत्य भार्ग्गवं मुनयो मुनिम्।<br>रामाय तीर्त्थकलशान् फलमूलानि चाऽदिशन्॥23॥ |
| सौवर्ण्णान्यासनान्येभ्यो दत्वा सम्पूज्य च प्रभुः।<br>स्वागतं वो मुनिश्रेष्ठाः किं कार्य्यं चेत्यवोचत॥24॥ |
| रामवाणीसुधाध्वस्ततापत्रयमकल्मषम्।<br>उवाच तं मुनिशतं निष्पतद्बाष्पलोचनम्॥25॥ |

| |
|---|
| नाथ नाऽविदितं किं ते वदामोऽथ तदाज्ञया।<br>मधोः सुतो मधुवने वर्तते लवणोऽसुरः॥26॥ |
| मुनीन् मुनिकुमारांश्च मुनिदारानभक्षयत्।<br>नृशंसो यानसौ देव तेषां सङ्ख्या न विद्यते॥27॥ |
| मधुना तपसा प्राप्तं शूलं माहेश्वरं महत्।<br>तेन दायेन देवैरप्यबाध्यो बाधते जगत्॥28॥ |
| अलब्धशरणा दीनाश्चरन्तो भुवने वयम्।<br>रावणारिमथ ज्ञात्वा विष्णुं त्वां शरणं गताः॥29॥ |
| ऋषीणां भाषितं श्रुत्वा रामः स्मितमुखाम्बुजः।<br>कस्यांशोऽयमिति प्रोच्य भ्रातृणां वक्त्रमैक्षत॥30॥ |
| लक्ष्मणः प्राञ्जलिरबूद्धनिष्यामि महासुरम्।<br>इत्यूचे भरतः पीठादुत्तस्थौ भरतानुजः॥31॥ |
| शत्रुघ्नः प्राञ्जलिः प्रोचे प्रसीद पुरुषोत्तम।<br>आर्य्यो मे मध्यमो धन्यस्त्वच्छुश्रूषां वनेऽकरोत्॥32॥ |
| भरतेन ममाऽऽर्य्येण मयि जीवति किङ्करे।<br>चतुर्द्दश समास्तप्तं त्वत्प्रीत्यै भूमिशायिना॥33॥ |
| ब्रह्मघ्नं लवणं हत्वा त्वत्प्रसादेन केवलम्।<br>सात्र्थो शत्रुघ्नता स्यान्मे प्रोच्येति प्रणनाम सः॥34॥ |
| प्रसन्नो भगवानूचे करिष्याम्यभिषेचनम्।<br>शत्रुघ्न लवणघ्नस्त्वं पाहि तान् विषयानिति॥35॥ |

| |
|---|
| शत्रुघ्नो लज्जितः प्रोचे किङ्करोऽहं न राज्यभाक्।<br>कनिष्ठस्याभिषेकोयं ज्येष्ठैर्न्न क्रियतामिति॥36॥ |
| वसिष्ठाद्यैर्द्विजश्रेष्ठैरभ्यषिञ्चित् ततोऽनुजम्।<br>रामस्तस्मिन्नहन्यासीदयोध्यायां महोत्सवः॥37॥ |
| शत्रुघ्नायाथ शत्रुघ्नं शरं दत्वाऽब्रवीत् प्रभुः।<br>शरोऽयं प्राङ्मया सृष्टः शयानेन महार्ण्णवे॥38॥ |
| असूदयं तदा घोरावनेन मधुकैटबौ।<br>समस्तवीर्य्यसारोऽयममोघस्तेऽरिसूदनः॥39॥ |
| इत्युक्त्वा प्रेषयामास देवस्तं दैत्यमृत्यवे।<br>आपन्नानां प्रपन्नानां मुनिनामप्यमृत्यवे॥40॥ |
| चत्वार्य्यश्वसहस्राणि रथानां द्वे सहस्रके।<br>गजानां च शतं दत्वा पदातीन् सददौ बहून्॥41॥ |
| सुवर्ण्णरत्नाकल्पांश्च प्रदाय बहुलान् प्रभुः।<br>तेजसा पूरयामास शत्रुघ्नं परिरभ्यसः॥42॥ |
| प्रणम्य रामं सर्वांश्च गुरूनत्राभिवन्द्य सः।<br>पूर्वं प्रस्थाप्यसैन्यं स्वं द्विजैः सार्द्धं स्वयं ययौ॥43॥ |
| वाल्मीकेराश्रमं प्राप्य सौमित्रिर्म्मित्रवर्द्धनः।<br>अभ्यवन्दत तं दृष्ट्वा तेन च प्रत्यपूज्यत॥44॥ |
| प्राचेतसोऽथ प्रोवाच सौदासस्येममाश्रमम्।<br>शापस्य प्राप्तिमोक्षौ च वसिष्ठात् स्वपुरोहितात्॥45॥ |

हरिहरिरमणीविलासमूलं कुशलवसूदयमत्र मन्यमानः।
सकलसुजनसौख्यदं निशां तां व्यधित स रामसहोदरोऽत्र वासम्॥46

इति श्रीनारायणपण्डिताचार्य्यविरचिते रामाङ्के सङ्ग्रहरामायणे उत्तरकाण्डे तृतीयः सर्ग्गः ॥7-3-46॥

[आदितः श्लोकाः 3184+46=3230]

## चतुर्थः सर्ग्गः ॥7-4-79॥

शत्रुघ्नो मुनिमामन्त्र्य ततः प्रायादुदङ्मुखः।
सम्प्राप्य यमुनातीरं न्यवसन्मुनिभिः समम्॥1॥

शुश्राव च्यवनेनोक्तं लवणस्य स विक्रमम्।
अयोद्याधिपतेः पूर्वं मान्धातुर्न्निधनादिकम्॥2॥

ततो रामानुजः प्रातरतीत्य यमुनां गतः।
तस्थौ मधुवनद्वारि चापरोपधरो बली॥3॥

ततोऽर्द्धदिवसे प्राप्ते लवणः प्रत्यदृश्यत।
भक्षार्त्थं स्वपुराद् यातः सहस्रं प्राणिनां वहन्॥4॥

त्वादृशानां सहस्राणि भक्षितानि मया ननु।
किमर्त्थं स्वयमागास्त्वमित्येनं लवणोऽब्रवीत्॥5॥

इत्थं विकत्थनैः किं ते ननु रामानुजोऽस्म्यहम्।
दन्द्वयुद्धं त्वया देयमिति सौमित्रिरब्रवीत्॥6॥

मद्भ्रातृघ्नस्य रामस्य हन्तुं त्वां भ्रातरं बत।
आनेष्याम्यायुधमिति शत्रुघ्नं लवणोऽब्रवीत्॥7॥

| |
|---|
| ब्रह्मघ्नस्त्वं न मोक्तव्यो दृष्टमात्रस्तु मादृशैः।<br>कितव क्व प्रयासीति शत्रुघ्नः शत्रुमब्रवीत्॥8॥ |
| लवणोऽसहमानोऽत मानी तां पुरुषां गिरम्।<br>वृक्षमुत्पाट्य रूक्षाक्षः शत्रुघ्नं प्रत्युपाद्रवत्॥9॥ |
| क्षिप्तंवृक्षमसम्भ्रान्तः शरैश्चिच्छेद् राघवः।<br>पुनश्चैवं पुनश्चैवं तदाश्चर्य्यमवर्त्तत॥10॥ |
| शरान् ववर्ष शतशः शत्रुघ्नः शत्रुवक्षसि।<br>सालमुत्तालमुत्पाट्य लवणस्तमताडयत्॥11॥ |
| सौमित्रिस्ताडितस्तेन विसञ्ज्ञो न्यपदत् भुवि।<br>हाहाकृतं मुनिगणैः प्रहृष्टं लवणेन च॥12॥ |
| रामानुजः पुनः सङ्ज्ञान् प्राप्तः क्रोधाग्निना ज्वलन्।<br>रामदत्तममोघं तं शरं चापेन सन्दधे॥13॥ |
| बाणस्य तस्य ज्वलतो ज्वालया भीषितं जगत्।<br>ब्रह्माणं शरणं प्राप मा भीरित्यभ्यधादजः॥14॥ |
| शरः शत्रुघ्ननिर्म्मुक्तो निहत्य लवणासुरम्।<br>रसातळं प्रविश्याथ पुना रामकरं ययौ॥15॥ |
| निवेशमकरोद् वीरस्तत्र देवप्रसादतः।<br>मधुरा नगरी साऽभूत् सर्वसम्पत्समन्विता॥16॥ |
| स्वां च सेनां निवेश्यात्र रामपाददिधृक्षया।<br>द्वादशे वत्सरे गच्छन् वाल्मीकेराश्रमं ययौ॥17॥ |

लवणस्य वधात् प्रीतो वाल्मीकी राघवानुजम्।
आतिथ्याय समामन्त्र्य ससैन्यं समतर्प्पयत्॥ 18॥

ततः श्रुत्वाऽतिमधुरं गीतं कौतूहलाकुलाः।
सैनिकास्तं मुनिं प्रष्टुं शत्रुघ्नं समचोदयन्॥ 19॥

महर्षिर्हि महातेजा बह्वाश्चर्य्योऽस्य चाऽऽश्रमः।
न प्रष्टव्यमिहास्माभिरित्यूचे रामसोदरः॥ 20॥

अभिरामं स रामस्य चरितं गीतमद्भुतम्।
आकर्ण्य कर्णपीयूषं न सुष्वाप निशामिमाम्॥ 21॥

प्रतस्थे मुनिमामन्त्र्य प्रभाते भरतानुजः।
अयोध्यां शात्रवायोध्यां विवेश च ससैनिकः॥ 22॥

मातरं तर्णकइव धर्म्मतप्तइवामृतम्।
रामपादमुपव्रज्य निर्ववौ रामसोदरः॥ 23॥

साम्राज्यसौख्यतूलं मे नाथ त्वद्विरहानलः।
क्षिणोति मे प्रसीदेति ब्रुवाणः प्रणनाम सः॥ 24॥

क्षत्रधर्मं प्रजारक्षां शुश्रूषां मे समाचर।
तात नात्र विषादः स्यादित्यूचे तं जगद्गुरुः॥ 25॥

पञ्चरात्रमसौ तत्र स्वामिना सार्धमूषिवान्।
प्रभोर्न्नियोगाच्छत्रुघ्नो मधुरां सानुगोऽगमत्॥ 26॥

अथ कश्चिद् द्विजो वृद्धो नगरद्वारमागतः।
सङ्गृह्य पुत्रं मृतकं रुरोदोच्चैः शुचाऽऽकुलः॥ 27॥

हा पुत्र रामराज्येऽस्मिन्न मृत्युर्व्युत्क्रमात् क्वचित्।
त्वामहं मन्दभाग्यत्वात् परासुमवलोकये॥28॥

वत्सोत्तिष्ठ कळैर्वाक्यैः पितरौ नौ प्रहर्षय।
नैवं चेदचिरेण त्वामनुयास्याव एव हि॥29॥

सर्वलोकैकशरणं शरणं मे भवेत् प्रभुः।
पातु मे पतितं पोतं राघवः करुणाकरः॥30॥

एवं ब्रुवाणे विप्रेऽस्मिन् नारदो वाक्यमब्रवीत्।
मुनिमण्डलमद्ध्यस्थः सभायां रामसन्निधौ॥31॥

धर्म्मश्चतुष्पाद् धर्मेश त्वत्प्रसादात् कृते स्थितः।
क्रमान्न्यूनपदोऽन्यत्र सोऽधर्म्मपदपीडितः॥32॥

अद्विजा द्विजधर्म्माणो नूनं लोकविनाशकाः।
दयालुना त्वया नाथ तेषु दण्डो निपात्यताम्॥33॥

नारदेनेति गदिते राघवेणाभिनन्दिते।
रामानुजो रामवाक्यात् सान्त्वयामास तं द्विजम्॥34॥

स्मृतमात्रमुपायातं पुष्पकं पुष्करेक्षणः।
आरुह्य विचचाराथ दिक्षु सर्वासु च क्षणात्॥35॥

विचिन्वानः किलान्याय्यं सर्वसाक्षी स राघवः।
याम्यां दिशि सरः प्राप शैवलस्योत्तरान्तिके॥36॥

अधः शिरसमूर्ध्वाङ्घ्रिं लम्बमानं तपस्विनम्।
तत्र दृष्ट्वा स पप्रच्छ को भवानिति विश्ववित्॥37॥

| |
|---|
| जम्बुको नाम शूद्रोऽहं त्र्यम्बकस्य पदेच्छया।<br>व्रतं तीव्रं करोमीति प्रोचे तं शूद्रतापसः॥38॥ |
| निष्कृष्य तरसा खड्गं कोशादाकाशसन्निभम्।<br>चिच्छेद तच्छिरस्तेन देवो देवान् प्रहर्षयन्॥39॥ |
| अधर्म्ममुत्साद्य विभुर्ज्जीवयामास तं शिशुम्।<br>अन्यथाऽपि समर्थः सन् लोकशिक्षणमाचरन्॥40॥ |
| स्तवः सकलनाथस्य सुमनोभिरलं कृतः।<br>भगवांस्तैर्विकीर्ण्णाभिः सुमनोभिरलङ्कृतः॥41॥ |
| अगस्त्यस्याऽऽश्रमं दिव्यं प्राप पापहराह्वयः।<br>कुम्भसम्भव आश्वेनं शम्भुपूज्यमपूजयत्॥42॥ |
| रामाय रम्यां प्रददौ मालाममलिनां मुनिः।<br>इमां च वाणीमाचष्ट राघवं भक्तिमत्तमः॥43॥ |
| अनन्ययज्ञकृच्छ्वेतो राजा मांसमदन्निजम्।<br>मालां ब्रह्मनियोगान्मे दत्वा तदघमत्यगात्॥44॥ |
| सेयं माला मया दत्ता तुभ्यमभ्यर्हितात्मने।<br>सर्वोऽपि काल्याणविधिरनन्तो ह्यर्प्पितस्त्वयि॥45॥ |
| दण्डस्य राज्ञो विषयो दण्डकारण्यतां ययौ।<br>शुक्रशापेन तत्राग्रे श्वेतश्चक्रे महत्तपः॥46॥ |
| मुनावेवं कथयति ययावस्तं दिवाकरः।<br>न्यवसत् तत्रतां रात्रिं रामो मुनिगणार्च्चितः॥47॥ |

प्रातः प्रायास्यन् प्रोवाच भगवान् कुम्भसम्भवम्।

पुनस्ते दर्शनं भूयात् पावनस्त्वं नृणामिति॥48॥

निष्पतद्बाष्पनयनो भक्तिमानभ्यधान्मुनिः।

पावनोऽस्मि प्रभो सत्यं पादपद्मस्मृतेस्तव॥49॥

महापातकिनः पूताः श्रुतिस्मृत्यनुकीर्त्तनैः।

यस्य ते स भवान् राम साक्षात्पावनपावनः॥50॥

इत्यगस्त्येन गदितो मन्दहासोऽभिनन्द्य तम्।

राजमानो विमानेन राजराजोऽगमत् पुरीम्॥51॥

सर्वसम्पत्समृद्धां तां प्रविवेश पुरीं प्रभुः।

स्मृतमेहीति सम्प्रोच्य पुष्पकं च विसृष्टवान्॥52॥

लक्ष्मणं भरतं चाथ द्वास्तैराहूतवानयम्।

प्रणतौ प्रवणावेतौ प्रणयादभिषस्वजे॥53॥

यज्ञैर्यज्ञेशमात्मानं यक्ष्येऽहं मुख्यकल्पकैः।

इत्युक्तवन्तमूचाते तौ रामं साधुसाध्विति॥54॥

लक्ष्मीशं लक्ष्मणः प्रोचे बद्धाञ्जलिपुटः पटुः।

अश्वमेधेन विश्वेश यष्टुमर्हसि साम्प्रतम्॥55॥

पुरा विष्णुप्रसादेन वज्री वृत्रममारयत्।

ब्रह्महत्याविषण्णोऽथ वाजिमेधेन पावितः॥56॥

त्वं तु यज्ञं विधेहीमं लोकशिक्षणलक्षणः।

इत्युक्तवन्तं प्रोवाच लक्ष्मणं लक्ष्मणाग्रजः॥57॥

| |
|---|
| इळो राजा गतः स्त्रीत्वं मासं मासं ततः पुमान्।<br>अश्वमेधात् पुमानेव जज्ञे श्रेष्ठो हि स क्रतुः॥58॥ |
| एवमुक्त्वा स भगवानाहूय मुनिपुङ्गवान्।<br>वसिष्ठवामदेवादीनामन्त्र्येदं वचोऽब्रवीत्॥59॥ |
| सुग्रीवादीन् वानरेन्द्रान् सगणं च विभीषणम्।<br>देवर्षिमानुषादींश्च सर्वानाहूय लक्ष्मण॥60॥ |
| पृथिव्यां पार्थिवा ये च नानाविद्याश्च ये द्विजाः।<br>सर्वे सदारा आयान्तु हयमेधं महाक्रतुम्॥61॥ |
| स्याद् यज्ञवाटः सुमहान् गोमत्या नैमिशे तटे।<br>सम्भ्रियन्तां च सम्भारा वसिष्ठस्य नियोगतः॥62॥ |
| शतं वाहसहस्राणं नयेन्नस्तण्डुलान् शुचीन्।<br>अयुतं तिलमुद्गानामग्रतो भरतो व्रजेत्॥63॥ |
| सुवर्णकोटीर्बहळा हिरण्यं तच्चतोत्तरम्।<br>उच्चावचं यदन्यच्च नयन्तु भरतानुगाः॥64॥ |
| शिल्पिनो नागरान् बन्धून् मम पत्नीं च काञ्चनीम्।<br>अग्रतो भरतः कृत्वा यातु यज्ञप्रवृत्तये॥65॥ |
| इत्युक्तं रामदेवेन श्रुत्वा तावविलम्बितम्।<br>चक्राते तत् तथैवाथ दक्षौ भरतलक्ष्मणौ॥66॥ |
| हयं सुलक्षणं रामश्चारयिष्यन्नथामुचत्।<br>ऋत्विग्भिः सहितो रक्षन् लक्ष्मणस्तमथान्वगात्॥67॥ |

| |
|---|
| चतुरङ्गबलोपेतो विप्रैः परिवृतः प्रभुः।<br>नैमिशारण्यमासाद्य यज्ञवाटमवैक्षत॥68॥ |
| राजानः सर्वराष्ट्रेभ्यो वैश्यवत् करमाहरन्।<br>भरतस्तान् सशत्रुघ्नः सर्वकामैरपूजयत्॥69॥ |
| ब्रह्मण्यदेवमाजग्मुर्ब्राह्मणाः सर्वदेशतः।<br>सुग्रीवाद्यास्ततश्चक्रुरेतेषां परिवेषणम्॥70॥ |
| विभीषणो भूषणाढ्यः शुची रक्षोगणैर्वृतः।<br>ऋषीणामुग्रतपसां परिचर्य्यां चकार ह॥71॥ |
| पितामहपितुर्य्यज्ञं पितामहपुरोगमाः।<br>देवोपदेवा आजग्मुर्हनुमांस्तानपूजयत्॥72॥ |
| अश्वमेधे प्रवृत्तेऽस्मिन्नश्वो मेध्य उपागमत्।<br>भ्रुवं प्रदक्षिणीकुर्वन् साक्षाल्लक्ष्मणरक्षितः॥73॥ |
| दीक्षिते यज्ञपुरुषे दीक्षितान्वीक्षिते स्वयम्।<br>प्रावर्त्तत महायज्ञो ब्राह्मणैर्ब्रह्मवादिभिः॥74॥ |
| सर्वेशोऽतर्प्पयत् सर्वान् वासोमाल्यानुलेपनैः।<br>रम्यैरप्यन्नपानाद्यैराकल्पमणिकाञ्चनैः॥75॥ |
| सर्वेभ्यः सर्वदा सर्वं सर्वेश्वरनियोगतः।<br>निशाचरा वानराश्च दिशन्ति स्म दिनेदिने॥76॥ |
| देवदेवस्य यज्ञेऽस्मिन् देहिशब्दो न जात्वपि।<br>अलंशब्दोऽनवरतं वर्त्तते स्म महाजने॥77॥ |

संवत्सरं सम्प्रवृत्तं दृष्ट्वा राममखोत्सवम्।
चिरायुषोऽत्र मुनयो जगुः कौतूहलाकुलाः॥78॥

नाभूत् समो यस्य न चैव भावी भवंश्च नो किं पुनरुक्तमोऽस्मात्।
पूर्णो गुणैर्दोषलवैरसङ्गी रामस्य तुल्यः क्रतुरेष एव॥79॥

इति श्रीनारायणपण्डिताचार्य्यविरचिते रामाङ्के सङ्ग्रहरामायणे उत्तरकाण्डे चतुर्थः सर्गः॥7-4-79॥ [आदितः श्लोकाः 3230+79=3309]

## पञ्चमः सर्गः ॥7-5-27॥

अथ यज्ञेश्वरो यज्ञमुदवस्य विधानतः।
ऋत्विक्सदस्यानन्यांश्च पूर्णोर्वित्तैरतर्प्पयत्॥1॥

विससर्ज नरेन्द्रांस्तान् ऋक्षवानरराक्षसान्।
परिपूज्य जगन्नाथः प्रणतान् विरहासहान्॥2॥

अग्निष्टोमातिरात्रादीन् वाजपेयाननेकशः।
बहुस्वर्णव्ययानेवं चक्रे चक्रायुधः क्रतून्॥3॥

बभूवुः सम्पदः सर्वा विपदो नैव काश्चन।
रामे राजनि लोकानां धर्म्मशिक्षणलक्षणे॥4॥

कौसल्याद्यास्तु कालेऽस्मिन् देव्यो दिवमुपाययुः।
तासां देवः क्रियाः कुर्वन् द्विजेभ्योऽदान्महद् धनम्॥5॥

अथो कदाचित् सम्प्राप्तं केकयेन्द्रनियोगतः।
गार्ग्यमाङ्गिरसं वृद्धं पूजयामास राघवः॥6॥

| |
|---|
| कम्बळाजिनरत्नानि बहुन्यश्वायुतं तथा।<br>युधाजिता प्रेषितानि जग्राह भगवान् द्विजात्॥7॥ |
| गार्ग्यो गामब्रवीद् रामं प्रोक्तां केकयभूभृता।<br>शैलूषाख्यस्य दुःशीला गन्धर्वस्याभवन् सुताः॥8॥ |
| बाधन्ते बलिनो लोकांस्ते जित्वा जगतः पतीन्।<br>तान् सूदयित्वाऽथ जगत् त्वं पालय कृपालय॥9॥ |
| कटूंस्त्रिकोटिसङ्ख्यांस्तान् हत्वा कुरु पुरे उभे।<br>सिन्धोरुभयतः पार्श्वे गन्धर्वविषये शुभे॥10॥ |
| इत्यङ्गिरःसुतेनोक्तो देवो देवारिमृत्यवे।<br>भरतस्य कुमारौ तं भरतं च न्ययोजयत्॥11॥ |
| ययौ बहुबलैः सार्द्धं सगार्ग्यो नन्दनान्वितः।<br>अद्ध्यर्धमासकालेन केकयान् केशवानुजः॥12॥ |
| ततः केकयराजेन ससैन्येन समन्वितः।<br>गन्धर्वनगरं प्राप्य वीरः शङ्खमपूरयत्॥13॥ |
| सर्वे बलमदान्धास्ते गन्धर्वाः सिंहविक्रमाः।<br>अभ्ययुर्भरतानीकं गर्जन्तो विविधायुधाः॥14॥ |
| गन्धर्वेन्द्रैर्नरेन्द्राणां सप्तरात्रमभूत् कलिः।<br>अतुलस्तुमुलो रौद्रः सुराणामसुरैरिव॥15॥ |
| रावणारेरवरजो न क्षाम्यन् परपौरुषम्।<br>कालास्त्रं विमुमोचाऽथ संवर्तं नाम दारुणम्॥16॥ |

| |
|---|
| तेन निर्दह्यमानास्ते कालपाशवशाः समम्।<br>आर्त्ता मुहूर्त्तमात्रेण गन्धर्वा मम्रुरुद्धताः॥17॥ |
| क्रव्यादनेन क्रव्यादा वैरिनाशेन चामराः।<br>स्वोपसर्ग्गक्षयान्मर्त्या मोदमाददिरे मुहुः॥18॥ |
| पुष्करं पुष्करावत्यां तक्षं तक्षशिलापुरे।<br>भरतो विषये तस्मिन् पुत्रौ वीरौ न्यवेशयत्॥19॥ |
| निधाय राज्ययोस्तौ स धनधान्यसमृद्धयोः।<br>पञ्चमे वत्सरेऽयोध्यां प्राप्य राममुपानमत्॥20॥ |
| भरतेनाथ सम्मन्त्र्य रामो राजीवलोचनः।<br>चक्रे कारापथे रम्यामङ्गदीयाभिधां पुरीम्॥21॥ |
| मल्लभूम्यां समृद्धायां चन्द्रकान्ताभिधां पुरीम्।<br>कृत्वाऽथ लक्ष्मणसुतौ रामो राज्येऽभ्यषेचयत्॥22॥ |
| अङ्गदीयां पुरीं रम्यामङ्गदं ज्येष्ठमात्मजम्।<br>धार्म्मिकं लक्ष्मणो नीत्वा चक्रे पश्चिमभूमिपम्॥23॥ |
| चन्द्रकान्तपुरं निन्ये चन्द्रकेतुं ततोऽनुजम्।<br>भरतो भगवद्वाक्यात् तत्र राज्यमरक्षयत्॥24॥ |
| प्रोष्य तौ पुत्ररक्षात्र्थं वत्सरं पुत्रवत्सलौ।<br>रामपादाम्बुजे लोलौ राजहंसाविवाऽपतुः॥25॥ |
| एवं विधान्यगण्यानि कर्म्माणि भगवान् व्यधात्।<br>लेकेशैर्ब्रह्मरुद्राद्यैर्दुष्कराण्यपि चेतसा॥26॥ |

वीर्य्याणि विष्णोरिह वक्ति को वा सङ्ख्यांश्च विद्वान् जगदण्डपांसून्।
संवर्ण्णितानित्युरुमन्त्रवर्ण्णैः को वर्ण्णयेद् रामपराक्रमांस्तान्॥27॥

इति श्रीनारायणपण्डिताचार्य्यविरचिते रामाङ्के सङ्ग्रहरामायणे उत्तरकाण्डे पञ्चमः सर्ग्गः॥7-5-27॥

[आदितः श्लोकाः 3309+27=3336]

## षष्ठः सर्ग्गः ॥7-6-38॥

भूलोकं ब्रह्मलोकाभं दृष्ट्वा रामेण पालितम्।
आत्मसद्मविशेषात्थं देवाः शम्भुं ययाचिरे॥1॥

विचार्य्य कार्य्यं गिरिशं विरिञ्चिः क्ष्मामयापयत्।
स कालात्मा कपर्द्दी च रामपार्श्वमुपाययौ॥2॥

स राजद्वारमासाद्य कालस्तापसरूपवान्।
महर्षेर्द्दूतमाचक्ष्व मामित्याचष्ट लक्ष्मणम्॥3॥

सञ्ज्ञापितो लक्ष्मणेन रामवाक्यात् प्रवेशितः।
उपवेश्याऽसने दिव्ये रामेण प्रत्यपूज्यत॥4॥

एकान्ते मे गुरोर्वाक्यं देव वक्ष्यामि ते पुरः।
इत्युक्ते तेन कालेन व्यसृजद् राघवोऽखिलान्॥5॥

लक्ष्मण द्वारि तिष्ठ त्वं नैवान्तर्म्मुञ्च कञ्चन।
वध्यः स्याः कस्यचिन्मोक्ष इत्यूचे राघवोऽनुजम्॥6॥

अतिष्ठल्लक्ष्मणो द्वारि बाढमित्यभिधाय तम्।
कथयामास चैकान्ते कपर्द्दी कमलेक्षणम्॥7॥

देवकार्य्यमकारीदं त्वया दुष्टविनाशनम्।
अतेदानीं निजं धाम नाथ सम्पद्यतां द्रुतम्॥8॥

इत्तमर्त्थयते देव सदेवस्त्वां पितामहः।
विशेषमात्मलोकस्य भूलोकान्ननु वाञ्छति॥9॥

ब्रह्मणेदं विसृजसि मया संहरसि प्रभो।
त्वमेव पालयस्येवं त्रीन् गुणान् वर्त्तयस्यहो॥10॥

त्वन्नाभिपद्मभूर्ब्रह्मा पद्मभूतनयोऽस्म्यहम्।
तस्मात् पौत्रस्य मे वाक्यमयोग्यमपि लाल्यताम्॥11॥

इत्युक्त ऊचे भगवान् नायोग्यं भाषते भवान्।
ब्रह्माऽपि मत्प्रियापेक्षी प्रयास्याम्यचिरादिति॥12॥

एवं तयोर्म्मन्त्रयतो रुद्र एवान्यरूपवान्।
दुर्वासा नाम दुर्वारः पुरद्वारमुपागमत्॥13॥

मम कारय सौमित्रे क्षणेऽस्मिन् रामवीक्षणम्।
गामृषेरिति साटोपां श्रुत्वा दध्यौ स लक्ष्मणः॥14॥

आर्य्यस्य दुर्य्यशः स्याद्धि मुनेरातित्थ्यभङ्गतः।
सूदयन्नपि कुर्य्यात् स दयां मयि दयानिधिः॥15॥

इति सञ्चिन्त्य सोऽमुञ्चद् यतिं भागवताग्रणीः।
रामश्च कालं विसृजन् मुनिं प्राप्तमवैक्षत॥16॥

अत्रिपुत्रोऽब्रवीद् रामं निराहारोऽस्मि तापसः।
सहस्रवत्सरात् राम क्षिप्रं मां भोजयेद् भवान्॥17॥

| |
|---|
| प्राक् सिद्धं मे न भोज्यं स्यादन्नं सेत्स्यति चेदथ।<br>क्षुधं कथं सहे वीर क्षणेऽस्मिन् देहि भोजनम्॥18॥ |
| इत्युक्तमात्रे मुनिना देवः स्वात् पाणिपल्लवात्।<br>अन्नं चतुर्ग्गुणं सृष्ट्वा षड्रसं प्रददौ क्षणात्॥19॥ |
| भुक्त्वा भक्त्या यतिवरस्तुष्टस्तुष्टाव केशवम्।<br>त्वामृते कोऽत्र भुवने प्रार्त्थितं मे दिशेदिति॥20॥ |
| सभागतः स भगवान् प्रयाते कोपने मुनौ।<br>वधस्त्यागो हि सुहृदां मत्वेत्याचष्ट लक्ष्मणं॥21॥ |
| गच्च लक्ष्मण लोकं स्वं ब्रुवाणमिति राघवम्।<br>परिक्रम्य प्रणम्य द्राङ् निर्ज्जगाम स लक्ष्मणः॥22॥ |
| स ग्वता सरयूतीरं समाधाय मनो हरौ।<br>निरुच्छ्वासो  निरायासो योगेन स्वात्मतां ययौ॥23॥ |
| महामणिश्रेणिमतीं फणादशशतीं दधत्।<br>अनन्तोऽनन्तपर्य्यङ्को बभौ देवैः सुसेवितः॥24॥ |
| यो मोक्षमक्षयानन्दमपेक्षेतानुयातु सः।<br>इत्थं रामेण सर्वत्र भेरीभिरभिघोषितम्॥25॥ |
| कैवल्यनाथे कैवल्यं धिशत्येवं दयानिधौ।<br>विनैतान् दीर्घभविनः सर्वेऽप्यन्वगमन् विभुम्॥26॥ |
| दर्शनात् स्पर्शनाद् भूम्नः श्रवणात् कीर्त्तनादपि।<br>स्मरणाच्चामलात्मानस्तमन्वीयुश्चराचराः॥27॥ |

| |
|---|
| अभूच्चरणसामर्थ्यमचराणां च देहिनाम्।<br>सर्वान्तर्य्यामिणस्तस्य रामस्यैव प्रसादतः॥28॥ |
| अथाभ्यषिञ्चद् भगवान् कोसलाधिपतिं कुशम्।<br>साम्राज्ये यौवराज्ये तु लवमुत्तरराष्ट्रपम्॥29॥ |
| कुशं कुशावतीपुर्य्यां शाबस्त्यां च लवं प्रभुः।<br>चतुरङ्गं बलं भूरि दत्वा कोशं न्यवेदयत्॥30॥ |
| अस्त्रशास्त्रविशेषज्ञौ शास्त्रज्ञावतिधार्म्मिकौ।<br>कुमारौ स कुमाराभौ न्ययुङ्क्त क्षितिपालने॥31॥ |
| दूतैरुदितमाकर्ण्य रामप्रस्थानमद्भुतम्।<br>शत्रुघ्नोऽपि निजौ पुत्रावभ्यषिञ्चन्महामतिः॥32॥ |
| सुबाहुं मधुरापुर्य्यां निदधे पूर्वजं सुतम्।<br>शत्रुघातिनमप्येष नगरे वैदिशाह्वये॥33॥ |
| रथेनैकेन शत्रुघ्नः प्राप्यायोध्यां पुरीं द्रुतम्।<br>प्रयाणाभिमुखं रामं प्रणनाम जगत्प्रभुम्॥34॥ |
| निजराज्येऽभिषिच्य द्रागङ्गदं रिपुभङ्गदम्।<br>सुग्रीवः सगणः प्रायादा रामं सोऽपि विभीषणः॥35॥ |
| विभीषणं स्ववंशस्य भूषणं स्माऽऽह राघवः।<br>आ कल्पान्ताच्च मत्सेवी निजराज्यमवेरिति॥36॥ |
| रामाज्ञानियतः प्राज्ञो रामं सञ्चिन्तयन् सदा।<br>सद्धर्म्मानन्वतिष्ठत् स लङ्कां प्राप्य विभीषणः॥37॥ |

तदैव रामं भगवन्तमापुः सभागतं भागवताः समस्ताः।

सद्योऽन्यसङ्गो भृशमाप भङ्गं तेषां जगन्मङ्गलसङ्गमेन॥38॥

इति श्रीनारायणपण्डिताचार्य्यविरचिते रामाङ्के सङ्ग्रहरामायणे उत्तरकाण्डे षष्ठः सर्ग्गः॥7-6-38॥

[आदितः श्लोकाः 3336+38= 3374]

## सप्तमः सर्ग्गः॥ 7-7-52॥

तस्यां सभायां प्रतिभासमानं वायोः सुतं प्रेक्ष्य शुभासमानम्।

देवोऽथ दोर्भ्यामहिसन्निभाभ्यां समाश्लिषत् काममसन्निभाभ्याम्॥1॥

ससार सारं हृदये प्रसादं बभार भारं करुणारसानाम्।

निनाय नायं हनुमन्तमारादुवाच वाचं च रघुप्रवीरः॥2॥

तान् ब्रह्मचर्य्यादिगुणानगण्यान् मद्भक्तिसेवादिगुणास्तवामी।

निसर्ग्गपूर्णा अतिशेरते स्म महासमद्राइव निम्नगौघान्॥3॥

प्रेष्ठं तु सर्वत्र च सर्वदा ते वपुर्म्मदीयं यदुपाधिभिर्नौ।

सदैव साक्षात्कुरु तात तत् त्वं तत्वं परं योगिजनैर्विमृग्यम्॥4॥

गन्धर्वपूर्वैः परिगीयमानो गायन् यशः पावनपावनं मे।

अभीष्टभोगानुभवी रमेथा ममाग्रतोऽनुग्रहविग्रहस्य॥5॥

मम त्रिधाम्नस्त्रिषु धामसु त्वमनल्पगम्येषु चरेर्य्यथेष्टम्।

यदायदा यद्यदभीप्सितं ते सम्पत्स्यते तत्तदलं समस्तम्॥6॥

गदन्तमित्थं जगदेकनाथं जगाद् बद्धाञ्जलिराञ्जनेयः।

नगद्गदी नाश्रुमुखोऽधिभक्तो न विक्रिया धीरधियां भवेद्धि॥7॥

संवर्द्धमाना परिधूतमाना नव्याजिनी नव्यभिचारिणी च।
त्वद्भक्तिरीशास्त्ववियोगिनी मे सत्या तया सत्यमलं रमेऽहम्॥8॥

नमोनमो नाथ नमोनमस्ते नमोनमो राम नमोनमस्ते।
स्वामिन् पुनस्ते चरणारविन्दं नमामि तन्वा वचसा धियाऽपि॥9॥

प्राणस्य सूनुं तमिति ब्रुवाणमोमित्युदाहृत्य ततो मुकुन्दः।
प्रभाकरे प्रागचलं प्रयाते ययावयोद्ध्यानगरात् गरिष्ठात्।10॥

अनन्तमन्तःपुरवर्त्तिनस्ते पौराः जना जानपदाश्च सर्वे।
नराश्च नार्य्यः शिशवो युवानो वृद्धाश्च गच्छन्तमथान्वगच्छन्॥11॥

कैवल्यनाथे कमलेक्षणेऽस्मिन् कैवल्यदे कः किल नोपगच्छेत्।
मायाख्यदेव्या परिमुग्धबुद्धीन् विना यया संसरतीह देही॥12॥

सल्लोकसङ्घेन समागतोऽसौ कल्लोलिनीनामिव मण्डलेन।
हरिन्मणिश्रीरधिकं चकाशे हरिर्ग्गुणाम्भोनिधिरेव साक्षात्॥13॥

अप्येकसूर्य्यान्वयलब्धजन्मा सहस्रसूर्य्याभकिरीटयुक्तः।
अनन्तसूर्याधिकभाः स्वयं तु चित्राच्च चित्रं पुरुषोत्तमोऽयम्॥14॥

अहो महानीलमणीन्द्रलक्ष्म्याश्चोरोऽतिनीलः कुटिलोऽतिमात्रम्।
तथाऽप्ययं केशवकेशपाशो निर्द्दोषलेशोऽखिलसद्गुणाब्धिः॥15॥

विशेषको नो विशिशेष भूम्नः स्वयं विशिष्टां वदनेन्दुकान्तिम्।
विशेषकाख्या विफला न तस्य रम्यादशेषाच्च विशेषिणोऽत्र॥16॥

चन्द्रारविन्दाश्रियमाजहार मुखं मुकुन्दस्य रुचेति मिथ्या।
इदं द्वयं राममुखोपमत्वाल्लक्ष्मीसुधावास इतीक्षिका मे॥17॥

| |
|---|
| अत्यायताभ्यामरुणान्तराभ्यां विकस्वराभ्यां सदयोदयाभ्याम्।<br>पद्मेक्षणोऽनुक्षणमीक्षणाभ्यां निजाः प्रजा ज्ञानरसैरपूरि॥18॥ |
| विद्युल्लतामण्डलमञ्जुलाभ्यां कर्णोल्लसत्कुण्डलमण्डलाभ्याम्।<br>श्यामोऽतिगम्भीरवो जिगाय नवाम्बुदाडम्बरमम्बुजाक्षः॥19॥ |
| वेदार्थसारान् विमलाननर्घान्महामणीन्द्रानिव दुर्लभान् सः।<br>निर्गच्छतो राममुखादजस्रं जग्राह लोकः सकुतूहलोऽत्र॥20॥ |
| ताम्रोष्ठमुन्नम्रमनोज्ञनासं कनत्कपोलं नवकुन्ददन्तम्।<br>रामस्य रम्यभ्रुमुखं प्रजानां स्निग्धस्मितं विस्मयमाततान॥21॥ |
| मुक्ताकलापेन परं परीतः कण्ठे लसत्कौस्तुभरत्नराजः।<br>दुग्धाब्धिमुग्धे जितदभानुपुञ्जं ज्योतिः स्म रम्यं स्मरयत्यमुष्य॥22॥ |
| हरिन्मणिन्द्रस्थलहर्म्यरम्ये विलासिनी तस्य ललास लक्ष्मीः।<br>उरःस्थले सौरभमत्तभृङ्गा नूनं तदर्थं वनमालिकाऽभूत्॥23॥ |
| युद्धे रिपूणां मुसलायमानौ मालायमानौ जनकात्मजांसे।<br>सन्मण्डले कल्पनगायमानौ सत्यं करौ तस्य हि निःसमानौ॥24॥ |
| सर्वासुरघ्नं जगदेकसारं शरं च शार्ङ्गं च विभुर्बभार।<br>तयोर्न किञ्चित् प्रतिघातनं स्यात् षष्ठे रसे सोत्तरतां गतेऽपि॥25॥ |
| जगत्त्रयं चारुवलित्रयं च द्वयं लघिम्ना तुलितं बभार।<br>उदारभासा तनुनोदरेण मनोज्ञनाभेन स पद्मनाभः॥26॥ |
| वासः कनत्काञ्चनभङ्गपिङ्गं पर्य्यञ्चितं काञ्चनकाञ्चिदाम्ना।<br>रम्ये रमाया रमणस्य तस्य नितम्बबिम्बे नितरां विरेजे॥27॥ |

| |
|---|
| सीतापतेः सुन्दरमूरुयुग्मं हस्तीन्द्रहस्तोपममित्युदीर्य्य।<br>भृशावमत्वादुपमानभूमेर्दोलायते चित्तमिदं मदीयम्॥ 28॥ |
| क्रमात् तनिष्ठे रुचिरे सुवृत्ते जङ्घे जगन्मङ्गलकीर्त्तनस्य।<br>परस्परेणोपमिते कवीन्द्रैर्व्यक्तं त्रिलोक्यामुपमामलब्ध्वा॥ 29॥ |
| भासा नखा लज्जितबन्धुजीवा एवं च नो लज्जितबन्धुजीवाः।<br>पुनर्न्नवत्वं दधुरीक्षकाणामनादिपुंसो न पुनर्न्नवत्वम्॥ 30॥ |
| बालो रविर्ल्लोलगुणः सुगन्धिर्नो पद्मरागः परितामि पद्मम्।<br>विहाय सर्वानिति रागलक्ष्मीरियाय रामाङ्घ्रिमदोषलेशम्॥ 31॥ |
| रत्नाङ्गुलीयाङ्गदनूपुरादितद्भूषणानामपि भूषणानि।<br>अङ्गानि तस्याखिलभूषणानि स्वयं प्रभुत्वात् सुखचिन्मयानि॥ 32॥ |
| इमाननन्तस्य गुणाननन्ताननन्तबोधा विधिशर्वपूर्वाः।<br>अंशांशतो वक्तुमहो न शक्ताः कथं पुनर्म्मादृशमानवाः स्युः॥ 33॥ |
| सीता सिताभे मणिहेमदण्डे द्वे चामरे चारुतरे धुनाना।<br>श्रीर्ह्रीरिति द्वित्ववती परेशापार्श्वद्वये सर्वजनैरवैक्षि॥ 34॥ |
| तारुण्यलावण्यविलासलक्ष्मीरनाद्यनन्ताऽनुपमाऽनवद्या।<br>रामस्य पत्न्या ननु रामकान्त्या प्रतर्क्यतां वेदनिवेदिताऽपि॥ 35॥ |
| बिन्दूनमन्दान् विकिरत् सुधाया हारानिवाऽऽराद् ध्रुवमाप्तभूत्यै।<br>भूम्नः सितच्छत्रमधत्त चित्रं श्रीमान् हनूमान् हसितेन्दुबिम्बम्॥ 36॥ |
| चक्रं विधूताखिलदुष्टचक्रं चक्रात्मकोऽसौ भरतो दधानः. |
| भ्राजत्सहस्रांशुसहस्रतेजस्तस्यानुजो दक्षिणतो जगाम॥ 37॥ |

स्वयं स्वनन्तं श्वसनावपूरैश्चन्द्रच्छविं हासमिवातिरम्यम्।

शङ्खं तधच्छङ्खतनुः स्वयं च शत्रुघ्न आयात् प्रभुसव्यभागे॥38॥

तस्याग्रतो ब्रह्मशिवादिदेवास्तत्सेवनार्त्थं प्रययुः स्वभूत्या।

ओङ्कारपूर्वा अपि सर्ववेदास्तं कीर्त्तयन्तो निजमूर्त्तिमन्तः॥39॥

खगा मृगाद्याश्च पिपीलिकाद्या नगास्तृणाद्याश्च चराचरा ये।

लोकाः स्वलोकाभिमुखं मुकुन्दं पश्चान्महाकारुणिकं प्रजग्मुः॥40॥

ते वानरास्तं रविसूनुपूर्वाः सर्वे नरा अप्यतिशुद्धभावाः।

गायन्त उच्चैश्चरितानि भूम्नो रामस्य पार्श्वद्वितये स्म यान्ति॥41॥

गान्धर्वसाराननुवर्त्तयन्तो गन्धर्वविद्याधरचारणाद्याः।

महामुनीन्द्रा अपि कोलसेन्द्रं वेदैः स्तुवन्तः परितोऽन्वगच्छन्॥42॥

प्राणः स्वयम्भूर्गरुडादयोऽस्य गुणान् वदन्तस्त्रिदिवादुपेत्य।

द्रष्टुं तमीशं जगतो मुमुक्षोर्ज्ञानप्रदीपानुददीपयन्त॥43॥

सद्भक्तिसिद्धाञ्जनतेजिताभिः सज्ज्ञानदृग्भिः प्रभुमीक्षमाणाः।

चराचराः प्राणभृतः प्रमोदमभूतपूर्वं प्रययुः प्रभूतम्॥44॥

अनन्त एवं विभवैरनन्तैः स योजनं सार्द्धमितो जगाम।

रामाज्ञया तत्र मनोरमायां सस्नुः सरय्वां सकलाश्च लोकाः॥45॥

प्राप्ता दिवस्तत्र विमानकोटिर्म्मणिप्रवेकैर्ल्लसमानकोटीः।

प्रजा अपश्यंश्चलचामराणां वृन्दं वधूनामिह चामराणाम्॥46॥

अथाऽरुरोहाम्बरमम्बुजाक्षः सदा चिदानन्दतनुः ससीतः।

सद्योऽतिदिव्याकृतयः समस्ताश्चराचरास्ते च विमानभाजः॥47॥

बद्धाञ्जलिर्म्मूर्द्धनि राजितश्रीरामाय रामाय मनोरमाय।

ब्रह्माऽत वृन्दारकवृन्दजुष्टं तुष्टाव तुष्टावधिकं निमग्नः॥48॥

रामाज्ञया विश्वगुरुर्विरिञ्चिः स वैष्णवीमेव गतिं दिदेश।

स्वानन्दसन्तानवतीमनन्तां ताभ्यः प्रजाभ्यो विभयां विशोकाम्॥49॥

येये पुरस्तादवतारमापुरंशैरवन्यां कपिमर्त्ययोन्याम्।

देवोपदेवा निजमूलरूपं विहाय देहं विविशुर्विशुद्धाः॥50॥

विशेषमात्रेण विनैव भेदं पृथक् पुरस्तादपृथक् ततोऽभूत्।

अनन्तशय्येन पयोब्धिमद्ध्ये स्वमूलरूपेण स रामदेवः॥51॥

सर्वसद्गुणगणैरपि भूम्नः फुल्लतामरसदृंशि सदृंशि।

रामनामवपुषः खलु विष्णोर्भान्ति सद्विभवपुंषि वपूंशि॥52॥

इति श्रीनारायणपण्डिताचार्य्यविरचिते रामाङ्के सङ्ग्रहरामायणे उत्तरकाण्डे सप्तमः सर्ग्गः॥ 7-7-52॥

[आदितः श्लोकाः 3374+52=3426]

## अष्टमः सर्ग्गः॥7-8-30॥

अनुग्रहार्त्थं पवमानसूनो रूपान्तरेणाथ सदाऽन्तरेण।

उवास रामो रमणीयकीर्त्तिर्भूमण्डले किम्पुरुषाख्यखण्डे॥1॥

रामप्रसादाय स शास्ति राज्यं प्राणात्मजः किम्पुरुषाख्यवर्षे।

रामं सदा तत्र निरीक्षमाणः कीर्त्तिं प्रभोर्ग्गायति गानदक्षः॥2॥

वन्दामहे सुन्दरमिन्दिरेशं नारायणं विश्वपरायणं त्वाम्।

विष्णुं च विश्वस्थितिदं विजिष्णुं पाताळपादं पुरुषं द्युमौळिम्॥3॥

| |
|---|
| त्वां वासुदेवं निजमुक्तिबीजं सङ्कर्षणं संहरणप्रवीणम्।<br>प्रद्युम्नमस्य प्रभवप्रभावं वन्देऽनिरुद्धं सकलैकपालम्॥4॥ |
| गुरुं विधेर्विश्वगुरुं कुमारं महीवहं त्वां च महावराहम्।<br>सम्पादकं सात्वतमैतरेयं नारायणं धर्म्मभवं च वन्दे॥5॥ |
| कृष्णं च धर्म्मस्य सुतं हरिं च विरिञ्चरक्षाकरनामधेयम्।<br>त्वां साङ्ख्यहेतुं कपिलं च भूमन्नान्वीक्षिकीवादिनमेमि दत्तम्॥6॥ |
| यज्ञं महेन्द्रं मनुसूक्तवर्ण्यमसङ्गिनं स्तौम्यृषबं च नाभ्यम्।<br>पृथुं पृथुस्थं वरचक्रिणं च मत्स्यं मनुं गामपि गुप्तवन्तम्॥7॥ |
| कूर्म्मं महामन्दरधारिलीलं धन्वन्तरिं त्वाममृतं दधानम्।<br>वधूं सुधार्त्थं हतदैत्यधैर्य्यां दैत्येभसिंहं च नृसिंहमेमि॥8॥ |
| श्रीवामनाख्यं बलिबन्धनं त्वां क्षत्रक्षयार्त्थं ननु भार्ग्गवं च।<br>वेदान्तदं व्यासमुपैमि तं त्वां रामं च रक्षः क्षपणं पतिं मे॥9॥ |
| त्वां शुक्लकेशं बलदेवसंस्थं कृष्णं धरित्रीभरहारिलीलम्।<br>नमाम्यसद्बुद्धिभिदं च बुद्धं कल्किस्वरूपं कलिकल्कशान्त्यै॥10॥ |
| मधुद्विषं वेदहरं हयास्यं त्वां शिंशुमारं ग्रहतारकेशम्।<br>धेनुं रसान् पीतवतीं परेषां वन्दे विरिञ्चादिगुरुं च हंसम्॥11॥ |
| मरुत्वतीपुत्रमुपेन्द्रमेमि पृश्नेः सुतं त्वामपि पृश्निगर्भम्।<br>त्वां दारकाङ्गं वृकदारकं च ध्रुवे कृपालुं खलु वासुदेवम्॥12॥ |
| विभुं मुनीमामनुशिक्षितारं मृत्युं खलानामपि सत्यसेनम्।<br>त्वां तापसं मोचितहस्तिमल्लं वैकुण्ठमीडे निजलोकहेतुम्॥13॥ |

वन्देऽजिताख्यं मथिताम्बुराशिं त्वां सार्वभौमं बलिराज्यदं च।
गुप्ताद्भुतं त्वामृषभं च विष्वक्सेनं हितं शक्रपदस्य शम्भोः॥14॥

त्वां धर्म्मसेतुं सुतमार्य्यकस्य सुधामहूतिं खलु सूनृताजम्।
योगेश्वरं बार्हतमप्युपासे गुरुं बृहद्भानुमिह क्रियाणाम्॥15॥

वन्दे तनूस्ते बडबामुखादीर्भावांश्च विश्वप्रमुखान् द्विवर्ग्गान्।
नारायणादीनपि केशवादीनात्मादिकानप्यजितादिकांश्च॥16॥

अपान्तरप्राज्यतमःपुरोगान् भावान् भजे तेऽन्यतमांश्च मान्यान्।
वर्णाभिधेयान् बृहतीसहस्रवर्णोदितान् वेदमतांस्तथाऽन्यान्॥17॥

इच्छादिशक्तीरपि मोचिकादीस्तवाणिमादीर्विमलादिकाश्च।
अजातविध्यास्वपि जातविध्यास्वाम्नातमूर्त्तीः सकला उपासे॥18॥

कालेष्वनन्तेषु तताननन्तान् देशेष्वनन्तेषु च विग्रहांस्ते।
चित्प्राकृतार्थेषु तताननन्तेष्वेतानुपासे प्रतिवस्तु पाङ्क्तान्॥19॥

ताम्राणि शुभ्राणि च पिङ्गलानि श्यामानि नीलानि चतुर्भुजानि।
द्व्यष्टप्रवेष्टानि च ते वपूंषि महान्ति चाणूनि च चिन्तयामि॥20॥

न जातु जातानि न नश्वराणि न जातु दुःखीनि न दोषवन्ति।
अनन्तसौख्यादिगुणात्मकानि वीक्षे तवैतानि वपूंशि नाथ॥21॥

गुणाननन्तान् भगवन्ननन्तान् प्रत्येकमप्येवमपि क्रियाश्च।
एतेषु रूपेषु सुभूषणेषु प्रत्येकमीक्षे भवतः प्रसादात्॥22॥

भूमानमेनं तव वीक्षमाणो नांशांशदेश्यं तव किञ्चिदीक्षे।
मग्नांस्त्वयीक्षे महदादिदेवान् महार्ण्णवाभ्यर्ण्णगतापगाभान्॥23॥

एवंविधायाखिलशिक्षणायरामाय चेतोनयनक्षणाय।

स्वामिन् पदाब्जानतरक्षणाय तुभ्यं नमः शोभनलक्षणाय॥24॥

इत्थं स गायञ्छतकोटिसङ्ख्यं रामायणं भारतपञ्चरात्रे।

सब्रह्मसूत्रानपि सर्ववेदान् व्याख्यांश्च सद्यो रमतेऽधुनाऽपि॥25॥

श्रेष्ठात्मकाच्छ्रेष्ठसुतान्निशम्य रुद्रादिदेवा मुनिपुङ्गवाश्च।

तत्वे विशेषान् विविधान् वदन्तः स्तुवन्ति नारायणशिष्यमेनम्॥26॥

तत्पालिते किम्पुरषाख्यखण्डे सवल्लभाः किम्पुरुषा वसन्तः।

सोपायना नाथमुपासते तं साराघवस्यास्य गुणान् वदन्तः॥27॥

गन्धर्वपाण्डित्यमखण्डमत्र गन्धर्ववर्य्याः प्रतिदर्शयन्तः।

गायन्ति गेयान् पवमानसूनोः पराक्रमान् रामजयध्वजांस्तान्॥28॥

चक्षाणस्तच्छक्षुषा रामरूपं मन्वानस्तन्मारुतिर्म्मानसेन।

कर्ण्णाभ्यामाकर्ण्णयन् वक्ति वाचा भूम्नः कीर्त्तिं सर्वतो योगभोगी॥29॥

इति पवनसुताय श्रेष्ठभक्ताय रामो हसितसितगुबन्धून् प्रेमपीयूषसिन्धून्।

भुवनजननरक्षाभङ्गलीलाप्रसङ्गान् वितरति कमलायै दत्तशेषानपाङ्गान्॥30॥

इति श्रीमत्त्रिविक्रमपण्डिताचार्यसुत श्रीनारायणपण्डिताचार्य्यविरचिते रामाङ्के सङ्ग्रहरामायणे उत्तरकाण्डे

अष्टमः सर्ग्गः॥6-8-30॥

[आदितः श्लोकाः 3426+30=3456]

**इत्युत्तरकाण्डम् [उत्तरकाण्डे श्लोकाः 352]**

**समाप्तोयं ग्रन्थः**

## आदित्य हृदयस्तोत्रम्

ततो युद्धपरिश्रान्तं समरे चिन्तया स्थितम्।
रावणंचा ग्रतो दृष्ट्वा युद्धाय समुपस्थितम्॥1॥

दैवतैश्च समागम्य द्रष्टुमभ्यागतो रणम्।
उपगम्याब्रवीत् राममगस्त्यो भगवानृषिः॥2॥

रामराम महाबाहो शृणु गुह्यं सनातनम्।
येन सर्वानरीन् वत्स समरे विजयिष्यसि॥3॥

आदित्यहृदयं पुण्यं सर्वशत्रुविनाशनम्।
जयावहं जपन् नित्यमक्षय्यं परमं शुभम्॥4॥

सर्वमङ्गलमङ्गल्यं सर्वपापप्रणाशनम्।
चिन्ताशोकप्रशमनमायुर्वर्द्धनमुत्तमम्॥5॥

रश्मिमन्तं समुद्यन्तं देवासुरनमस्कृतम्।
पूजयस्व विवस्वन्तं भास्करं भुवनेश्वरम्॥6॥

### अत स्तोत्रम्

सर्वदेवात्मको ह्येष तेजस्वी रश्मिभावनः।
एष देवासुरगणान् लोकान् पाति गभस्तिभिः॥7॥

एष ब्रह्मा च विष्णुश्च शिवः स्कन्दः प्रजापतिः।
महेन्द्रो धनदः कालो यमः सोमो ह्यपाम्पतिः॥8॥

पितरो वसवः साध्या ह्यश्विनौ मरुतो मनुः।
वायुर्वह्निः प्रजाप्राण ऋतुकर्त्ता प्रभाकरः॥9॥

| |
|---|
| आदित्यः सविता सूर्य्यः खगः पूषा गभस्तिमान्।<br>सुवर्णसदृशो भानुर्हिरण्यरेता दिवाकरः॥10॥ |
| हरिदश्वः सहस्रार्चिः सप्तसप्तिर्मरीचिमान्।<br>तिमिरोन्मथनः शम्भुस्त्वष्टा मार्त्तण्ड अंशुमान्॥11॥ |
| हिरण्यगर्भः शिशिरस्तपनो भास्करो रविः।<br>अग्निगर्भोऽदितेः पुत्रः शङ्खः शिशिरनाशनः॥12॥ |
| व्योमनाथस्तमोभेदी ऋग्यजुःसामपारगः।<br>घनवृष्टिरपाम्मित्रो विन्ध्यवीथीप्लवङ्गमः॥13॥ |
| आतपी मण्डली मृत्युः पिङ्गलः सर्वतापनः।<br>कविर्विश्वो महातेजा रक्तः सर्वभवोद्भवः॥14॥ |
| नक्षत्रग्रहताराणामधिपो विश्वभावनः।<br>तेजसामपि तेजस्वी द्वादशात्मन् नमोऽस्तु ते॥15॥ |
| नमः पूर्वाय गिरये पश्चिमे गिरये नमः।<br>ज्योतिर्ग्गणानां पतये दिनाधिपतये नमः॥16॥ |
| जयाय जयभद्राय हर्य्यश्वाय नमोनमः।<br>नमोनमः सहस्रांशो आदित्याय नमोनमः॥17॥ |
| नम उग्राय वीराय सारङ्गाय नमो नमः।<br>नमः पद्मप्रबोधाय मार्त्ताण्डाय नमो नमः॥18॥ |
| ब्रह्मेशानाच्युतेशाय सूर्य्यायाऽदित्यवर्च्चसे।<br>भास्वते सर्वभक्षाय रौद्राय वपुषे नमः॥19॥ |

| |
|---|
| तमोघ्नाय हिमघ्नाय शत्रुघ्नायामितात्मने।<br>कृतघ्नघ्नयाय देवाय ज्योतिषां पतये नमः॥20॥ |
| तप्तचामीरकराभाय वह्नये विश्वकर्म्मणे।<br>नमस्तमोभिनिघ्नाय घृणये लोकसाक्षिणे॥21॥ |
| नाशयत्येष वै भूतं तदेव सृजति प्रभुः।<br>पायत्येष तपत्येष वर्षत्येष गभस्तिभिः॥22॥ |
| एष सुप्तेषु जागर्ति भूतेषु परिनिष्ठितः।<br>एष एवाग्निहोत्रं च फलं चैवाग्निहोत्रिणाम्॥23॥ |
| वेदाश्च क्रतवश्चैव क्रतूनां फलमेव च।<br>यानि कृत्यानि लोकेषु सर्व एष रविः प्रभुः॥24॥ |
| **फलश्रुतिः** |
| एनमापत्सु कृच्छ्रेषु कान्तारेषु भयेषु च।<br>कीर्त्तयन् पुरुषः कश्चिन्नावसीदति राघव॥25॥ |
| पूजयस्वैनमेकाग्रो देवदेवं जगत्पतिम्।<br>एतत् त्रिगुणितं जप्त्वा युद्धेषु विजयिष्यसि॥26॥ |
| अस्मिन् क्षणे महाबाहो रावण त्वं वधिष्यसि।<br>एवमुक्त्वा तदाऽगस्त्यो जगाम च यथाऽऽगतम्॥27॥ |
| एतच्छ्रुत्वा महातेजा नष्टशोकोऽभवत् तदा।<br>धारयामास सुप्रीतो राघवः प्रयतात्मवान्॥28॥ |

| |
|---|
| आदित्यं प्रेक्ष्य जप्त्वा तु परं हर्षमवाप्तवान्।<br>त्रिराचम्य शुचिर्भूत्वा धनुरादाय वीर्य्यवान्॥29॥ |
| रावणं प्रेक्ष्य हृष्टात्मा युद्धाय समुपागमत्।<br>सर्वयत्नेन महता वधे तस्य धृतोऽभवत्॥30॥ |
| अथ रविरवदन्निरीक्ष्य रामं मुदितमनाः परमं प्रहृष्यमाणाः।<br>निशिचरपतिसङ्क्षयं विदित्वा सुरगणमध्यगतो वचस्त्वरेति॥32॥ |
| इति श्रीमद्वाल्मीकिरामायणे युद्धकाण्डे सप्तोत्तरशततमः सर्गः॥ |

श्रीकृष्णार्पणमस्तु॥

॥मुख्यप्राण वशे सर्वं स विष्णोर्वशगः सदा॥

॥प्रीणयामो वासुदेवं देवतामण्डला खण्डमण्डानम्॥